अनन्तशयनसंस्कृतग्रन्थावलिः— ग्रन्थाङ्कः २२४

पौरस्त्यभाषागवेषणहस्तलिखितग्रन्थप्रसाधनकार्यालयः
केरलविश्वविद्यालयः

वेङ्कटसुब्रह्मण्याध्वरिप्रणीतं

वसुलक्ष्मीकल्याणम्

प्रसाधकः

डाक्टर्. के. राघवन् पिळ्ळ

पौरस्त्यभाषागवेषणहस्तलिखितग्रन्थप्रसाधनकार्यालयाध्यक्षः ।

१९६८/११४४

अनन्तशयने एस्. वी. जी. मुद्रणालये मुद्रितम् ।]   [मूल्यं रूप्यकचतुष्टयम्

INTRODUCTION

The Vasulakṣmīkalyāṇam, a Sanskrit drama by Venkatasubrahmaṇyāddhvarin was serially published in the Quarterly Sanskrit Journal of the Kerala University Oriental Research Institute and Manuscripts Library [1] and it is now being issued in book form as No. 224 in the Trivandrum Sanskrit Series. This drama is different from both the Vasulakṣmīkalyāṇam by Rāmānuja [2] and the Vasulakṣmīkalyāṅam a model drama included in the chapter on dramas in the Rāmavarmayas'obhūṣaṇam [3] by Sadās'iva Dīkṣita.

The author, Venkaṭasubrahmaṇya Addhvarin (Diksita) lived under the patronage of Kārtikatirunāḷ Rāmavarma Mahārāja of Travancore (1724-1798 A. D.) who was well known as Dharmarāja.[4] From the account of the genealogy given in the prologue to this drama,[5] we are able to understand that Venkaṭasubrahmaṇya Addhvarin was a descendant of the famous Appayya Dīkṣita (1553-1626). Appayya Dīkṣita had three sons of whom Nīlakaṇṭha was the youngest; he had eleven sons; of these the third Cinnamappāddhvarin had two sons Bhavānīs'aṅkara

1. From Vol. XVI No. 2 Vol. XVII No. 2
2. Descriptive Catalogue of Sanskrit Mss. in the Oriental Mss. Lib. Madras-Vol. VIII No. 8504.
3. Trivandrum Palace Library Catalogue - No. 1379.
4. See - Dr. K. Kunjunni Raja - Contribution of Kerala to Sanskrit Literature p. 176.
5. See.

अप्पय्याध्वरिण: सुतेष्वचरम: श्रीनीलकण्ठाध्वरी
तत्पुत्रेषु दशाधिकेष्वपि तृतीयश्चिन्नमप्पाध्वरी ।

and Mīnakṣīvallabha. Bhavānīs'ankara's son Venkates'varamakhin was the father of the poet Venkatasubrahmaṇya. The author speaks of four of his ancestors Nīlakaṇṭha, Cinnappayya, Venkates'vara and Prabhākaradīkṣita as the authors of the drama Nalacarita, Umāpariṇaya Uṣāharana and Haris'candrānanda respectively.[6] It is also stated in the prologue that the scholar Vaṭāraṇya Vājapeya was his student. Vājapeya was also his younger brother.[7]

The present drama Vasulaksmīkalyāṇam is stated to have been composed in the year of Vis'vāvasu,[8] without any indication of its equivalent in the S'aka or the Kollam Era; but as Kollam 960 (A. D. 1785), the twentysixth year of

---

तस्माच्चापि भवानिशङ्करमखी ज्येष्ठो गुणैरप्यभूत्
तस्यैकोऽजनि वेङ्कटेश्वरमखी यस्याद्यसूनुः कविः ॥

The reading सुतेऽचरमः given in the text of this edition is correct if the word अचरम be taken to mean नास्ति चरमो अस्मादन्यः just as अनुत्तमः etc.

See also—विद्वत्कुलगुर्वप्पयमखिनां वंशो महोन्नतो जीयात् ।
वेङ्कटसुब्रह्मण्याध्वरिकविविद्वन्मणिर्यतो ह्युदभूत् ॥ p 5

6. cf-अस्य कवेः पूर्विकाः श्रीमदप्पय्याध्वरितनुच्छन्नस्य भगवतश्चन्द्रमौलेरंशभूताः नीलकण्ठमखिचिन्नप्पयाध्वरिवेङ्कटेश्वरमखिप्रभाकरदीक्षितप्रभृतयः षड्दर्शनीवल्लभा अपि नलचरितोमापरिणयोषाहरणहरिश्चन्द्रानन्दप्रभृतिभिरपरिमितैरद्भुतनाटकादिप्रबन्धैः कुलक्रमादेव समज्जीविकाहेतवः ॥ p. 4

7. cf-अयमसो यस्य कनीयान् भ्राता इत एवाधीतनिगमादिसर्वविद्यो दिगन्तविदितनिज-वैखरीविभववित्रासितविमतवादिगजकेसरी वटारण्येश्वरवाजपेययाजीत्यभिख्यायते । p. 6

8. cf-वसुलक्ष्मीकल्याणमिदं नाटकमङ्कैर्युतं चतुःषष्ट्या ।
व्यरचि मयेदं कुतुकाद् विश्वावसुवत्सरे वसन्ततौं ॥ At the end of the Vth Act.

reign of Rāmavarman was also the cyclic year Vis'vāvasu, that year may be taken to be the date of the composition of this drama. The year named Vis'vāvasu occured only once during Kārtikatirunāḷ Rāmavarman's reign and it was in 1785 A. D,[9] The hero of this drama is the same illustrious king Rāmavarma known as Dharmarāja who lived between 1724—1798 A. D.[10] Therefore, Venkaṭasubrahmaṇya Dīkṣita also may be assigned to the same period.

The Vasulakṣmīkalyāṇam drama describes in five acts the marriage of king Rāmavarman of Travancore with Vasulakṣmī, the princess of Sindhu. The Minister Buddhisāgara who has seen a portrait of Vasulakṣmī, the Sindhu princess is anxious that the King should marry her so that the political influence of Travancore may extend northwards and his friendship with the Hūṇarāja (English East India Company) may also be strengthened.[11] When the news is received that the Sindhu princess is voyaging to Ceylon, the minister manages to waylay this ship in Travancore waters with the active co-operation of the Hūṇarāja. Vasumān, the Officer in Command of the sea coast who is also the brother of Rāmavarman's consort sends the captive princess to the royal court. The King falls in love with her and meets her in the royal pleasure garden; the jealous queen tries to remove her rival by marrying her to the Cera prince Vasuvarman; but the plot fails as the King and his Vidūṣaka

9. For this information see–A. S. Ramanatha Iyer–Indian Antiquary — Vol. LIII. pp. 1—8, 1924 A. D.

10. See–तदामुष्यायणस्य प्रबन्धे विशिष्य पुण्यश्लोकमहाराजरामवर्मकुलशेखरचरितानुबन्धे कुतो न मे भूयानादरातिशयः स्यात् । p. 4

11. See–तदनेन तीर्थेन हिमवत्सश्चिमानूपवासिनोऽपि भरतवर्षमात्रव्यापिनो हूणराजस्य चिरप्रवृत्तमपि सख्यं देवेन बहुलीभविष्यतीति मन्ये ॥ p. 13

impersonate the Cera prince and his friend. At last the queen gives her consent for the marriage.

The first Act of the drama deals with the circumstances under which Rāmavarman happens to see the portrait of the Sindhu princess and loves her and also the jealous queen's watching the movements of the King. The second and the third Acts describe the development of the love between the hero and the heroine and their first union in the royal pleasure garden. The queen's plan to remove her rival Sindhu princess and its failure are described in the fourth Act. The fifth and the last Act deals with the ultimate union of the King and the heroine which is brought about with the consent of the queen herself on the advice of her brother Vasumān who heartily sided with the minister Buddhisāgara in his endeavours. In this Act are also dealt with the arrival of the Sindhu Prince from his country to celebrate his sister's marriage with the Travancore King and the friendship of both the parties with the Hūṇarāja.

Sadāśiva Dīkṣita another court poet of the same Rāmavarma Maharaja wrote a work called Rāmavarmayaśobhūṣaṇam[12] on the model of the famous Pratāparudrīya of Vidyānātha. In the chapter on drama in that work, a model drama called Vasulakṣmīkalyāṇa describing the marriage of Ramavarman with Vasulakṣmī is included. The Vasulakṣmīkalyāṇam by Venkaṭasubrahmaṇya Dīksita is similar in story with the drama of Sadāśiva Dīkṣita and is written in conformity with a model drama with all its sixtyfour

12. Ms. No. 1379 of Trivandrum Palace Library catalogue. See also History of Classical Sanskrit Literature p. 802.

'aṅgās'[13]. The difference in the drama is only in the names of certain characters and a new point here is the introduction of the Hūṇarāja as the third party in the alliance. In securing dramatic effectiveness in the presentation of the plot of the Vasulakṣmīkalyāṇam, the author has derived inspiration for his innovations from other Sanskrit dramas like Mālavikāgnimitra, Ratnāvali etc.

The drama has no direct historical importance and there is no reference at all to the attempted invasion of Travancore by Tippu Sultan or even to the Mahārāja's grand pilgrimage to Rāmeśvaram which was undertaken in A. D. 1784 just a year previous to the date of composition of the drama.[14] But, in the absence of other evidence to denote an actual marriage between the King Rāmavarman with a Sindhu princess called Vasulakṣmī, A. S. Rāmanatha Iyer[15] has tried to interpret the drama in an allegorical way that it connotes the establishment of good relations between the Travancore King and the northern merchants of Sindh and Cutch[16] with the help of the English East India Company so as to assure the commercial prosperity of the state. He points out that all the important characters of the drama except the King Rāmavarman the hero. and Buddhisāgara, the minister are given fictitious names coined from the same Sanskrit word 'Vasu' namely Vasusena – commander, Vasumati – the consort of the Travancore Maharaja, Vasumān – the consort's brother and frontier –

---

13. See colophon – 'वसुलक्ष्मीकल्याणमिदं नाटकमङ्कैश्चतु:षष्ट्या ।'
14. Travancore State Manual Vol. I p. 384
15. Indian Antiquary Vol. LIII – pp. 1–8; 1924.
16. cf. सिन्धोरुत्तरकच्छभूमिमवधीकृत्याहिमाद्रेः क्षितिं etc. p. 51.

captain, Vasuvarman – the Cera prince, Vasunidhi – Sindhurāja, Vasurāśi – his son and Vasulakṣmī – the Sindhu princess. He also says that "in all probability the allusion of Hūṇaraja[17] may be to the English East India Company which was a rising power in the political horizon of India and whose help and goodwill were much coveted and sought after by the Indian princes of that period. From the Travancore State Manual[18] it is learnt that the port of Alleppey was opened out for commerce in the reign of this King Rāmavarman and that great facilities were afforded to certain wealthy merchants of Sindhu and Cutch to colonise at that port, so as to assume the commercial prosperity of the State. In the drama again Sindhurāja is mentioned as the friend of Rāmavarman's uncle[19] Mārtāṇḍavarman. The references in the drama are not to the northern provinces of Sindh and Cutch as such, but to certain merchants of these areas who were generally carrying on a brisk trade along the West Coast down to Ceylon and whose settlement at the new port of Alleppey was the happy achievement of King Rāmavarman. When the Dutch trade was undermined, the English East India Company which had got a slippery footing at Anjengo and Vizhinjam, was enabled to have a more secure commercial as well as political base of operations on the West Coast, and with the

---

17. op cit.
18. Vol. I. p. 372
19. cf.

अस्नन्मातुलबालमित्रमसकृत्कर्णान्तरङ्गीकृतो
योधीतिर्धनुरागमेषु सह तैस्तुल्यश्च बाह्वोर्बले ।
सिन्धोरुत्तरकच्छभूमिमवधीकृत्याहिमाद्रेः क्षितिं
रक्षन् दिक्पतिसन्निभो वसुनिधिः ख्यातप्रभावः क्षितौ ॥ p. 51

establishment of good relations between the Travancore Kings and the northern merchant princes of Sindh and Cutch it also rapidly strengthened its influence and extended its sphere of activity further in the North. The name of the heroine Vasulakṣmī, which means literally the 'Goddess of wealth' may aptly indicate a personification of the anticipated commercial prosperity of the State consequent on the new colonisation by the northern merchants, whose introduction into the country and the grant of special privileges to whom were, however, first viewed with disfavour and jealousy by the conservative 'native of the soil' as personified in the legal consort Vasumati (the earth) until their prejudice was tided over by proper arguments adduced by the able minister; while Vasumān (the Port Officer) who was also convinced of the advantages that would happen to the State by Vasulakṣmi's marriage (increased commercial activity) heartily sided with the minister in his endeavours to win over Vasumati's consent". This is the plausible interpretation of the story of Vasulakṣmīkalyāṇam drama proposed by A. S. Ramanatha Iyer.

If the above significance was really intended by the dramatist, he could have better achieved his purpose by a more direct treatment of the subject by its quasi-historical association.

So far as the literary side of the drama is concerned the Vasulakṣmīkalyāṇam is a good work of its kind. Venkaṭasubrahmaṇya Dīkṣita's style is marked by its simplicity and lucidness. His ideas are dignified and the diction is enchanting. A few examples of his style may be noted —

किं मज्जामि सुधार्णवे किमु चिदानन्दार्णवे किं पुनः
शृङ्गाराद्भुतमेलनैकमधुरे लीये रसैकार्णवे ।
कन्दर्पाद्वयवादहृद्यपरमानन्दार्णवेऽनुत्तरे
लीये वा क्व न चेदहेतुरियती स्याच्चतसो निर्वृतिः ॥ p. 17

नैवं नैवमियं कुतोऽपि न भवेत्सृष्टेर्विधा त्वीदृशी
मन्ये मन्मथशाम्बरी पुनरियं त्रैलोक्यसम्मोहिनी ।
नो चेत्संसृतिमङ्गलाच्च परमो मोक्षः कुतः स्तूयता-
मेषा वा श्रुतिमूर्धभिः सुखमयी मिथ्या कुतो निन्द्यताम् ॥ p. 21

The hero's 'bhāvās' are described in these stanzas when he beholds the portrait of the heroine. In these stanzas Venkaṭasubrahmaṇya Dīkṣita, true to his pedigree from the great Advaitin Appayya Dīkṣita, has managed to give a philosophical twist to the wordly experiences of love. The description of the heroine—

किन्त्वेषा जलनिर्भराभ्रवितते: सौदामिनी विच्युता
किं वा शम्बरवैरितन्त्रमहितं तत्त्वं परं मूर्तिमत् ।
किं रत्नाकरसम्भवां श्रियमवेक्ष्येर्ष्याकुलान्यां श्रियं
तद्विस्मापयनीमसूत धरणीमां रत्नगर्भा स्वयम् ॥ p. 47

There is a praise-worthy stanza describing the moon-rise and also suggesting the glory of the king which was so appreciated by the King as to give to the author the title of Mahakavi –

[20]दुग्धाब्धेररविन्दनाभशयनात् त्वद्रूपगूढात्मनः
कंसारेः पृथुबाहुलालितमहीमालोकयन्त्याः श्रियः ।
कोपेनारुणमाननं दरचलद्भ्रूमुग्धमालोक्यते
प्रायःपूर्णविभावरीशशशवत् प्रत्यग्रबिम्बच्छलात् ॥ p. 95

---

(20) Hearing this stanza of Vidūṣaka, the king says – साधु वयस्य । महाकविरसि. This shows that the poet himself was in the part of Vidūṣaka and thereby it suggests that he was an intimate friend of the Kārtikatirunāl Mahārāja.

This edition is based on the two palm-leaf manuscripts Nos. 2912 and 20581 belonging to the Library of this Institute. Both the manuscripts are in good condition and written in the Grantha script.

I have been assisted in the edition and publication of this work by Sri. A. Ramachandra Sastri, Research Officer, Sri. M. Madhavan Unni, and Sri. E. Easwaran Namboodiri, Assistant Research Officers of this Department.

Oriental Research Institute &
Manuscripts Library,
Trivandrum,
20—5—1968.

K. RAGHAVAN PILLAI
Director.

वसुलक्ष्मीकल्याणम्

वेङ्कटसुब्रह्मण्याध्वरिप्रणीतम् ।

वन्दामहे किमपि तत्त्वमपारबोध-
कारुण्यनिर्वृतिघनैकविवर्तरूपम् ।
सिन्दूरचारुसुषमं विनतार्तिहार-
(मत्यन्त)शोभिमणि(मण्डितहे)मकुम्भम् ॥

अपिच,

ऐन्दव्या कलया कपर्दमळिकं ग्रीवां च पिङ्गासित-
श्रीभ्यां व्यञ्जयितुं स्वतद्गुणमहामायित्वमश्वन्निव ।
वामाङ्गं कुचकुम्भकुन्तलवलिश्रीभिः कदाचित् कदा-
प्युच्चैः कौस्तुभशङ्खशार्ङ्गकमलाचिह्नैः शिवः पातु वः ॥ २ ॥

किञ्च,

उद्यन्तीमुदधेरुदीर्णकरुणामुत्कूलरूपोच्चया-
मुत्क्षिप्ताम्बुजमालिकां करतलेनात्मोन्मुखीमिन्दिराम् ।
दृष्ट्वोन्निद्रकदम्बडम्बरमुरःपीठं रसात् सज्जयन्
प्रान्तप्रेङ्खितशङ्खचक्रमवतु श्रीपद्मनाभोऽत्र वः ॥ ३ ॥

[नान्द्यन्ते]

सूत्रधारः— अलमलमतिप्रसङ्गेन ।

मणिगणमिव सूत्रं विश्वसूक्ष्माङ्गजातं
विधिरिव जगदन्तर्यामिताप्त्या यथेशः ।

निखिलमपि च धृत्वा वाङ्मयं वर्तते या
करधृतवरवीणा शारदा सास्तु सिद्ध्यै ॥ ४ ॥

[इति पुष्पाञ्जलिं विकीर्य सर्वतो विलोक्य सहर्षाश्चर्यं]

सफलो मे मनोरथश्चिरादद्य सम्पन्नः । सम्पूर्णश्चास्मन्महत्तराणामाराधिताखिलरसिकसमाजानामावर्जिताशेषभरतागमसम्प्रदायकुलगुरुप्रसादानाम् अन्तेवासिताभ्युपगममात्रानुगृहीतस्मन्यप्रतिद्वन्द्विनटवर्गाणामिदानीमनुग्रहः । कथमन्यथा अमीषामस्मदुदग्रसुकृतपरिपाकसम्पदा कोसलपाञ्चालविराटकर्णाटगुर्जरतुण्डीरकाश्मीरचेरचेदिगौडद्राविडमगधकुरुभोजावन्तिचोळपाण्ड्यकोङ्कणकेरळमुखनानाजनपदवास्तव्यानां दुरवबोधषड्दर्शनीसारकूलङ्कषोग्रमनीषाविशेषशमितधिषणदुरहङ्काराणां प्रतिवादिविद्वदुद्दामवादजल्पवितण्डादिदुस्सहपाण्डित्यसर्वङ्कषनिरुपमवाङ्मुखशतमुखरितवदान्यमूर्धन्यमहाराजमहितास्थानीनित्यसम्माननालब्धमहिमातिशयानां साहितीसम्प्रदायप्रवर्तनाकुलगुरूणाम् अस्य चानुपदवि नमत्सुरासुरनिकरशिरोघटितकोटीरकोटिविचितविविधमणिगणनिस्सीमविकसदनुपमच्छायापरिचयानुपदचित्रीयमाणकनकाम्बरलोभनीयकटितटघटितकनककटिसूत्रादिविविधालङ्करणखचितानर्घमणिमयूखमा(या ? ला)कुसुमसन्ताननमदनमार्गणानुषङ्गपर्युत्सुकरोमावलीकपटहारिनीलमणिराजकुमारिकास्वयंव्रियमाणविमलकौस्तुभमणिराजतलसंक्रान्तनिजानिजप्रतिबिम्बसमीक्षणजातशङ्कान्तिकोपविष्टरमारसासूयाकवाञ्चितदरारुणापाङ्गनिर्यन्मरीचिनिकरमिषरजःकपिशमधुकरनिकुरुम्बाहतिव्याकुलितमुखपुण्डरीकविभावितसाकूतमन्दहासप्रभाङ्कुरकुसानुबिम्बधरणीकमलालिकगतसिताभ्रतिलकनिष्ठ्यूतकिरीटमणिसंलग्नतद्ग्रीव्याजशशिकलाजाह्नवीतरङ्गशेखरतावलोकनक्षणातिमात्रसम्भ्रान्तावनीन्दिरापरिहासपरस्य दुर्दान्तदनुजदुरतिक्रमक्षुभित-

नाभीकमलकर्णिकालयपितामहवदनराजिराजीवमकरन्दधारायमाणनि-स्सीमविकसदाम्नायसूक्तिनिकरसम्भ्रमसम्पद्यमानवर्णपदवाक्यस्खलन-श्रवणसञ्जातमुखभङ्गभुजङ्गपुङ्गवश्रुतिविविधित्सावशसम्पन्नमीलदक्षितोप-निपतन्निद्रासुखविवशतानिस्सीमानिस्सरन्निःश्वासोच्छ्वासधोरणीपरिणत-चक्रवात्याभ्रमणरयसम्पन्नशैथिल्यपक्ष्मार्गळिकतोद्घाट्यमानगोळमिषक-वाटिकापत्रानुषङ्गनिरुपमकैवल्यलक्ष्मीसदनायमाननयनारुणाम्बुरुहमर-न्दायमानसदयावलोकनक्षणनिर्वृतनिखिलप्रपञ्चस्य श्रितजनपारिजातस्य जलभरातिमन्थरतयार्णवास्यर्णमवनितलमवतीर्णस्येव नीलजीमूतस्य भगवतोऽनन्तशयनमधिशयानस्य पद्मनाभदेवस्य निरातशयवासन्ति-कोत्सवदिदृक्षापल्लवितोत्साहानां पण्डितानामयं समाजः सर्वतः सभा-माक्रम्योपविष्टः अस्मत्प्रार्थनानिरपेक्षमेवास्मत्कलाकौशलदिदृक्षोत्कण्ठित इवास्मानादरावलोकनैः स्वयमनुगृह्णाति । [विचिन्त्य सविमर्शम्] तदी-दृशरसिकजनमनोविनोदनं नूतनं पुण्यश्लोककथानुषङ्गमधुरम् अलघु-विभावनीयसंविधानं कस्य कवेर्महाजनहृदयङ्गमस्याधुनिकस्य कर्म रूपकमुपलभ्यामीषु नापहास्यो भवामि । [सानुसरणं दक्षिणं बाहु-मुत्क्षिप्य परिभ्रमन्] जितं जितं मया । यतः,

सत्सामाजिकलाभहर्षविवशस्वान्तेन चामीकरं
कण्ठस्थं कुधियात्मरूपमधिया यद्वन्मया विस्मृतम् ।
शृङ्गारैकरसोर्मिलं प्रतिदिनं यच्छिक्ष्यमाणं मया
पात्रेष्वादरतोऽर्पितं च कविना मय्यद्भुतं नाटकम् ॥ ५ ॥

तदद्य विमृश्यमानं दैवादुद्बुद्धम् । [इति पुरतःप्रसर्पति ।]

[प्रविश्य]

नटः— [सकौतुकं] कः पुनरसौ कविः, य ईदृशरसमधुरप्रबन्धनिर्माणमहनीयप्रज्ञः । किन्नामधेयं वा तन्नाटकं, यद् धीरोदात्तगुणरामवर्मदेवकुलशेखरचरितानुबन्धमनोहरम् । भावेन सादरमध्यापिताः स्ववर्ग्याः ह्यः सायन्तने भरतवाक्यपाठिनो मया श्रुताः ।

सूत्रधारः— [सबहुमानं] मारिष सम्यगवधारितं सादरमध्यापिता इति । मम हि पूर्वेषामपि रङ्गदेवाभिन(य ? व)गुप्तरसमञ्जनटकुलशेखरप्रभृतीनां नाट्यविद्याचार्याणामीदृशानितरसाधारणविख्यातिमूलगुरवः अस्य कवेः पूर्विकाः श्रीमदप्पय्याध्वरितनुच्छन्नस्य भगवतश्चन्द्रमौलेरंशभूताः नीलकण्ठमखिचिन्नप्पयाध्वरिवेङ्कटेश्वरमखिप्रभाकरदीक्षितप्रभृतयः षड्दर्शनीवल्लभा अपि नळचरितोमापरिणयोषाहरणहरिश्चन्द्रानन्दप्रभृतिभिरपरिमितैरद्भुतनाटकादिप्रबन्धैः कुलक्रमादेवासञ्जीविकाहेतवः । तदामुष्यायणस्यास्य प्रबन्धे विशिष्य पुण्यश्लोकमहाराजरामवर्म[1]कुलशेखरचरितानुबन्धे कुतो न मे भूयानादरातिशयः स्यात् ।

नटः— [सशिरःकम्पं स्वगतम्]

सम्भाव्येत कुतोऽन्यतो हिमरुचे रत्नकरादुद्गमः
कान्यस्मिन् मलयात् पटीरनिलयान्मन्दानिलः स्पन्दताम् ।
विद्वद्रत्नखनेस्तदप्पयमखिप्रख्यातवंशादृते
कान्यत्राभ्युदियादयं कवयतां हृद्यश्च काव्याङ्कुरः ॥ ६ ॥

प्रकाशं] भाव! [2]सम्यगभिहितमप्पयाध्वरितनुच्छन्नस्य भगवतश्चन्द्रमौलेरंशभूतास्तद्वंश्या इति ।

---

१. 'वर्मदेवचरि' क. २. 'सत्यमभि' ख.

तच्चाद्दक्षशताधिकाद्भुतकृतिप्रख्यातकीर्तेस्समी-
कर्तुर्दुर्मततीव्रकण्टकशताविद्धान् स्वयं सत्पथान् ।
शम्भोरप्पयदीक्षिताख्यनृवपुच्छन्नस्य वंश्या इमे-
ऽप्यंशा एव कुतोऽन्यथैषु महिमैतावानभिज्ञायताम् ॥ ७ ॥

परन्तु कियदन्तरितोऽयं ततः कविरिति ज्ञातुमिच्छामि ।

सूत्रधारः— [साकूतं] तर्हि श्रूयताम्—

अप्पय्याध्वरिणः *सुतेष्वचरमः श्रीनीलकण्ठाध्वरी
तत्पुत्रेषु दशाधिकेष्वपि तृतीयः $सिंहमप्पाध्वरी ।
तस्माच्चापि भवानिशङ्करमखी ज्येष्ठो गुणैरप्यभूत्
तस्यैकोऽजनि वेङ्कटेश्वरमखी यस्याद्य सूनुः कविः ॥ ८ ॥

नटः — [सावहित्थं] किमप्पय्यगुरोश्चतुर्व्यवहितः ।

सूत्रधारः — [विहस्य]

अप्पय्याध्वरिणश्चतुर्व्यवहितः स्याच्चेदयं किं तत-
स्तत्तेजो न भवेन्न वा स्ववचसां गुम्फैः सतो रञ्जयेत् ।
चण्डांशोः प्रतिबिम्बमर्मणि तलादर्शक्रमात् क्वापि चेत्
संक्रान्तं न रवेर्महः सविधगानर्थान्न वा भासयेत् ॥ ९ ॥

तदिह सर्वथा,

विद्वत्कुलगुर्वप्पयमखिनां वंशो महोन्नतो जीयात् ।
वेङ्कटसुब्रह्मण्याध्वरिकविविद्वन्मणिर्यतो ह्युदभूत् ॥ १० ॥

---

* 'सुतेषु चरमः' *See page 458, Kerala Sahityacaritram by Ullur-Vol. III*

$ 'चिन्नमप्पाध्वरी' *See page 458, Do*

नटः— [सप्रत्यभिज्ञाश्चर्यं] यः किल,

व्याकर्तुं वाचमीष्टे श्रुतिगिरमुभयीं वेत्ति मीमांसितुं वा
क्षोदः काव्यार्थमर्मण्यवगतमहिमालङ्कृतौ तर्कविज्ञः ।
साहित्ये पारदृश्वा सदृशगुणगणैर्भावितः शिष्यवर्गै-
रन्तर्वाण्यङ्घ्रिधूळीभरविनतशिराः केन न ज्ञायतेऽसौ ॥ ११ ॥

सूत्रधारः— [साभ्युपगमं] अयमसौ यस्य कनीयान् भ्राता इत एवाधीतनिगमादिसर्वविद्यो दिगन्तविदितनिजवैखरीविभववित्रासितविमतवादिगजकेसरी वटारण्येश्वरवाजपेययाजीत्यभिख्यायते ।

नटः— [सस्मितं] तर्हि परमार्थः श्रूयताम्—

यदीदृशः कविर्नेता तादृशः स गुणोत्तरः ।
अनीदृशः सभानाथ इत्यमी कृतिनो वयम् ॥ १२ ॥

सूत्रधारः— नाटकनामप्रश्नविषये त्विदमुत्तरम्— [इति पत्रिकां ददाति]

नटः— [सकौतुकं गृहीत्वा वाचयति]

को वासुदेवजनका(र्थ)पदाद्यभागो
लक्ष्मीःपदस्य कियती प्रकृतिः प्रसिद्धा ।
एकं सुवर्णमुभयोरभिधायकं कि-
मित्येतदुत्तरपदैर्घटिताभिधानम् ॥ १३ ॥

इति । [किञ्चिद् विमृश्य सोल्लासम्] तर्हि वसुलक्ष्मीकल्याणमिति नाटकनाम सूपपन्नम् । भवत्वेतदेवम् । पूर्विकाधुनिककविप्रवरविषये कविना किमपि नोक्तं विनयेन ।

सूत्रधारः— आ! श्रूयतां तदपि—

ये केचिच्छ्रुतिपाठमात्ररसिका ये वक्रतर्कोद्धता
ये नानाविधकर्मनिर्मितधियो ये ब्रह्मनिष्ठाश्च वा ।
तेभ्योऽयं विहितोऽञ्जलिः परमियं श्रद्धावती सान्त्वना
मृद्वीकामधुरोक्तिनिर्वृतधियां स्यात् सत्कवीनां मम ॥ १४ ॥

किञ्च,

स्वयं ज्ञात्वा सन्तः सरसकवितामर्म परमं
प्रबन्धान् निन्देयुर्यदि कवयतां दुर्लभमिदम् ।
रसज्ञायाः पादप्रहृतिरपि यूनां किल मुदे
प्रसादोऽप्यन्यस्या न तु सुचतुरापाङ्गललितः ॥ १५ ॥

इति ।

नटः— तर्हि किञ्चिदवशिष्यते । प्रस्तूयतां प्रस्तुतमेव वसन्तसमयमधिकृत्य किमपि ।

सूत्रधारः— इतः प्रस्तूयते । श्रूयताम् ।

नटः— अवहितोऽस्मि ।

सूत्रधारः—

परिचितनवचूताङ्कुरपाटीरभूभृत्-
पवनपरिमळानां तुम्रदम्रान्यपुष्टा ।
निरुपमकुसुमश्रीतर्पितेन्दिन्दिरालि-
र्व्यपनयति मधुश्रीर्मानिनीमानमूर्च्छाम् ॥ १६ ॥

अपि च,

मन्दं विरज्यति यदालियुवात्र दैवाद्
वैरस्यतः सुचिरभावितकुन्दवल्ल्याम् ।
धन्या तदा स्वयममन्दमरन्दगुर्वी
सन्दानिता भगवता बत माधवीयम् ॥ १७ ॥

नटः — [सोन्मादं नृत्यन्] तर्ह्येवं सम्पन्नायामखिलकरणीय[1]-सम्पत्तौ किमिति भावेन नादिश्यते भूमिकापरिग्रहणाय विनेयवर्गः ।

सूत्रधारः— [पृष्ठतो निरूप्य सकौतुकं] किं न पश्यसि — इतः सभानाथोपश्लोकनमस्क्रियमाणं प्रतीक्षमाणो गृहीतप्राथमिकभूमिकः सज्ज एव विनेयवर्गः । तदित उपश्लोक्यते भगवान् भूतभावनः पद्म-नाभदेवः ।

नटः— त्वरस्व तर्हि ।

सूत्रधारः— शृणु सावधानः ।

तमालदलनीलया दलितनीलरत्नद्युतिः
श्रितोऽयमनुरूपयाप्यतनुपोत्रिभावोढया ।
भुवा स्वयमतोऽन्यया कनकसश्रिया च श्रिया
वहन् हृदि कृतां स्रजं जयति पद्मनाभो विभुः ॥ १८ ॥

[नेपथ्ये]

साधु भोः कुशीलवपुत्र! साधु । यदयं महाराजचरिताविसंवादिचारित्रो वञ्चिकुलमूलधनं भगवतानानुरूप्येणोपश्लोकितः ।

---

१. 'विधेय' क.

सूत्रधारः— [सानुशयं पृष्ठतो निरूप्य] मारिष! रङ्गदेवस्य तव भ्राता रजतदेवः सम्प्राप्तसिद्धार्थभूमिकोऽस्मत्कृतभगवदुपश्लोकनार्थसादृश्यान्महाराजचरितं बहुमन्वानः संहृष्टमुखपुण्डरीक इत एवाभिवर्तते । तदावामप्यनन्तरकरणीयाय सज्जीभवाव । [इति निष्क्रान्तौ ।]

प्रस्तावना

[ततः प्रविशति सिद्धार्थकः ।]

सिद्धार्थकः—

योऽयं वञ्चीशवंशोदधिविहितजनिर्लक्ष्मणोयद्वपुश्रीः
श्रीमान् सर्वज्ञमान्यः कुवलयहितकृत् पूर्णसन्मण्डलाढ्यः ।
राजा स्वच्छः कलावान् विबुधगणगतिः पद्मनाभप्रसादात्
तस्य श्रीरामवर्माभिधकपटविधोर्दुर्लभं किं जगत्याम् ॥ १९ ॥

[प्रविश्य पटाक्षेपेण द्वितीयः पुरुषः सिद्धार्थकं प्रशस्य]

कथमन्यथा,

हिमगिरितटीप्रत्यग्भागस्थिता क्व नु सिन्धुभूः
क्व च पुनरियं सेतोः प्रान्तस्थिता बत वञ्चिभूः ।
अपि तदुभयीनेत्रोरन्योन्यसख्यमहार्घभूः
प्रग्रहणमुखात् तत्कन्यायाः क्व वञ्चिकुले स्थितिः ॥ २० ॥

सिद्धार्थकः— [निरूप्य सहर्षं] हन्त! मम चिन्तानुरूपमेव राज-

निकटचारी गूढामात्यो द्वितीयमिव हृदयं रामवर्मदेवस्य निक्षेप इव राजरहस्यसर्वस्वस्य कनीयान् भ्राता वसुसेनस्य सेनापतेः प्रज्ञासेनो दैवेन सन्निधापितः। तदेतन्मुखादेव राजकुलवृत्तान्तशेषमवगच्छामि। [विमृश्य] नन्वार्यमुखादेतावदवगतम्,

कन्या सिन्धुपतेर्हि कामजननी कल्याणवेषोज्ज्वला
व्याजैः सिंहळनेतुरन्तिकमियं मात्रा मिथः प्रेषिता।
देवस्याभ्युदयाय साहसशतैर्नीता मयान्तःपुरं
यद्यप्येवमथापि दैन्यमयते चेतस्तु देव्या भिया॥ २१॥

इत्यनभिव्यक्तमर्थमुक्त्वा राजकार्यशतपर्याकुलहृदयतया हठान्निर्गतस्यार्यस्येङ्गितज्ञेन मया अनन्तरमभ्युपेक्षितो वृत्तान्तशेषः। तदिदानीमस्यैवेदृशकार्यप्रधानसचिवस्य मम विशेषतो नीतिकलासतीर्थ्यस्य सकाशात् सुलभावगमोऽयमर्थः। [किञ्चिदिवान्तरं गत्वा] आर्य प्रज्ञासेन!

प्रज्ञासेनः— [साकूतं स्वगतं]

विस्मयस्मेरवक्त्रत्वात् स्फुरमाणाधरत्वतः।
प्रष्टुकाम इवायं मां भ्रातुर्नीतेर्निगमम्॥ २२॥

भवतु, तद्विशेषज्ञेन राजसचिवयोर्हृदयभूतेनापि मया नास्य गूहनीयं किञ्चिदस्ति। [प्रकाशम्] स्फुटं पृच्छ प्रष्टव्यम्। न खलु प्रधानामात्यसोदर्यस्य तव किञ्चिदपि मया गोपनीयमस्ति।

सिद्धार्थकः— [सादरं] तर्हि प्रब्रूहि सिन्धुराजकन्याया प्रवहणारोहणादिवाञ्चिकुलान्तःपुरप्रवेशपर्यन्तं हेतुफलान्वाख्यानपुरस्सरं वृत्तान्तमशेषेण। तथाहि—

श्रेयो ज्ञानं कार्यभारस्य कात्स्न्यात्
तज्ज्ञानं वा निर्वृतिं तन्तनीति ।
किञ्चिज्ज्ञानं तद्विशेषावबोधे
धीरं वापि व्यग्रचित्तं करोति ॥ २३ ॥

पश्य—

न किल मनुते योऽन्यं देहात् स निर्वृणुतेतरां
तदधिकमसौ योऽयं विज्ञः सदात्र निरूढधीः ।
श्रुतिपरिचयादापातोत्थस्सदात्ममतिस्तु य-
स्तदवगतये खिद्यन्नाचार्यमेति विवेकिनम् ॥ २४ ॥

प्रज्ञासेनः— [विहस्य] तर्हि श्रूयतां पद्मनाभदेवस्य प्रसाद-
महिमा ।

आस्थान्यामानयामासुः फलकां काञ्चिदद्भुताम् ।
भृत्याः सिन्धुपतेः सा च अत्रा तव निगूहिता ॥ २५ ॥

सिद्धार्थकः— ततस्ततः ।

प्रज्ञासेनः— तत्र च,

वरानुरूप्यनिर्णीत्यै लिखितां फलकान्तरे ।
त्वद्भ्राता लक्षणैर्मेने कन्यां काममुनं स्वयम् ॥ २६ ॥

ततश्च,

परीक्ष्य लक्षणज्ञानां दैवज्ञानां मुखात् स्वयम् ।
निरचैषीद् विवोढुस्तां सार्वभौमत्वलम्भिकाम् ॥ २७ ॥

असाध्यं यतमानानां न किञ्चिदिति संस्मरन् ।
नयारम्भैर्निगूढैस्तां स्वाम्यर्थे लब्धुमैहत ॥ २८ ॥

सिद्धार्थकः — [सविस्मयं]

स्पृश्यतेऽब्धेस्तलं वापि बाहुभ्यां वा स तीर्यते ।
न त्वार्यनीतिविभवो ज्ञायेतोशनसापि वा ॥ २९ ॥

ततस्ततः ।

प्रज्ञासेनः —

अत्रान्तरे तु तन्मता सिंहळेशसुताय ताम् ।
कामेशदर्शनव्याजात् प्रेषयामास नौकया ॥ ३० ॥

सिद्धार्थकः— हन्त! स्त्रीसाहसानि गिरिकूटनिर्भेदनलब्धलक्षं वज्रमपि निर्भिन्द्युः, किं पुनरीदृशमर्थम् । तथाहि—

स सिन्धुराजस्तनयानुरूप-
कुलीनताधन्यवराभिलाषी ।
नयैर्विवित्सुर्विचिनेति कृत्स्ना-
मिळामियं त्वित्थमिदं चकार ॥ ३१ ॥

ततस्ततः ।

प्रज्ञासेनः – [पुरतोऽवलोक्य ससंभ्रमं] सखे! किं न पश्यसि । [अङ्गुल्या निर्दिश्य]

नीयते नर्मसुहृदा सा धन्या फलकाधुना ।
देवपादान्तिकं यत्र तत्पिता तां व्यलेखयत् ॥ ३२ ॥

अतः सन्निहितेनैवात्र देवेन भवितव्यम् । तदीदृश्याः कथाया नात्रावसरः । तदेवं करोमि । [किञ्चिदिवान्तिकं गत्वा कर्णे एवमिवेति कथयति ।]

सिद्धार्थकः— [सहर्षाश्चर्यं] तदनेन तीर्थेन हिमवत्पार्श्विमानूपवासिनोऽपि भरतवर्षमात्रव्यापिनो हूणराजस्य चिरप्ररूढमपि सख्यं देवेन बहळीभविष्यतीति मन्ये । [सविमर्शं] सर्वथेदृशमर्थमस्मदार्यमुखेनैव सुखागमं योजयतः पद्मनाभदेवस्य देवपादनिर्विशेषमस्मदार्येऽपि प्रसादविशेषः । [उपरि पश्यन्] अयमितो दक्षिणेन चतुश्शालामारोहति प्रासादं पिठरशर्मा गृहीतचित्रफलकः । तदत्रैव देवेनापि भवितव्यम् । अहमपि तत्रैव गच्छामि ।

प्रज्ञासेनः— तर्ह्यहमप्यार्यनिकटं गत्वा चिरनिगूहितायाश्चित्रफलकाया एतन्मुखेन देवपादान्तिकप्रवेशने कारणं प्रष्टुमिच्छामि । [इति निष्क्रान्तः ।]

शुद्धविष्कम्भः ।

[ततः प्रविशति हर्म्यतलोपविष्टः सचिन्तो राजा अवकुण्ठनप्रच्छादितचित्रफलको विदूषकश्च ।]

विदूषकः— [स्वगतं] साहु बुद्धिविहवविन्तासिअदेव्वाआरिअ! बुद्धिसाअर! साहु । जं तुह णीदिपुण्णचंदस्स एकं कळं वि णारुहंदि कामंदईचाणक्कमुहा णीदिकळाआरिआ । होदु । तुह उवदेसाणुरूवं समअं पडिक्खमाणेण मए से दंसणिज्जा चित्तफळआ । जं अज्ज पहादे आरहिअ देवीए सिविणअत्थं जहत्थं भणमाणाए परुसीकिदो दुम्मणाअमाणो चिट्ठइ वअस्सो । अदो एव्व चिरागदं वि मं ण जाणाइ । (साधु बुद्धिविभववित्रासितदेवाचार्य बुद्धिसागर! साधु । यत तव

नीतिपूर्णचन्द्रस्यैकां कलामपि नारोहन्ति कामन्दकीचाणक्यमुखा नीतिकलाचार्याः । भवतु । तवोपदेशानुरूपं समयं प्रतीक्षमाणेन मया अस्य दर्शनीया चित्रफलका । यदद्य प्रभातमारभ्य देव्या स्वप्नार्थं यथार्थं मन्यमानया परुषीकृतो दुर्मनायमानस्तिष्ठति वयस्यः । अत एव चिरागतमपि मां न जानाति ।)

राजा — [दीर्घं निःश्वस्य सनिर्वेदं]

यस्या वचांसि मधुराणि हृदि स्मृतान्य-
-प्यानन्दयन्त्यमृतसंप्लवनादिवाङ्गम् ।
तस्या विपाकविषमाण्यधुना प्रभाते
भिन्दन्ति मां सविषशल्यसुदुस्सहानि ॥ ३३ ॥

विदूषकः— [सप्रमोदं] अणुऊलं किल एदं पत्थुदकज्जसिद्धीए । (अनुकूलं किलैतत् प्रस्तुतकार्यसिद्धयै ।)

राजा— [स्मृतिमभिनीय सविलक्षस्मितं] हन्त! दृढमुपालब्धोऽस्मि निर्व्याजमेव देव्या । तया किलोत्स्वप्नमनार्थयेवोद्बुद्धया एवमभिहितोऽस्मि । [संस्कृतमाश्रित्य]

अध्यक्षं मम वीक्षसे तरलितापाङ्गस्तु यां निस्त्रप-
स्तुभ्यं या शठ! तिष्ठते जलमुचे मत्ता मयूरी यथा ।
यस्यां ते चिरभावितेव परमा मैत्री समुन्मीयते
कस्या सा, [विचिन्त्य]
बत! विस्मरामि तव चोत्सङ्गे मयादर्शि या ॥३४॥

इति ।

विदूषकः— [स्वगतं] अहो सिविणअवुत्तंतस्स वि उत्ताणहिअअविस्संभणीअत्तणं । किंदु ईदिससिविणअदंसणं णिरदिसअस्स अब्भुदअस्स णिदाणं उवादिसंदि णिमित्तविण्णाणविअक्खणा । (अहो

स्वप्नवृत्तान्तस्याप्युत्तानहृदयविस्रम्भणीयत्वम् । किन्त्वीदृशस्वप्नदर्शनं निरतिशयाभ्युदयस्य निदानमुपदिशन्ति निमित्तविज्ञानविचक्षणाः ।)

राजा –

इत्यहेतुपरुषीकृतदेवीप्रश्नविस्मयपयोनिधिमग्नः ।
यावदस्म्यहमनुत्तरभावान्निर्ययौ बहिरसावतिरुष्टा ॥३५॥

विदूषकः— [स्वगतं] अवि अणुणीदा भवे । (अप्यनुनीता भवेत् ।)

राजा— ततश्चाहं पृष्ठतो गत्वा—

नाहं चण्डि! तथाविधस्त्वमधुना यद्यद् वृथा शङ्कसे
दृष्टैवं न मयाद्य कापि न कयाप्येवं समालोकितः ।
इत्यालीजनदत्तहस्तविविधप्रक्रान्तदैन्योक्तिभिः
खिद्यन्तं चरणे पतन्तमपि मां त्यक्त्वैव सा निर्गता ॥३६॥

विदूषकः— [विहस्य स्वगतं] अळीअवुत्तंतेण वि एव्वं परुसीकिदहिअआ इदो वरं भविस्सन्तेण सच्चवुत्तंतेण कीरिसी भविअ कहं वा पीडइस्सदि णं ति ण आणामि । तह वि ताए दिव्वसुंदरीए णिरदिसअसुंदरत्तणाक्खित्तहिअअदाए परमणिव्वुदस्स से हिअअंतरे अवआसं ण ळहेइ । ताए तारिसो चित्तावक्खेवो होदु । परदो वि सुणिस्सं । (अळीकवृत्तान्तेनाप्येवं परुषीकृतहृदया इतः परं भविष्यता सत्यवृत्तान्तेन कीदृशी भूत्वा कथं वा पीडयिष्यत्येनमिति न जानामि । तथापि तस्या दिव्यसुन्दर्या निरतिशयसुन्दरत्वाक्षिप्तहृदयतया परमनिर्वृतस्यास्य हृदयान्तरेऽवकाशं न लभते । तस्यास्तादृशश्चित्तावक्षेपः । भवतु परतोऽपि श्रोष्यामि ।)

राजा—

उत्थाय निर्जनमवेक्ष्य च तं प्रदेश-
माकस्मिकोपनिपतद्विरहाक्षमोऽहम् ।

छित्वान् क्षणान् युगनिभान् खदिराग्निकुण्ड-
विन्यस्तपाद इव हन्त! तदा व्यषीदम् ॥ ३७ ॥

विदूषकः— [स्वगतं] अहो रूढमूळो से पणअरुक्खो सिविण-आवदेसप्पचंडपवणवेओच्चलिओ मूळतळोवसप्पन्तो वड्ढिअप्पणअचळ-णईवेओम्मूळिअबंधणो णिरवसेसवत्तणो कहं कीरिसो भविस्सदित्ति ण आणामि। होदु। परदो वि सुणिस्सं। (अहो रूढमूलोऽस्य प्रणयवृक्षः स्वप्नापदेशप्रचण्डपवनवेगोच्चलितो मूलतलोपसर्पन् वर्धितप्रणयचछलनदीवेगो-न्मूलितबन्धनो निरवशेषवर्तनः कथं कीदृशो भविष्यतीति न जानामि। भवतु। परतोऽपि श्रोष्यामि।)

राजा—

अत्रान्तरे मिहिरबिम्बमवेत्य पूर्व-
भूभृच्छिखामणिमिवोदितमाकुलस्य।
तात्कालिकाह्निकसमग्रनिबद्धबुद्धे-
र्दिष्ट्या लघूकृत इवैष ममाद्य तापः ॥ ३८ ॥

विदूषकः— [सविस्मयं स्वगतं] जं सच्चं अच्चंदग्गथिदा रज्जू तुडिदा होदि त्ति। (यत्सत्यमत्यन्तग्रथिता रज्जुस्त्रुटिता भवतीति।)

राजा— [निःश्वस्य] कथं पिठरशर्मा नाद्य।

विदूषकः— [पुरतो भूत्वा करावुद्यम्य] सुदिणं सुप्पहादं होदु रामवम्मदेवस्स। [चित्रफलकाभ्रंशं रूपयित्वा ससम्भ्रममादातुमिच्छति। राजा फलकां गृह्णाति।] (सुदिनं सुप्रभातं भवतु रामवर्मदेवस्य।)

---

१. 'पुरो भू' क.

विदूषकः — [सचमत्कारं] सुण्णहत्थेण णोवसरणिज्जो राएत्ति इअं तुह उवदा आणीदा । (शून्यहस्तेन नोपसरणीयो राजेति इयं तव उपदा आनीता ।)

राजा — [फलकां निर्वर्ण्य हर्षपारवश्यमभिनयन् सविस्मयं]

किं मज्जामि सुधार्णवे किमु चिदानन्दार्णवे किं पुन-
श्शृङ्गाराद्भुतमेळनैकमधुरे लीये रसैकार्णवे ।
कन्दर्पाद्वयवादहृद्यपरमानन्दार्णवेऽनुत्तरे
लीये वा क्व न चेदहेतुरियती स्याच्चेतसो निर्वृतिः ॥३९॥

अपि च,

स्थूलालोकेऽप्युदञ्चत्पुलककवचितस्विन्नकम्प्राखिलाङ्ग-
श्चेतस्स्वाभाव्यरिङ्खत्सदशविसदृशाशेषवृत्तीर्व्युदस्यन् ।
कुर्वन् किञ्चैकरूपां विरतिविरहितां वृत्तिधारामयत्ना-
दस्यां चक्षुःप्रसारं तिरयति महिमा कोऽपि लावण्यभूम्नः ॥४०॥

[इति निर्निमेषं पश्यन् स्थितः ।]

विदूषकः — [स्वगतं सगर्वं]

समए फळंदि रुक्खा समए बीजाइ वविदाइ ।
णिउणसइवप्पवुत्ता समए णीदी अ बहुफळा होइ ॥४१॥

[प्रकाशं — राजानं प्रति] इअंतो मह बुद्धिसाअरस्स अ तुमं अणुसरिदुं बुद्धिविहवो ।

(समये फलन्ति वृक्षाः समये बीजान्युप्तानि ।
निपुणसचिवप्रवृत्ता समये नीतिश्च बहुफला भवति ।

इयान् मम बुद्धिसागरस्य च त्वामनुसर्तुं बुद्धिविभवः ।)

राजा— [अश्रुतिमभिनीय] मम हि,

शृङ्गारामृतवर्तिकेव नयने सत्कुर्वती कुर्वती
दर्पं दर्पकसौनिकस्य मुनिहृत्पाषाणविद्राविणी ।
नैषा दृष्टचरी न वा श्रुतचरी हन्तेयताप्यायुषा
कैषा कामवधूरिवात्र लिखिता योषा न विज्ञायते ॥४२॥

[इति साद्भुतं पश्यन् सपुलकं]

किरति किमपि स्मेरस्मेरा मयि प्रणयोन्मुखी-
र्विकचविसरन्मल्लीलोला अपाङ्गतरङ्गिणीः ।
चिरपरिचितेवालेख्यस्था स्वयं विशतीव मां
यदियमधुना मन्ये देवीं यथार्थनिदर्शनाम् ॥४३॥

[विमृश्य]

नैतच्छिल्पिनि तर्कयामि करकौशल्यं यदेषा मयि
स्निह्यन्ती विवशेव सत्त्वशिथिलैरङ्गै रहः स्विद्यति ।
देवी सत्यनिदर्शना यदमुयाचख्ये समाधौ यथा
मन्येऽन्यूनमितोऽधिकं च न चिरात् सम्पत्स्यते तन्मयि ॥४४॥

---

१. 'नून' ख.

[साश्चर्यं] अथवा,

अलमियतापि यज्ञनिगतां सकृदक्षिपथं
व्रजति मनोरथैर्मघवतापि च नोल्लिखिता ।
प्रतिकृतिरीदृशी मदनमार्गणमर्म तनो-
र्युवतिशिरोमणेरियमनीदृशरूपभृतः ॥४५॥

[पुनः सवितर्कं]

किं वाकारि मया पुरापि सुकृतं कीदृग्विधं कीदृशं
यज्ञेन्द्रेण कृतं न यक्षपतिना नो वारिराजेन वा ।
यच्चालेख्यमयीयमत्र जनुषि श्यामा समालोक्यते
यद्वालं मम पद्मनाभकृपया किं किं न सम्भाव्यते ॥४६॥

[इति सानुरागं पश्यन् सोन्मादं]

अहमविनतपूर्वो मानिनामग्रयायी
बहु किमिह शपे ते हृच्छयं पृच्छ साक्ष्ये ।
तव दळय सकृद्वा विद्रुमाङ्कूरमुद्रां
सुमुखि शिरसि बध्नाम्यञ्जलिं दीनदीनः ॥४७॥

[इति शिरस्यञ्जलिं बध्नन् क्षणमिव स्थित्वा सविस्मयं] हन्त ! निष्ठुरहृदयै-
वासि । तथाह्यहं,

विधुमुखि ! तव रूपं विश्वसन् विप्रलब्ध-
स्तृषित इव सिळिन्दश्चम्पकस्योन्मुखस्स ।

मज्ज इह नवनीतं सुन्दरीणां वदन्त-
स्त्वसुनियतमविनीता हन्त! सामुद्रिकज्ञाः ॥४८॥

[इति क्षणं विमृश्य सविलक्षस्मितं]

आलेख्यं पुनरालिखत्वपचितः शिल्पी कथं वान्तरान्
भावानुद्गमयेन्मदेकरतितामासूचयेद्वा कथम् ।
तन्मन्येऽतुलबिम्बसौष्ठववशात् सान्निध्यमत्र स्मरः
कुर्वन् यच्छति दर्शनात् सुकृतिनामाशंसितार्थान् स्वयम् ॥४९॥

किञ्च,

विधिरिह न विधाता सत्यमेवं यदि स्यात्
किमिति न परिधावेदन्विमां मूढचेताः ।
किमिति च न निरुन्ध्यादुत्पथादेनमीशः
किमिति न जगदेतद्धातृहीनं पुनः स्यात् ॥५०॥

अपि च,

अस्यास्तु लावण्यसुधासरस्या-
स्तदप्सरोभिस्तुलनां क इच्छेत् ।
स्वच्छे शरत्पार्वणचन्द्रबिम्बे
करीषसाम्यं क इहाभ्युपेयात् ॥५१॥

[विमृश्य]

ईदृश्या भुवि चेत् प्रसक्तिरधुना तिष्ठन्तु हुं स्वर्गिणः
पाताले यदि तन्निवासिभिरधोऽप्युच्चैर्वभूवेतराम् ।

स्वर्गे चेन्ननु वज्रितैव परमो मोक्षो न तत्साधिका
　　सैषा दुष्करशुष्ककर्मविततिः सास्मास्तु साक्षात्कृतिः ॥५२॥

[विमृश्य]

नैवं नैवमियं कुतोऽपि न भवेत्सृष्टेर्विधा त्वीदृशी
　　मन्ये मन्मथशाम्बरी पुनरियं त्रैलोक्यसम्मोहिनी ।
नो चेत्संसृतिमङ्गलाच्च परमो मोक्षः कुतः स्तूयता-
　　मेषा वा श्रुतिमूर्धभिः सुखमयी मिथ्या कुतो निन्द्यताम् ॥

[इति विभावयन् स्थितः ।]

विदूषकः— (आत्मगतं) अहं उण अमच्चसिहामणिणो बुद्धिसाअरस्स णिउणणीदिप्पओअदिढअरप्पच्चएण सच्चभूदं एव्व जाणामि णम् । ण उण तिहुवणसम्मोहणप्पवुत्तवम्महमहाबलणिअमाणसुल्लेहलिहिआ पकिदिरहिदा पदिकिदिमेत्तमईत्ति । [प्रकाशं] इअंतो एव्व मह बुद्धिसाअरस्स अ तुमं अणुसरिदुं बुद्धिविहवो । [इति पुनः पठन् राजानं करेण चालयति ।] (अहं पुनरमात्यशिखामणेर्बुद्धिसागरस्य निपुणनीतिप्रयोगदृढतरप्रत्ययेन सत्यभूतामेव जानाम्येनाम् । न पुनस्त्रिभुवनसम्मोहनप्रवृत्तमन्मथमहाबलनिजमानसोल्लेखलिखिता प्रकृतिरहिता प्रतिकृतिमात्रमयीति । इयानेव मम बुद्धिसागरस्य च त्वामनुसर्तुं बुद्धिविभवः ।)

राजा— [श्रुत्वा सहर्षं] अपि सत्यं बुद्धिसागरस्यायं नीतिविभवः । तर्हि प्रमोदगिरेरधित्यकायां दृढमुपविष्टोऽस्मि । न खल्व-

१. 'हलोणिअमाण' क.　　२. 'रदो' क.

सत्ये फलापर्यवसिते वार्थे तस्य नीतिः पदं निधत्ते । अतोऽत्र मन्त्रि-हितैवास्तौ । [पुनश्चित्रफलकां पश्यन् सप्रत्ययोन्मादं]

हा धिक् कष्टमिदं चिराद् भगवती सा चेत्प्रमाद्यच्छ्रुति-
र्यस्यां प्रत्ययगौरवेण मुनयो निर्वाणलुब्धा हताः ।
किं ब्रूमो यदि बाध्यते हुतवहे शैत्यानुमेव श्रुतौ
पारम्पर्योक्तिरेतोऽनुषङ्गमधुरान्मुक्तेर्भवाद् भूयसी ॥५४॥

[इति विमृशन् सबहुमानं] सर्वथा ईदृशास्मदभ्युदयसाधनव्यग्रमति-रन्वर्थ एव बुद्धिसागरः । [आकाशे लक्ष्यं बद्ध्वा]

अस्मत्कुशलविचिन्तनसमग्रबुद्धौ सति त्वयि प्राज्ञे ।
शिथिलितभुवनभरैरिह निर्वृतचित्तैः प्रभूयतेऽस्माभिः ॥५५॥

अथवा ईदृशत्वादृशसुसचिवसम्पत्तिरपि मम कुलगुरोः पद्मनाभदेवस्य प्रसादमहिमैव । तथाहि—

योगक्षेमधुरन्धरे भगवति श्रीपद्मनाभे गुरौ
विख्यातातुलवञ्चिवंशजनुषां वीर्योर्जितक्ष्माभृताम् ।
ऐन्द्रं वारुणमन्यदप्यपरमं किञ्चाब्जयोनेः पदं
स्वेच्छामात्रविभावनादुपनमेदत्रेति मन्यामहे ॥५६॥

[विदूषकं प्रति] वयस्य ! ईदृशाभ्युदयनिवेदकस्य भवतो न पर्याप्तानीमानि । तथापि गृहाण । [इत्याभरणान्युत्तार्य प्रयच्छति ।]

विदूषकः— [गृहीत्वा सोन्मादं] वड्ढदु भवं । एव्वमेव्व दिणे

दिणे कळ्ळाणनिवेदइत्तओ इदो वि अधिअदरं संभावणाभाई भविस्सं। [इत्याभरणैरात्मानं मण्डयन् सचापलं] वअस्स खणमेत्तं मं विसज्जिअ गण्हेहि पुणो। जाव ईरिसं अत्ताणं बह्मणिए दंसिअ आअमिस्सं [इत्युत्थातुमिच्छति।] (वर्धतां भवान्। एवमेव दिने दिने कल्याणनिवेदयितृक इतोऽप्यधिकतरं सम्भावनाभागी भविष्यामि। वयस्य! क्षणमात्रं मां विसृज्य गृहाण पुनः। यावदीदृशमात्मानं ब्राह्मण्यै दर्शयित्वागमिष्यामि।)

राजा— भवतु चपल, गमिष्यसि परतोऽपि। तदा ईदृशमेव द्रक्ष्यति त्वां ब्राह्मणी। कथय कथय,

केयं धन्या कस्य कन्या त्वदन्यां
मान्याशेषैः स्वोपमानान्यशून्या।
यूनां दृष्टेः कल्पवन्या वदान्या
धन्ये कस्मिन् भावविन्यासमेति ॥५७॥

विदूषकः— [आत्मगतं] णं अमच्चस्स अण्णाणुरूवं मए ठादव्वं कज्जसिद्धीए। होदु। एव्वं भणिस्सं। (प्रकाशं) इमं फळअं मह हत्थे णिक्खिविअ तुवरमाणमाणसेण साणुणअं मह कण्णमूळे एव्वं कहिअं अमच्चवुसहेण। जह— इअं जस्स महिसी होदि तस्स पुरुसुत्तमस्स अहिळसिदसिद्धी सव्वसोमत्तणं अ तक्खणं संपज्जइ त्ति सामुद्दिअळक्खण-विअक्खणदेव्वण्णमुहादो अवअमिअ खोणिअळवम्महस्स महाराअस्स एव्व जोग्गेत्ति गण्हिअ देण देणोबाअविसेसेण कहं वि इमं पदेसं आणीदा। ताए एसा पडिकिदी महाराअदंसणणिमित्तं चिररक्खिआ समए दंसणिज्जेत्ति। ता तुमं दाणिं देवीए सिविणअवुत्तंतदुम्मणाअमाणस्स देवस्स हत्थं पावेहि त्ति। एत्तिअं अहं जाणामि। अण्णं अ इअं फळआ

देवीए दंसणपहादो सव्वहा रक्खणिज्जत्ति पुणो पुणो साअरं उत्तवन्तो। (नन्वमात्यस्याज्ञानुरूपं मया स्थातव्यं कार्यसिद्ध्यै। भवतु। एवं भणिष्यामि : इमं फलकं मम हस्ते निक्षिप्य त्वरमाणमानसेन सानुनयं मम कर्णमूले एवं कथितममात्यवृषभेण। यथा– इयं यस्य महिषी भवति तस्य पुरुषोत्तमस्य अभिलषितासिद्धिः सार्वभौमत्वं च तत्क्षणं सम्पद्यत इति सामुद्रिकलक्षणविचक्षणदैवज्ञमुखादवगम्य क्षोणितलमन्मथस्य महाराजस्यैव योग्येति गृहीत्वा तेन तेनोपायविशेषेण कथमपीमं प्रदेशमानीता। तस्या एषा प्रतिकृतिर्महाराजदर्शननिमित्तं चिररक्षिता समये दर्शनीयेति। तत् त्वमिदानीं देव्याः स्वप्नवृत्तान्तदुर्मनायमानस्य देवस्य हस्तं प्रापयेति। एतावदहं जानामि। अन्यच्च इयं फलका देव्या दर्शनपथात् सर्वथा रक्षणीयेति पुनः पुनः सादरमुक्तवान्।)

[ततः प्रविशति सखीद्वितीया विनीतवेषा देवी।]

देवी— सहि कणअमेहले! सो अणत्थसिविणअत्थो हिअअसल्लं भविअ सच्चत्थो विअ दुम्मणावेइ अत्ताणं पवादकदलिं विअ पभंजणवेओ उक्कंपावेइ तणुलदं अ। (सखि कनकमेखले! स अनर्थस्वप्नार्थो हृदयशल्यं भूत्वा सत्यार्थ इव दुर्मनायते आत्मानं प्रवातकदलीमिव प्रभञ्जनवेगः उत्कम्पयति तनुलतां च।)

कनकमेखला— णं भणामि विभावेहि तुमं एव्व। जं गुरुवारचउद्दसीणिसित्थम्मि पहरजुअलपेरन्तं तुए कीळिअसअणाआरे पसुत्तस्स महाराअस्स पासादग्गम्मि मज्झंदिणसमए प्रवङ्गमा(णदाळिणा)ए तुए पच्चक्खीकिदस्स तारिससुंदरीसमाअसप्पआरस्स का संगई। णं अज्ज सुउत्तारपोण्णमासी। सणिअं विभावेहि। (ननु भणामि विभावय

त्वमेव । यद् गुरुवारचतुर्दशीनिशीथे प्रहरयुगळपर्यन्तं त्वया क्रीडाशयनागारे प्रसुप्तस्य महाराजस्य प्रासादाग्रे मध्यन्दिनसमये प्रवर्तमानया त्वया प्रत्यक्षीकृतस्य तादृशसुन्दरीसमागमप्रकारस्य का सङ्गतिः । नन्वद्य भृगुवारपौर्णमासी । शनैर्विभावय ।)

देवी— [सखेदव्रीळं] अदो एव्व तुह वअणप्पच्चएण तह चळणपडिदो वि तदा उवेक्खिओ अवराहलेसरहिदो वि अय्यउत्तो त्ति दाणिं सुमरिअ सुमरिअ उत्तम्ममाणमाणसाए ळज्जावणदमुहीए पसादणत्थं तस्स तुए सह गमीअदि । किं एत्थ विभावणिज्जं । ता आदेसेहि पासादमग्गं । (अत एव तव वचनप्रत्ययेन तथा चरणपतितोऽपि तदोपेक्षितः अपराधलेशरहितोऽपि आर्यपुत्र इति इदानीं स्मृत्वा स्मृत्वा उत्ताम्यमानमानसया लज्जावनतमुख्या प्रसादनार्थं तस्य त्वया सह गम्यते । किमत्र विभावनीयम् । तदादेशय प्रासादमार्गम् ।)

कनकमेखला— [सहर्षं] इदो इदो एदु होदी दक्खिणेण चउस्साळं । [इति कतिचित्पदानि गत्वा] देवि! इदो सणिअं आरोहदु होदी णिम्मळप्फळिअसिळाजाळकप्पिदेण सोपाणमग्गेण [इत्युभे आरोहणं नाटयतः ।] (इत इत एतु भवती दक्षिणेन चतुःशालम् । देवि! इतः शनैरारोहतु भवती निर्मलस्फटिकशिलाजालकल्पितेन सोपानमार्गेण ।)

देवी— [दृष्ट्वा] सहि किं एत्थ पासादमंडविआए दक्खिणं दुवारं संघडिअकवाडं विअ दीसइ । ता पुव्वदुवारमग्गेणव्व पविसिअ मह विरहपज्जुसुअं अज्जउत्तं अचिंदिदोवणदेण सअं गाढाळिंगणेण णिव्वुदमाणसं करिअ से अवरद्धं अत्ताणं पमज्जिदुं इच्छामि त्ति । [इति कतिचित् पदानि गत्वा श्रुतिमभिनीय] हळा इह मंडविआगब्भम्मि सळळावो विअ । [पुनः श्रुत्वा] अय्यउत्तो एव्व पिठरसम्भमेण पिअवअ-

स्सेण मह दुव्विणीदत्तणं किं वि उवाळंभमाणो विअ दीसइ । ता किं मंतअन्तित्ति खणमेत्तं सुणिअ तह करम्ह । [इति निभृते तिष्ठतः ।] (सखि ! किमत्र प्रासादाग्रमण्डपिकाया दक्षिणं द्वारं सङ्कुटितकवाटमिव दृश्यते । तत् पूर्वद्वारमार्गेणैव प्रविश्य मम विरहपर्युत्सुकमार्यपुत्रमचिन्तितोपनतेन स्वयं गाढालिङ्गनेन निर्वृतमानसं कृत्वा अस्यापराद्धमात्मानं प्रमार्ष्टुमिच्छामि । हला इह मण्डपिकागर्भे सल्लाप इव । आर्यपुत्र एव पिठरशर्मणा प्रियवयस्येन मम दुर्विनीतत्वं किमप्युपालभमान इव दृश्यते । तत् किं मन्त्रयत इति क्षणमात्रं श्रुत्वा तथा कुर्वः ।)

राजा— [सवितर्कं] कथं कथमपीमं देशमानीतेति सुदूरदेशप्रभवत्वं बोधितमस्याः । इमं देशमिति च न पर्याप्तं हृदयस्य । क्वेदानीं भवेत् । क्व वा रज्येत् । [विचिन्त्य] नह्यन्यासक्ताया विदूरस्थिताया ईदृशीमालेख्यप्रतिकृतिं बुद्धिसागरो मह्यं प्रेषयेत् ।

[देवी साशङ्कं सखीमुखमवेक्षते ।]

कनकमेखला— णहि उण्णीअदि गंभीरत्था एसा वक्कपरिवाडी । (न ह्युन्नीयते गम्भीरस्था एषा वक्रपरिपाटी ।)

देवी— किं एत्थ समुण्णीअदि । जाए काए विदूरदेसप्पहवाए दाणिं इमं देसं उवणीदाए अय्यउत्ताक्खित्तहिअआए इत्थिआए बुद्धिसाअरप्पवुत्तं चित्तफळअं ओळोअन्तो चिट्ठइ अय्यवुत्तो । अदो एव्व कवाडघडणं जुज्जइ । (किमत्र समुन्नीयते । यस्याः कस्या विदूरदेशप्रभवाया इदानीमिमं देशमुपनीताया आर्यपुत्राक्षिप्तहृदयायाः स्त्रिया बुद्धिसागरप्रवृत्तं चित्रफलकमवलोकयंस्तिष्ठत्यार्यपुत्रः । अत एव कवाटघटनं युज्यते ।)

कनकमेखला — (स्वगतं सविस्मयं) दुल्लंघा देव्वगई । जं पुरदो

एव्व सिविणदंसणवाउळीकिदहिअआ मए कहं कहं वि पकिदिं पाविदा। दाणिं उण इमं अत्थं पच्चक्खदो सुणिअ ण आणे कीरिसी भविस्सदित्ति। होदु। एव्वं भणिस्सं। [प्रकाशं] देवि! तुए पहादसमअ-दिट्ठसिविणअत्थो ण अजहत्थो भविस्सदि। किं एत्थ कादव्वं भट्टिणा। मरिसेदु होदी। (दुर्लङ्घ्या दैवगतिः। यत्पुरत एव स्वप्नदर्शनव्याकुली-कृतहृदया मया कथंकथमपि प्रकृतिं प्रापिता। इदानीं पुनरिममर्थं प्रत्यक्षतः श्रुत्वा न जाने कीदृशी भविष्यतीति। भवतु। एवं भणिष्यामि। देवि! त्वया प्रभातसमयदृष्टस्वप्नार्थो नायथार्थो भविष्यति। किमत्र कर्तव्यं भर्त्रा। मर्षयतु भवती।)

विदूषकः— [सस्मितं] ता तुह सचिवप्पओअप्पच्चएण उवट्ठं-भेहि अत्ताणं। (तत् तव सचिवप्रयोगप्रत्ययेनोपष्टम्भयात्मानम्।)

राजा— [फलकोदरं विभावयन्]

तृप्यामि नैव सुचिरेण विलोकमानो-
ऽप्यालेख्यगामनुपमाद्भुतदीप्त्युदाराम्।
एनामितः कृतपदामिव यौवनेन
स्निग्धावलोकनवशीकृतजीवलोकाम् ॥५८॥

देवी— [सपरितापं] हळा! किं एत्थ कादव्वं। अहवा एव्वं अण्णसंकंतहिअओ परमणिव्वुदो अज्जउत्तो पच्चूहभूदाए मए ण सिठिळइदव्वो। ता जहगअं गमिस्सं। [इति प्रस्थातुमिच्छति।] (हला! किमत्र कर्तव्यम्। अथवा एवमन्यसंक्रान्तहृदयः परमनिर्वृत आर्यपुत्रः प्रत्यूह-भूतया मया न शिथिलयितव्यः। तद् यथागतं गमिष्यामि।)

कनकमेखला— [स्वगतं] ईरिसे संकडत्थे भट्टिणो अणुऊळेण

पदुमणाहदेवेण अअं मग्गो उल्लिहिदो । [प्रकाशं] जं देवीए रुच्चइ । (ईदृशे सङ्कटार्थे भर्तुरनुकूलेन पद्मनाभदेवेनायं मार्ग उल्लिखितः । यद् देव्यै रोचते ।)

विदूषकः— जहत्थभूदं वि तं पच्चक्खदो अणुभविअ परमणिव्वुदो होहि । किंदु वसुमदीदेवी विअ इअं ण कोवणसीलेत्ति लक्खीअदि । (यथार्थभूतामपि तां प्रत्यक्षत अनुभूय परमनिर्वृतो भव । किन्तु वसुमतीदेवीवेयं न कोपनशीलेति लक्ष्यते ।)

देवी— [सास्रं] हला! सुदं कुडिलमदिणो बह्मणहदअस्स वअणम् । ता इदो खणं वि एत्थ ण चिट्ठिस्सं । [इति जिगमिषति ।] (हला श्रुतं कुटिलमतेर्ब्राह्मणहतकस्य वचनम् । तदितः क्षणमप्यत्र न स्थास्यामि ।)

राजा— किमुच्यते ।

चान्द्रे बिम्बे सङ्गतं चेद्विषं स्यात्
स्याच्चेत्तापः किञ्च कर्पूरवाप्याम् ।
सद्यो घृष्टे चन्दने चेद्धुताशः
कोपोऽप्यस्यां सम्भवेत् सारसाक्ष्याम् ॥५९॥

देवी— हला! उच्चिट्ठ । सुदं सोदव्वं । इदो वरं ण पारेमि वअणामिसतिक्खणविसं पादुं । [इति ससंरम्भं कतिचित् पदानि परिक्रम्य सख्या सह निष्क्रान्ता ।] (हला! उत्तिष्ठ । श्रुतं श्रोतव्यम् । इतः परं न पारयामि वचनमिषतीक्ष्णविषं पातुम् ।)

विदूषकः— [श्रुत्वा] को एत्थ णेऊरसद्दो विअ । [इति ससंरम्भं कवाटमुद्घाट्य दृष्ट्वा सावेगं] हद्धि हद्धि! कूपखणणे भूदोग्गमो जादो ।

जं एसा कणअमेहळादुदीआ वसुमदीदेवी इदो आअमिअ सव्वं विअ अम्हाणं वुत्तंतं सोदूण संभंतहिअआ खळिअपदविण्णासं अवक्कामइ । (कोऽत्र नूपुरशब्द इव । हा धिक् हा धिक् । कूपखनने भूतोद्गमो जातः । यदेषा कनकमेखलाद्वितीया वसुमतीदेवी इत आगम्य सर्वमप्यावयोर्वृत्तान्तं श्रुत्वा सम्भ्रान्तहृदया स्खलितपदविन्यासमपक्रामति ।)

राजा— [सोद्वेगमुत्थाय दृष्ट्वा सविषादं विचिन्त्य] नेदमुपपन्नम् । हन्त! रुग्णचक्षुष इव कण्टकवेधः । यतः,

स्वप्नवृत्तेऽपि संरब्धकरणा मामभर्त्सयत् ।
येयं सत्यार्थविज्ञाना न जाने यत्करिष्यति ॥६०॥

अथवा,

न साहसं विना लोके भवेदभ्युदयी पुमान् ।
अपलापोऽत्र शरणमीदृशां नः क्षमापणे ॥६१॥

विदूषकः— [सश्लाघं] साहु जुत्तिजुत्तं आळोचिअं । मए वि एव्वं एव्व आळोचिअं आसि । [ऊर्ध्वमवलोक्य सावेगं] हद्धि हद्धि दुव्वावारव्ववसिदमदिणो तुह संगमेण पुव्वं एव्व वुभुक्खिअस्स मह अदिक्कंदो भोअणसमओ । थज्झइ मे उदरब्भंतरं । पसीददु वअस्सो । [इति पादयोः पतितुमिच्छति ।] (साधु युक्तियुक्तमालोचितम् । मयाप्येवमेवालोचितमासीत् । हा धिक् हा धिक् । दुर्व्यापारव्यवसितमतेस्तव सङ्गमेन पूर्वमेव वुभुक्षितस्य समातिक्रान्तो भोजनसमयः । दहति म उदराभ्यन्तरम् । प्रसीदतु वयस्यः ।)

राजा— (निवार्य) मूर्ख! जातिब्राह्मणः किल भवान् । मैवं कार्षीः । इतः प्रस्थिता एवाह्निकशेषाय वयम् ।

[नेपथ्ये वैतालिकौ पठतः ।]

सुखाय भवतु देवस्य माध्याह्निकी सन्ध्या ।

एकः—

त्रय्यात्मा भगवान् नृदेव! भवतस्तीव्रप्रतापोष्मणो
वित्रस्तः किल विष्वगाततनोर्व्योमाचलाग्रं रविः ।
अप्यारुण्यमतोऽपि तद् भृशपरिक्लिष्टोऽद्य दुर्दर्शतां
प्राप्येव द्विगुणोष्मभिस्त्रिजगतीमुस्रैर्भृशं बाधते ॥६२॥

द्वितीयः —

भ्रमन्ति परितोऽवनिं मरुमरीचिसम्मोहिता-
स्तृषा भृशपरिप्लुता रविमयूखतप्ता मृगाः ।
दुरुत्तरतमोवशा विततदुःखजालाकुला
यथैव सुखलिप्सया कुविषयेषु संसारिणः ॥६३॥

राजा— [आकर्ण्य सहर्षं] अनयोश्छद्मवैतालिकयोर्विद्वत्कविमूर्धन्ययोरुचितपारितोषिकदानाय त्वदुदरपिठरपरिपूरणाय चाभ्यन्तरमेव प्रविशावः ।

[इति परिक्रम्य निष्क्रान्ताः सर्वे ।]

प्रथमोऽङ्कः ।

द्वितीयोऽङ्कः

[नेपथ्ये]

माहवि माहवि! कुदो भमीअदि । णं तुमं अण्णेसामि ।

(माधवि माधवि कुतो भ्राम्यते । ननु त्वामन्विष्यामि ।)

[ततः प्रविशति माधवी नामोद्यानपालिका ।]

माधवी— [स्वगतं] अंहो देवीए आसण्णचारिणी चंपअवल्ली णाम चेडी कज्जवसेण तुवरमाणहिअआ मं पिट्ठदोणुपिट्ठं आमंदेइ । अहं उण भट्टिणो अण्णाणुरूवं अअं रुक्खो कुसुमिओ इअं ळदा पळ्ळविदेत्ति साअरं पेक्खंदी वि अअं उण देवीए परिग्गहो पिआळरुक्खो ण कुसुमिदो णावि पळ्ळविदो देवी कहं वा मण्णिस्सदि मं त्ति वाउळदाए अक्खित्तहिअआ ण सुणोमि से आमंतिदं । [प्रकाशं सप्रश्रयं] हंजे अण्णक्खित्तहिअअदाए तुह वि ण सुणोमि एव्वं आमंतिदं ता मरिसेदु होदी। (अम्हो देव्या आसन्नचारिणी चम्पकवल्ली नाम चेटी कार्यवशेन त्वरमाणहृदया मां पृष्ठतोऽनुपृष्ठमामन्त्रयति । अहं पुनर्भर्तुराज्ञानुरूपमयं वृक्षः कुसुमितः इयं लता पल्लवितेति सादरं प्रेक्षन्ती अपि अयं पुनर्देव्याः परिग्रहः प्रियाळवृक्षो न कुसुमितो नापि पल्लवितः देवी कथं वा मंस्यते मामिति व्याकुलतया आक्षिप्तहृदया न शृणोम्यस्या आमन्त्रितम् । हञ्जे! अन्याक्षिप्तहृदयतया तवापि न शृणोम्येवमामन्त्रितम् । तन्मर्षयतु भवती ।)

---

1. ‘ अक्खित्त ’ ख.

[ततः प्रविशति चम्पकवल्ली नाम चेटी]

चम्पकवल्ली— [सस्मितं] सहि तुरेहि सोहणाइ कुसुमाइ महुराइ फळाइ अ उवहरिदुं देवीए। (सखि त्वरस्व शोभनानि कुसुमानि मधुराणि फलानि चोपहर्तुं देव्यै।)

माधवी— [ससंभ्रमं] इदो सज्जाइ। [इति फलकुसुमान्युपहरन्ती साकूतं] कहेहि कहेहि किं अणुणीदा भट्टिणी तह दुरुत्तरदोसाणुबंधिणा भट्टिणा। (इतः सज्जानि। कथय किमनुनीता भट्टिनी तथा दुरुत्तरदोषानुबन्धिना भर्त्रा।)

चम्पकवल्ली— [सस्मितं] सव्वं वि तह तह अवळपंतेण भट्टिणा अणुणीदा पसण्णा अ। अदो एव्व माहवसमअप्पवट्टमाणवम्महपूआववदेसेण आराहणिज्जो भट्टेत्ति अअं संरंभो। (सर्वमपि तथा तथापलपता भर्त्रानुनीता प्रसन्ना च। अत एव माधवसमयप्रवर्तमानमन्मथपूजाव्यपदेशेनाराधनीयो भर्तेत्ययं संरम्भः।)

माधवी— अहो तारिसो भट्टिणो अवराहो ईरिसो भट्टिणीए अणुणओत्ति अच्चरिअं अच्चरिअं। (अहो तादृशो भर्तुरपराध ईदृशो भट्टिन्या अनुनय इत्याश्चर्यमाश्चर्यम्।)

चम्पकवल्ली— ता झत्ति इमं सव्वं णेदुं तुए वि आअंतव्वं। (तद् झटिति इदं सर्वमानेतुं त्वयाप्यागन्तव्यम्।)

माधवी— अवस्सं देवीए पिआळवुत्तंतणिवेदणत्थं से उचिअदोहळसंपादणत्थं अ मए वि आअंतव्वं। ता तुरिअं गच्छह्म। [इत्युभे निष्क्रान्ते।] (अवश्यं देव्यै प्रियाळवृत्तान्तनिवेदनार्थम् अस्य उचितदोहळसम्पादनार्थं च मयाप्यागन्तव्यम्। तत् त्वरितं गच्छाव।)

चूलिका

[ततः प्रविशति स्पृहणीयवेषोज्ज्वला वसुलक्ष्मीरुपात्तवीणा सखी च ।]

सखी— भट्टिदारिए जाए तुह णिरवेक्खणिरुवमगीईसमारंभमेत्तेणव्व सुक्खरुक्खो वि णिरंदरसमुग्गअपळ्ळवो होदि । किं उण जस्स पिआळस्स इत्थिआणं गीईसामण्णेणव्व अआळदोहळं होदि त्ति ळोअवादो । एव्वं ठिदे एसा विवंचिआ केवळं ळज्जावेदुं एव्व देवीए समप्पिदा । (भर्तृदारिके यस्यास्तव निरपेक्षनिरुपमगीतिसमारम्भमात्रेणैव शुष्कवृक्षोऽपि निरन्तरसमुद्गतपल्लवो भवति । किं पुनर्यस्य प्रियालस्य स्त्रीणां गीतिसामान्येनैव अकालदोहलं भवतीति लोकवादः । एवं स्थिते एषा विपञ्चिका केवलं लज्जापयितुमेव देव्या समर्पिता ।)

वसुलक्ष्मीः— [सावहेलं] हळा चंदळेहे ! चिट्ठदु एदं । अवि सच्चं अज्जूए समक्खं णाणादेसोवणीदाणं तत्तण्णरिंदकुमाराळेक्खमहुरचित्तफळआणं मज्झम्मि मए पव्वूसिआए विम्हउप्फुळ्ळवअणकमळाए सिणिद्धमहुरं ओळोइदो त्ति परिहाससीळाए तुए जा चित्तफळआ ताए समप्पिदा, जत्थ अ कणअसंगभासुरतणू कण्णंतविस्संतकमळोदरणअणो णिम्मळपोण्णिमाचंदबंधुवअणपुंडरीओ अदिसुउमारावअवविण्णासो सव्वभोमत्तणजोग्गाकिदिविसेसो मुत्तो विअ वम्महो खत्तिअकुमारो आळिहिदो, जं उद्दिसिअ बद्धभावं मं पेक्खिअ मह अज्जू एसो सिंहळाहिवकुमाळो त्ति मादुळसंबंधळोळुवदाए कुळदेव्वदंसणव्ववदेसंतरेण पवहणमुहेण वंचिदवदी, तुह अणुऊळभाअहअत्तणेण तस्स एव्व हत्थं पाविदासि त्ति । (हला चन्द्रलेखे ! तिष्ठत्वेतत् । अपि सत्यं तथा आर्यायाः समक्षं नानादेशोपनीतानां तत्तन्नरेन्द्रकुमारालेख्यमधुरचित्रफलकानां मध्ये मया पर्युत्सुकया विस्मयोत्फुल्लवदनकमलया स्निग्धमधुरमालोकित इति परिहासशीलया त्वया या चित्रफलका तस्यै समर्पिता, यत्र

च कनकभङ्गभासुरतनुः कर्णान्तविश्रान्तकमलोदरनयनो निर्मलपूर्णिमाचन्द्रबन्धुवदनपुण्डरीकोऽतिसुकुमारावयवविन्यासः सार्वभौमत्वयोग्याकृतिविशेषो मूर्त इव मन्मथः क्षत्रियकुमार आलिखितः, यमुद्दिश्य बद्धभावां मां प्रेक्ष्य ममार्या एष सिंहळाधिपकुमार इति मातुलसंबन्धलोलुपतया कुलदैवदर्शनव्यपदेशान्तरेण प्रवहणमुखेन वञ्चितवती, तवानुकूलभागधेयत्वेन तस्यैव हस्तं प्रापितासि इति ।)

चन्द्रलेखा— ण हु अण्णहाभासिणी अणुहूदपुव्वा चंदलेहा । सच्चं सो एव्व वंचिउळचंदो रामवम्मदेव्वो तुह अणुऊलभाअधेअप्पेरिदेणव्व सुहंउणा वाउणा पाविदो । (न खल्वन्यथाभाषिणी अनुभूतपूर्वा चन्द्रलेखा । सत्यं स एव वञ्चिकुलचन्द्रो रामवर्मदेवस्तवानुकूलभागधेयप्रेरितेनैव शुभंयुना वायुना प्रापितः ।)

वसुलक्ष्मीः— [सविलक्षस्मितं] संबंधळोलुवाए अज्जूए मह पाणा तादो अ उपेक्खिदा । तादस्स उण मह चित्ताणुरूवं होदव्वं त्ति मणोरहो । [विचिन्त्य] चिट्ठदु एदं । पियाळदोहळक्काळणादो आदेसेहि उपवणमग्गं । (संबन्धलोलुपया आर्यया मम प्राणास्तातश्चोपेक्षिताः । तातस्य पुनर्मम चित्तानुरूपं भवितव्यमिति मनोरथः । तिष्ठत्वेतत् । प्रियालदोहलकारणादादेशयोपवनमार्गम् ।)

चन्द्रलेखा— इदो इदो सहि ! । [इत्युभे उपवनप्रवेशं नाटयतः ।] (इत इतः सखि ।)

वसुलक्ष्मीः— [वामाक्षिस्पन्दनं सूचयित्वा सहर्षमात्मगतं]

फुरमाणपक्खसुभअं सुहोदअं झत्ति वामणअणं मे ।
संगदचलिअब्भमरं पदुमं सुज्जोग्गमं विअ कहेइ ॥१॥

[प्रकाशं सप्रत्याशं] हळा चंदलेहे! देवी वसंतपूआसमअप्पवड्ढमाणमणसिअ-

पूआववदेसेण केण वि काळणेण अहिक्खितं महाराअं क्खमावेदुं एदस्सिं उववणसिहामंडणाअमाणबाळबउळवेदिआइं आराहइस्सदि त्ति सुवअणाए कहिअं त्ति अवि सच्चं एदं वि।

(स्फुरत्पक्ष्मसुभगं शुभोदयं झटिति वामनयनं मे।
सङ्गतचलितभ्रमरं पद्मं सूर्योद्गममिव कथयति॥

हला चन्द्रलेखे! देवी वसन्तपूजासमयप्रवर्तमानमनसिजपूजाव्यपदेशेन केनापि कारणेनाधिक्षिप्तं महाराजं क्षमापयितुमेतस्मिन्नुपवनशिखामण्डनायमानबालबकुळवेदिकायामाराधयिष्यतीति सुवदनया कथितमिति अपि सत्यमेतदपि।)

चन्द्रलेखा— किं अण्णहावअणं अणुभूदपुव्वं चंदळेहाए। (किमन्यथावचनमनुभूतपूर्वं चन्द्रलेखायाः।)

वसुलक्ष्मीः— ता कहेहि कहिं सो रुक्खो। (तत्कथय कुत्र स वृक्षः।)

चन्द्रलेखा— [सस्मितं] एसो चंपअवाडिअं उत्तरेण वासंदिआळदामंडवस्स पुरोभाए समग्गकुसुमुग्गमघुमुघुमाइददसदिसावआसणिरंतरभंभम्ममाणभमरउळगीअमाणणिअविरुदकोळाहळो. मंदमारुअंदोळिअखुद्दसाहाविवरणिरंतरणिवसन्तकुसुमभरप्पच्चादिअवेदिआविसेसरमणिज्जो सण्णिहिदट्ठिअमाअंदवाडिआसिहरपळ्ळवचव्वणणिव्वुददरकळकंठकंठकाहळीणादमहुरमहुरपेरंतसण्णिवेसो देवीए वसंतपूआरुहत्तणं संपादिअ पडिक्खमाणो व्विअ वम्महमहाराअसिविराअमाणाक्किदी बालबउळो पेक्खणीअदरो दीसइ जं होदी गवेसेइ। (एष चम्पकवाटिकामुत्तरेण वासन्तिकालतामण्डपस्य पुरोभागे समग्रकुसुमोद्गमघुमुघुमायितदशदिशावकाशनिरन्तरबंभ्रम्यमाणभ्रमरकुलगीयमाननिजविरुदकोलाहलो मन्द-

मारुतान्दोलितक्षुद्रशाखाविवरनिरन्तरनिवसत्कुसुमभरप्रच्छादितवेदिकाविशेषरमणीयः सन्निहितस्थितमाकन्दवाटिकाशिखरपल्लवचर्वणनिर्वृतदरकलकण्ठकण्ठकाहळीनादमधुरमधुरपर्यन्तसन्निवेशो देव्या वसन्तपूजारोहत्वं सम्पाद्य प्रतीक्षमाण इव मन्मथमहाराजशिबिरायमाणाकृतिर्बालबकुलः प्रेक्षणीयादरो दृश्यते यं भवती गवेषयति ।)

वसुलक्ष्मीः— [सेर्ष्यं] हुं । णं मए पिआळरुक्खो दोहळकाळणादो कहिं ति विआरिओ । तुए उण अट्ठाणे उवण्णासो किदो । एत्थ किं अह्माणं पओअणं । (हुं । ननु मया प्रियाळवृक्षो दोहळकारणात् कुत्रेति विचारितः । त्वया पुनरस्थाने उपन्यासः कृतः । अत्र किमस्माकं प्रयोजनम् ।)

चन्द्रलेखा— [सस्मितं] एत्थ जं पओअणं तं अग्गदो दंसेमि । होदु । एसो तुह केण वि अणंदरिओ अणुग्गमिअकुसुमपळ्ळवो उग्गमिअकुसुमपळ्ळवेहिं पेरंतरुक्खेहिं ओहसिअमाणो विअ दीसइ पिआळरुक्खो । (अत्र यत् प्रयोजनं तदग्रतो दर्शयामि । भवतु । एष तव केनाप्यनन्तरितोऽनुद्गमितकुसुमपल्लव उद्गमितकुसुमपल्लवैः पर्यन्तवृक्षैरपहस्यमान इव दृश्यते प्रियालवृक्षः ।)

वसुलक्ष्मीः— जइ एव्वं ता तुरिअं देवीए अण्णं णिवट्टिअ जहसमिहिदं करह्म । [इत्युभे प्रियालवेदिकातलमुपसर्पतः ।] (यद्येवं तर्हि त्वरितं देव्या आज्ञां निर्वर्त्य यथासमीहितं कुर्वः ।)

चन्द्रलेखा— एत्थ सविसेसमणहरे वेदिआतळे खणं उपविसिअ विपंचिआए अंकतळं अळंकरिअ सणिअं गाएहि । [इति उभे उपविशतः ।] (अत्र सविशेषमनोहरे वेदिकातले क्षणमुपविश्य विपञ्चिकया अङ्कतलमलङ्कृत्य शनैर्गाय ।)

[ततः प्रविशति कामयमानावस्थो राजा विदूषकश्च ।]

विदूषकः— [स्वगतं] सव्वण्णो सइवचूडामणी । जदो तस्स जहदिस्सं किं चित्तदंसणसमए एव्व देवी देवपूआसमए विअ भल्लूओ उवट्ठिदा । अदो एव्व पमादभीददाए मह हत्थादो गण्हिअ तेण कुह वि णिगूहिदं चित्तफळअं । अदो एव्व उववणदिग्घिआपेरंतट्ठिदस्स मह हत्थादो जळम्मि पब्भट्ठं ति अवळविदो वअस्सो । (सर्वज्ञः सचिवचूडामणिः । यतस्तस्य यथादृष्टं किं चित्रदर्शनसमये एव देवी देवपूजा-समये भल्लूक इवोपस्थिता । अत एव प्रमादभीततया मम हस्ताद् गृहीत्वा तेन कुत्रापि निगूहितं चित्रफलकम् । अत एव उपवनदीर्घिकापर्यन्तस्थितस्य मम हस्ताद् जले प्रभ्रष्टमित्यपलपितो वयस्यः ।)

राजा— [सस्मरणं] भगवन् कुसुमायुध ! ननु विश्वविश्वसनीयेन भवता तस्याश्चित्रफलकायाम्,

मिथ्या प्रदर्श्य मनसाप्यविचिन्त्यरूपां
काञ्चित् तृणीकृतसुधाकरबिम्बवक्त्राम् ।
गन्धर्वराजनगरीमिव निर्वृतं मे
स्वान्तं वृथैव परिदूनयता किमाप्तम् ॥२॥

[विचिन्त्य सबहुमानं] अथवा,

अयावकरसार्जनादरमतूलिकापेक्षण-
क्षताग्रकरकम्पनाकुलितवक्ररेखाक्रमम् ।
व्यलेखि तरुणीमणिर्विरहधूतिसम्पत्तये
त्वयैव करुणावता विततचित्तभित्तौ मम ॥३॥

[सविमर्शं] नैवमपि,

दिशि दिशि चटुलभ्रूस्फारविस्फारिताक्षी
युवहृदयमहेभाबन्धिनी शृङ्खलेव ।
अयुतनियुतमूर्तिर्दृश्यमाना समन्ताद्
विवशयति मनो मे सा हठात् किं करोमि ॥४॥

विदूषकः— भो वअस्स!

णावकिदं णोवकिदं वम्महहदएण तुह ण वा तीए ।
अब्भुदअळा तुह सा सइवे जागत्ति णीदिळदा ॥५॥

(भो वयस्य,

नापकृतं नोपकृतं मन्मथहतकेन तव न वा तया ।
अद्भुतमाता तव सा सचिवे जागर्ति नीतिलता ॥)

[प्रविश्य पटाक्षेपेण प्रतीहारी कराञ्चलपिहितमुखी]

प्रतीहारी— महाराअ कज्जवसेण तुवरमाणहिअओ बुद्धिसाअरो विण्णवेदि । उत्तरदेसाहिवाणं खुद्दणरिंदाणं दुव्विणीदत्तणावणोदणणिमित्तं देवेण पुडमणिण्णीदं दंडचक्कं वसुसेणाहिट्ठिअं दाणिं एव्व सुमुहुत्तम्मि पत्थावीअदि । णं सोदूण देव्वपाआ पमाणंति । (महाराज! कार्यवशेन त्वरमाणहृदयो बुद्धिसागरो विज्ञापयति— उत्तरदेशाधिपानां क्षुद्रनरेन्द्राणां दुर्विनीतत्वापनोदननिमित्तं देवेन प्रथमनिर्णीतं दण्डचक्रं वसुसेनाधिष्ठितमिदानीमेव सुमुहूर्ते प्रस्थाप्यते । ननु श्रुत्वा देवपादाः प्रमाणमिति ।)

राजा— [आत्मगतं] अहो बुद्धिसागरनीतेः सार्वपथीनता । अयं हि,

यदाध्यं प्रीयते यत्र तन्मयस्तर्हि दृश्यते ।
प्रतिभानां विलासेन विरुद्धेष्वपि कर्मसु ॥ ६ ॥

[प्रकाशं] अनुष्ठीयतामभिमतमर्थसिद्ध्यै ।

प्रतीहारी — जं देवो आणवेदि । [इति निष्क्रान्ता] (यद् देव आज्ञापयति ।)

राजा — [ससरणं विदूषकं हस्ते गृहीत्वा] अपि सत्यं कनकमेखला बुद्धिसागरनीतिसारसर्वस्वमिति । [विमृश्य] अत एव प्रासादवृत्तान्तापलापमुखरमपि मां प्रशस्य तथा हृदयनिरूढमन्युभारामपि देवीं विनयमधुरैर्वचोभिः प्रकृतिस्थां विधाय माधवसपर्याव्याजेन पतिप्रसादं सम्पादनीयमिति इयतो बहुमानस्य पात्रतां मम सम्पादितवती । भवतु द्रक्ष्यामः परस्तादपि । [सौत्सुक्यं]

क्व तर्हि रमणी वसेत् सचिवनीतिसंरक्षिता
लतेव मृतजीविनी विबुधरक्षिता भूधरे ।

[सस्पृहं]

कदा तु पुनरेतया मम समागमो निश्चितः
प्रमादलववर्जितः कथयते न मेधाविना ॥ ७ ॥

[दक्षिणाक्षिस्पन्दं सूचयित्वा साश्वासं] हन्त बहुविधदुरन्तचिन्ताव्यग्रचित्तमपि मां समाश्वासयति दक्षिणाक्षिस्पन्देन भगवान् भूतभावनः पद्मनाभदेवः ।

विदूषकः — ण खु एसो सुविण्णाणो बुद्धिसाअरणीइपदविण्णासो । तहवि एदं णिण्णीअ दिअंदरेण सुहोदको संपज्जइत्ति । (न

खल्वेष सुविज्ञानो बुद्धिसागरनीतिपदविन्यासः। तथाप्येतन्निर्णीय दिगन्तरेण शुभोदर्कः सम्पद्यत इति।)

राजा— [पुरोऽवलोक्य] क्व नु खलु प्रस्थितोऽस्मि।

विदूषकः— [सविसयं स्वगतं] हंत चित्तावक्खेवो वअस्सस्स। ता एव्वं भणिस्सं। [प्रकाशं] णं देवीए णिमंतिदोसि उज्जाणमज्झप्पवट्टिअमाणमाहवपूआसमए सव्वब्रह्मणेण अय्यउत्तेण सण्णिहिदेण ठादव्वं महुराइ मोदअखंडआइ खादिदुं त्ति। सा हि पूआ साअंतणे पवट्टिस्सदित्ति पुरदो एव्व उक्कंठाविणोदणत्थं उपवणं गच्छह्मेत्ति णं पत्थिदोसि। (हन्त चित्तावक्षेपो वयस्यस्य। तदेवं भणिष्यामि। ननु देव्या निमन्त्रितोऽसि उद्यानमध्यप्रवर्त्यमानमाधवपूजासमये सब्राह्मणेनार्यपुत्रेण सन्निहितेन स्थातव्यं मधुराणि मोदकखण्डकानि खादितुमिति। सा हि पूजा सायंतने प्रवर्तिष्यत इति पुरत एव उत्कण्ठाविनोदनार्थमुपवनं गच्छाव इति ननु प्रस्थितोऽसि।)

राजा— [सविलक्षस्मितं]

हन्तास्मिन् समयेऽध्यवस्यति मनो यत्कार्यमत्यादराद्
यद्यत् तत्क्षणचिन्त्यमानमपि तच्चित्ते न धत्ते पदम्।
स्वच्छाभ्रान्तरितेन्दुवत् स्फुरदिदं धीवासनाशेषितं
व्यासङ्गापहृतात्मनां नवमिव प्रत्याय्यते स्वैर्जनैः॥८॥

तदुपवनमार्गमादेशय।

विदूषकः— इदो इदो एदु भवं। [इति कतिचित्पदानि गत्वा स्पर्शसुखमभिनीय] किं ण पेक्खसि तुमं एसो मल्लिआमाळईचंपआसोअपुण्णाअसोगंधिआदिप्पबुद्धप्पसूणावळीवांतणाणाविहामोदसंभारसंभाविदो फुळ्ळंतपंकेरुहब्भंतरट्ठाइपज्जत्तमद्धीअसंदोहगब्भंदरक्खोदसंपत्त-

सेच्चप्पआरावणि...स्समो दिग्घिआपदुमिणीवीचिआळासिआंदोळणप्पक्किआचाळिआंभोअपत्तावळीळीणसंपत्तसंखोभभिंगावळीचारुपक्खंतधूतिप्पबुद्धाणिळासारदत्तावळंबो साहु मंदाणिळो उज्जाणळच्छीपेक्खणणिमित्तं वम्महमहाराअचोदिओ विअ तुमं पदाक्खणीकदुअ अब्भुग्गच्छइ । (इत इत एतु भवान् । किं न प्रेक्षसे त्वमेष मल्लिकामालतीचम्पकाशोकपुन्नागसौगन्धिकादिप्रबुद्धप्रसूनावलीवान्तनानाविधामोदसम्भारसम्भावितः फुल्लपङ्केरुहाभ्यन्तरस्थायिपर्याप्तमाध्वीकसंदोहगर्भान्तरक्षोदसंप्राप्तशैत्यप्रचारापनीतश्रमो दीर्घिकापद्मिनीवीचिकालासिकान्दोळनप्रक्रियाचालिताम्भोजपत्रावलीलीनसंप्राप्तसंक्षोभभृङ्गावलीचारुपक्षान्तधूतिप्रबुद्धानिलासारदत्तावलम्बः साधु मन्दानिल उद्यानलक्ष्मीप्रेक्षणनिमित्तं मन्मथमहाराजचोदित इव त्वां प्रदक्षिणीकृत्य अभ्युद्गच्छति ।)

राजा— ननु पश्याम्येव । अयं हि,

स्मेराम्भोरुहगर्भनिर्भररसक्षोदी स्फुटन्माधवी-
वल्लीवेल्लनलब्धधूलिनिवहैरामोदयन् सर्वतः ।
दृष्ट्वास्मत्पदचारमाकुलधिया कन्दर्पराजेन मे
स्वीयो जैत्ररथः पटीरपवनः सज्जीकृतः प्रेर्यते ॥९॥

विदूषकः — णं एदं उपवणदुवारं पविसदु वअस्सो । [इत्युभौ प्रवेशं नाटयतः ।] (नन्वेतदुपवनद्वारं प्रविशतु वयस्यः ।)

राजा— [समन्तादवलोक्य सचमत्कारं]

मन्दास्पन्दनचन्दनाचलमरुल्लोलाग्रशाखाकरै-
रापृच्छन्मदनामयं परभृतारावैश्च हर्षोद्गतैः ।
दत्त्वा पाद्यमुदारकेसरवनीस्यन्दन्मरन्दच्छलात्
प्रायः पल्लववीजनैर्हरति मे घर्मोद्गमं माधवः ॥१०॥

[इति सर्वतो विलोक्य सोद्वेगमात्मगतं] कथमीदृशे समये अदीर्घदर्शिना मयेदमनुष्ठितम्। यत्पुरत एव विधुरितमानसं मां व्याकुलयति प्रसवधन्वा। किं पुनर्वसन्तसमयोदारप्रमदमध्यलग्नम्। [इति विषादमभिनयन् पुरतो निरूप्य सहर्षं] अयि भोः पान्थजनापमृत्यो कन्दर्प! तवापि विस्रब्धजनघातदोषपरिणतं साधनजालवैपरीत्यम्। तथाह्ययं,

चञ्चत्पिङ्गलपल्लवानलशिखाचुम्ब्यन्यपुष्टद्विजा-
धीशः षट्पदजालकोमलरुचिः श्यामोपकण्ठप्रभः।
माकन्दः सुमनःकदम्बकलितानन्दो रजोभूतिमान्
प्रस्यन्दन्मकरन्दगाङ्गजलभृन्मौलिर्महेशायते ॥११॥

[इति क्षणं विमृशन् सचमत्कारं] अयं हि,

रजःकलिलमाधवीविहितसङ्गतिभ्रान्तिमान्
प्रमत्तमधुपावृतो मधुरसैश्च पूर्णोदरः।
मदस्फुरितदर्पकोऽप्य(वि? भि)धया स्वयं माधवो
मरुद्भिरिव जातिहीन इति शङ्कितैः सेव्यते ॥१२॥

विदूषकः— भो वअस्स! किं ण सुणीअदि महुरकंठो कळकंठो। (भो वयस्य! किं न श्रूयते मधुरकण्ठः कलकण्ठः।)

राजा— ननु श्रूयत एव। अयं हि,

वने चरन् यश्चिरमास्त माधवं
हृदि स्मरन्नेव पिकद्विजाग्रणीः।
कथं न दृष्ट्वा पुरतस्तमादरात्
स्तुवीत नो हर्षकषायकन्धरः ॥१३॥

[इति पुनः परितः पश्यन् सकरुणं]

मन्ये मारसुहृन्मधुर्घलिमयीमाधूय सद्वागुरां
पान्थैणान् परपुष्टगीतिकपटैरामोहयत्येकतः ।
अन्यत्रापि परागपालिपटलीदुर्मोहचूर्णं किरन्
पाटीरानिल एष कर्षति नृणां हा हा कथं शं भवेत् ॥१४॥

अथवा,

संरब्धं कळकण्ठकण्ठपटहध्वानैः सखा यन्मधु-
र्विज्ञाय प्रसवोत्करैरयमपूर्यतच्छताङ्गं शरैः ।
मन्येऽतो गुरुभूरिभारभरणान्मन्दीकृतात्मा शनै-
र्दर्पाद्दू दर्पकचोदितो विचरति क्षीबोऽद्य मन्दानिलः ॥१५॥

[पुनः सर्वतो विलोक्य सामोदं]

क्वचिन्मधुरकोकिला क्वचन बम्भरालीस्खलत्-
कुशेशयकुलोज्ज्वला क्वचन हंसहेलाविला ।
परत्र च मधुस्रवानुकृतदुर्दिनश्री रजो-
भरैर्हरति मे मनोऽतिमधुरा मधुश्रीरियम् ॥१६॥

[पुनः सादरं विभाव्य सोत्प्राशं] अयि भोः!

उद्घुष्यन्तु पिबन्त एव मधु ते सर्वस्वमिन्दिन्दिरा
द्रुह्यन्तोऽसुममेभ्य एव मलिनाश्चूताङ्कुरेभ्यः पिकाः ।
एकस्ते निरपेक्ष एव सुरभे! सौरभ्यसारान् किरन्
बन्धुर्गन्धवहोऽर्भकः प्रतिदिशं यः कीर्तिमाख्यापयेत् ॥१७॥

[इति किञ्चिदिवान्तरं गत्वा श्रुतिमभिनीय सविषादाङ्गभङ्गं मुखं परावर्तयन्]
हहह! कथमचिन्तितमेवेत्थमुपस्थितम् । पश्य,

श्रूयन्ते कळकण्ठकण्ठपटहा ध्यायन्त एतेऽळयः
शङ्खा यत्तुमुलं रजांसि ककुभां रुन्धन्ति यत्रान्तरम् ।

दृश्यन्ते रुधिरारुणामिषचया यत्किंशुकालिच्छलात्
तन्मन्ये हरमूर्तिषु त्रिजगतीष्वद्य स्मरः क्रुध्यति ॥१८॥

[इति परावर्तते ।]

विदूषकः— [स्वगतं] कहं अण्णहा चिंतिदं अण्णहव्व उवट्ठिअं । जं मणोविणोदणत्थं उववणं पविसिअ मणोविसादणं संपादिदं । ता एव्वं कोऊहळक्खित्तचित्तं करेमि । [प्रकाशं] वअस्स पेक्खदु भवं वसंदसमअस्स सस्सिरीअत्तणं । जं इह ठावराणं वि एदं अवट्ठाणं । तह हि—

रुक्खा गुम्मा ळदाहिं सह मळअमरुग्गाळिआपंडुपत्ता
आमूळग्गं वसंतोग्गमिअदळिअसप्पल्ळवोब्भासिदंगा ।
एदे संपुण्णणाणापसवभरणदा भूसिदा भूसणेहिं
अण्णोण्णं संळवंता विअ पिअमुहरा वम्महण्णं कुणंदि ॥१९॥

(कथमन्यथा चिन्तितमन्यथैवोपस्थितम् । यन्मनोविनोदनार्थमुपवनं प्रविश्य मनोविषादनं सम्पादितम् । तदेवं कौतूहलाक्षिप्तचित्तं करोमि । वयस्य! प्रेक्षतु भवान् वसन्तसमयस्य सश्रीकत्वम् । यदिह स्थावराणामपि एतदवस्थानम् । तथाहि—

वृक्षा गुल्मा लताभिः सह मलयमरुद्गालितापाण्डुपत्रा
आमूलाग्रं वसन्तोद्गमितदलितसत्पल्लवोद्भासिताङ्गाः ।
एते सम्पूर्णनानाप्रसवभरनता भूषिता भूषणै-
रन्योन्यं संलपन्त इव पिकमुखरा मन्मथाज्ञां कुर्वन्ति ॥)

राजा— [विहस्य] साधु वयस्य! नागरिकोऽसि । यदीदृशेष्वपि विषयेषु निर्वृणोषि ।

विदूषकः— [सगर्वं यज्ञोपवीतं परामृशन्] किं केवळं उदरंभरिं मं मण्णेसि । (किं केवलमुदरम्भरिं मां मन्यसे ।)

राजा— तिष्ठत्विदमिदानीम् । क्वासौ बालबकुळः, यत्र गत्वा प्रतीक्षमाणैरस्माभिर्देवी सहुमन्तव्या ।

विदूषकः— णं इदो उत्तरेण चंपअवाडिअं पुरोभाए वासंदिआ- ळदामंडवस्स अळंकिदं विअ वणळच्छीभवणं दीसइ । णं दक्खदु भवं । (नन्वित उत्तरेण चम्पकवाटिकां पुरोभागे वासन्तिकालतामण्डपस्य अलङ्कृतमिव वनलक्ष्मीभवनं दृश्यते । ननु पश्यतु भवान् ।)

राजा— [पश्यन् कतिचित्पदानि गत्वा श्रुतिमभिनीय) सखे ! कोऽयं मालतीनिकुञ्जपिहिते प्रियालतरुमूले सल्लाप इव ।

विदूषकः— [परिक्रम्य पश्यन् ससंभ्रमविस्मयं] भो वअस्स ! इदो इदो तुरिअं उवसप्पदु भवं । खादिरमूळे कवित्थफळळाहो । (भो वयस्य ! इतइतस्त्वरितमुपसर्पतु भवान् । खादिरमूले कपित्थफललाभः ।)

राजा— [सादरं गच्छन् विभाव्य सविस्मयं] हन्त हन्त,

कान्तिच्छटा कनककेतकगर्भगौरी
काचित्कुतोऽपि कबळीकृतादिग्विभागा ।
आकस्मिकी बत वलाहकविच्युतेयं
चक्षुःप्रसारमपहन्त्यचिरप्रभेव ॥२०॥

[इति विस्फारिताक्षः कथञ्चित्पश्यन्]

मन्ये नीरदगर्भतः कमलभूरुत्खाय सौदामिनी-
माव्यामाच्छिखराग्रसत्करभसाकृष्टेन्दुबिम्बोज्ज्वलाम् ।

ज्ञात्वैनां चपलामदो विधृतये हेमाद्रिशृङ्गद्वयीं
भारारोपणकौतुकात्सुनिपुणो विन्यस्तवान् सारवित् ॥२१॥

अपि च सखे!

केयं वागुरिकाक्षिखञ्जनधृतौ यूनां न वा शृङ्खला
घ्राणायुष्करचापगन्धकरिणस्तारुण्यसङ्केतभूः ।
विश्रान्तिर्विधिकौशलस्य महिमा सौन्दर्यसारस्य वा
संसारस्य परायणं किमपरं काष्ठा परा निर्वृतेः ॥२२॥

[इति साशंसं विभावयवन्]

आस्थानी मीनकेतोः स्मरशुचिधमनी राजधानी गुणानां
चेतस्स्वास्थ्यापिधानी युवनयनमृगीबन्धनैकाभिधानी ।
सन्धानी जीवनाढ्या मुखविजितशरद्यामिनीनाथबिम्बा
कल्याणी कामिनी का हरति मन इयं कामनीयाकृतिर्नः ॥

अपि च,

माधुर्योद्गारसीमा तरुणिमभरिमा भूरिविस्रम्भभूमा
कामास्त्रस्यान्यानामाद्भुतगुरुमहिमा घ्राणनाडिन्धमेषोः ।
श्यामा हेमाभिरामा मुखसरसिरुहाक्षिप्तसोमा मनो मे
क्षामा मध्ये नितम्बस्थलिमजितद्विमाहार्यधैर्या धुनीते ॥२४॥

अपिचास्यां दृष्टमात्रायां,

नेत्रे भूरि विकासयन्नपि तयोर्निष्पन्दतामानय-
न्नानन्दाश्रु विवर्तयन् पुलकयन् गात्रं पुनः स्तम्भयन् ।
संरुन्धन् करणान्तराणि विकलं चेतः समुल्लासयन्
कोऽप्यन्तर्मम हर्षविस्मयमदावेशः समुन्मीलति ॥२५॥

[पुनः सवितर्कं]

किन्न्वेषा जलनिर्भराभ्रविततेः सौदामिनी विच्युता
किं वा शम्बरवैरितन्त्रमहितं तत्त्वं परं मूर्तिमत् ।
किं रत्नाकरसम्भवां श्रियमवेक्ष्येर्ष्याकुलान्यां श्रियं
तद्विस्मापयनीमसूत धरणीमां रत्नगर्भा स्वयम् ॥२७॥

[विचिन्त्य] अथवा—

धनुर्धुवति मन्मथो नियतमद्य पश्याम्रिमां
भवेयुरवकीर्णिनः शमधनास्तु युक्ता अपि ।
उपान्त्य इह गौरवात् स परमः पुमर्थोऽन्तिमा-
दिति स्मृतिशतान्यमी परमितो निबध्नन्ति च ॥२८॥

[इति विचिन्तयन् सप्रत्याभिज्ञानन्दं]

यामालेख्यगतां विभाव्य सुचिरं चेतस्तथोत्कण्ठितं
यच्चिन्ताकुलितावशेन्द्रियगणो नैवान्यदज्ञासिषम् ।
मच्छ्रेयस्करबुद्धिसागरमहानीतेर्यदेकायनं
सैवेयं बत किं ब्रवीमि तरुणी प्रत्यक्षमालक्ष्यते ॥२९॥

[इति निर्निमेषं पश्यन् सवितर्कं]

मन्ये ब्रह्मसभासु सोऽद्य महतीं तां वादयन् निर्वृतो
मत्पुण्येन चिरान्न वेत्ति भुवनेष्वाश्चर्यकं नारदः ।
नैवं चेत् कलहप्रियः कथमिमां नावेदयेत् स्वःपतौ
ज्ञात्वा वा समुपेक्षतामपि शचीप्रेयानिमां वासवः ॥३०॥

तथाहि,

त्रिविष्टपपतित्वमप्यमरराजता स्वस्तरु-
प्रभूत्यनितराप्यरत्ननिकरप्रभुत्वं च वा ।
शचीपरिजनीभवन्निरुपमाप्सरा वा न तं
श्रुतेदृशवधूमणिं सुखयितुं क्षमन्ते हरिम् ॥३१॥

[इति सुचिरं विभावयन् सवितर्कं]

नैनां किन्नु विदुस्त्रिकालमतयोऽप्याम्नायसत्पूरुषाः
कार्त्स्न्येनापि हि कर्मणां फलमिमां येनोचिरे सुन्दरीम् ।
यद्वा संस्मृतिगौरवेण न रुचिः प्रेक्षावतां प्रच्यवे-
न्मुक्तौ मा कलहो वृथैव जगतां स्यादित्युपेक्षा स्वयम् ॥३२॥

[इति प्रीतिविस्फारिताक्षः पश्यन्] मम हि,

लिप्येते किमु चक्षुषी नवसुधापाकैर्मृगाङ्कादहो
वक्राङ्कान्मम दृङ्मृगीपदयुजोत्कीर्णैः समन्तादिव ।
नो निर्वाणरसे निमज्ज्य सुतनौ निर्वाणभूयं गते
नैवं चेदनयोः कुतोऽयमनियानानन्दभूमोदियात् ॥३३॥

[इति क्षणं स्तब्ध इव स्थित्वा स्वचक्षुः प्रति]

अयि जनिशतकोटिप्राप्ततत्तन्नतभ्रू-
मुखरुचिचिरजग्धिव्याजकल्पोपवास ! ।
बत नयन ! तवेयं पारणा प्राप्तरूपा
फलमिह न विरूपं साधुकारी भजेत ॥३४॥

[प्रकाशं सप्रत्यभिज्ञं]

दृष्ट्वालेख्यमयीमभूम तरलाः सम्भावयन्तो हृदा
कौशल्यं किल शिल्पिनो निरुपमाभिख्यां पुरा सुन्दरीम् ।
जानीमोऽद्य तमेव हा पटुपटुं साक्षाद्विदन्तास्त्विमां
किं ब्रूमो वयमत्र चित्रमपि तद् यैषां न सम्भावितम् ॥३५॥

अस्या हि,

वक्त्रं वारिजजैत्रमुत्पलदळश्रीमोचने लोचने
किञ्चायं नवविद्रुमाङ्कुरशुचिच्छायाहरश्चाधरः ।
वाणी वीजितसौरभादिसरसद्राणी सुरश्रेणिभि
र्वेणी शम्बरवैरिसायकमहातूणीव संलक्ष्यते ॥३६॥

[विचिन्त्य सावहेलं]

जाने धातुः करपटलिकाकौशलं भूयसाहं
नैषा शक्या विधिजनिशतैश्चिन्तितुं चेतसा वा ।
भूयः कुर्वन् कलशमणिकाद्यर्थजालं कुलालः
स्प्रष्टुं वेष्टे कटकमकुटाद्यद्भुतं वस्तुसारम् ॥३७॥

अथवा,

यद्यप्यास्तां कुशलकुशलः सोऽप्सरःशिल्पशिल्पी
नैवं चेदप्यतुलसुषमामीदृशीं स्रष्टुमीष्टे ।
प्रायो ह्यद्यन्मधुघृतसितागोस्तनीप्रायवस्तु-
स्यूतिं सूतेऽमृतरससोद्गारभूम्नः कुतो वा ॥३८॥

[इति निर्निमेषं पश्यन्]

अथाहं परमास्तिकोऽप्यवधृतप्रज्ञोऽपि शुश्रूषया
　　यत्नाराधितविज्ञसद्गुरुमनःप्राप्तप्रसादोऽपि वा ।
हा पश्यन्निह किं ब्रवीमि तरुणीं स्वप्नेऽप्यचिन्त्यामिमां
　　ब्रह्मानन्दमदोनुषङ्गपरमानन्दाद् विजाने लघुम् ॥३९॥

[सोन्मादं]

क्वाहं वर्ते क्व नु वत रमे कस्य को वा कुतस्त्यो
　　नैतज्जानाम्यपि च विमृशन् भूयसानेहसापि ।
मज्जाम्यन्तःस्थगितकरणे ग्रस्तचैतन्यसारे
　　पश्यन्नेनामनिमिषमितः स्तब्धगात्रे प्रमोहे ॥४०॥

विदूषकः—[सवाक्स्तम्भं] भो वअस्स क्खणमेत्तं णिहुदो होहि । किंवि सळ्ळवदो विअ । (भो वयस्य क्षणमात्रं निभृतो भव । किमपि सल्लपतीव ।)

राजा मादरमवहितोऽस्मि. कर्णाञ्जलिभ्यामिदमीयवचनामृतमाकण्ठमापातुम ।

चन्द्रलेखा [विपञ्चिकां वसुलक्ष्मीहस्ते दत्त्वा स्मृतिमभिनीय सास्रं] हळा, तारिसस्स णिरंतरोवणदसामंदभूआळणिअणिअमोळितडघाडिअविविहमणिणिअरप्पहाक्किम्मीरिदपाअपळ्ळवस्स बाहिअदुवारावट्ठिअप्पचग्गक्खलिदचइदचइदणरिंदकोडिविण्णापणसमआपेक्खणपरचदुरजणसंकुळट्ठाणमण्डवाळंकारभूदस्स वंदिमागहवेदाळिअकुळप्पत्थुदणिरदिसअणिअमोआवळीसमाकण्णणहरिसन्तपुळअणिरंतराळंकिदभुअदंडजुअळस्स ससिउळमंडणस्स वसुणिहिणामहेअस्स महाराअस्स विदारिआ भविअ एव्वं परप्पेसिअत्तणं केणवि काळणन्तरेण अणुहोंदी दुःखावेमि मं ।

(हला ! तादृशस्य निरन्तरोपनतसामन्तभूपालनिजनिजमौलितटघटितविविधमणिनिकरप्रभाकिर्मीरितपादपल्लवस्य बाह्यद्वारावस्थितप्रत्यग्रस्खलितचकितचकितनरेन्द्रकोटिविज्ञापनसमयापेक्षणपरचतुरजनसङ्कुलस्थानमण्डपालङ्कारभूतस्य वन्दिमागधवैतालिककुलप्रस्तुतनिरतिशयनिजभोगावलीसमाकर्णनहृष्यत्पुलकनिरन्तरालङ्कृतभुजदण्डयुगळस्य शशिकुलमण्डनस्य वसुनिधिनामधेयस्य महाराजस्यापि दारिका भूत्वा एवं परप्रेष्यत्वं केनापि कारणान्तरेणानुभवन्ती दुःखापयसि माम् ।)

राजा— [सविस्मयं स्वगतं] सिन्धुदेशाधिपतेस्तनयैषा । [विदूषकस्य मुखमवेक्षते ।]

विदूषकः— ण जाणीअदि कस्स देसस्स अहिणाहो एसो जो तुह वि समाणजोगक्खेमो सुणीअदि । (न ज्ञायते कस्य देशस्याधिनाथ एष यस्तवापि समानयोगक्षेमः श्रूयते ।)

राजा— [सादरं] सत्यं समानयोगक्षेम एव । यतः,

अस्मन्मातुलबालमित्रमसकृत् कर्णान्तरङ्गीकृतो
योऽधीतिर्धनुरागमेषु सह तैस्तुल्यश्च बाह्वोर्बले ।
सिन्धोरुत्तरकच्छभूमिमवधीकृत्या हिमाद्रेः क्षितिं
रक्षन् दिक्पतिसन्निभो वसुनिधिः ख्यातप्रभावः क्षितौ ॥४१॥

विदूषकः— [स्मृतिमभिनीय] णं वत्तव्वं जो सामंतदेसाहिवहूणराअसक्खिअत्तणणिमित्तं बहुविहलक्खण संपण्णजादिअतुरंगमसहस्सं तुह उपदं कप्पिअ पडिक्खइ तुह पसादावसरं । (ननु वक्तव्यं यः सामन्तदेशाधिपहूणराजसख्यनिमित्तं बहुविधलक्षणसम्पन्नजात्यतुरंगमसहस्रं तवोपदां कल्पयित्वा प्रतीक्षते तव प्रसादावसरम् ।)

राजा— सखे! मैवं वादीः।

सामन्तभूपे पृथिवीभृतां हि जागर्ति वैरस्य निदानजालम्।
अतः परापेक्षणमस्य सन्धौ बलीयसः कोऽत्र ततोऽपमानः ॥४२॥

जात्यश्वसहस्रसमर्पणं तु स्वदेशस्य तन्निदानतां बोधयितुम्। अत एवास्माभिरपि तिरस्कृताभ्रमुपतयः सन्ततनिष्यन्दमानमदजलकण्ठदघ्नीकृतालानभूमयः सिन्धुरव्रजाः कतिचित् सबहुमानमस्मै प्रेषिताः।

विदूषकः— चिट्ठदु एदं। अवहिदा सुणुमो इमाणं अण्णोण्णविस्सद्धजप्पिदसेसं। (तिष्ठत्वेतत्। अवहितौ शृणुवः अनयोरन्योन्यविस्रब्धजल्पितशेषम्।)

राजा— एवमस्तु। [इत्यवहितः शृणोति।]

वसुलक्ष्मीः— [सप्रश्रयं] मा एव्वं भणाहि। जदो अह्माणं अणुऊळदरेणव्व देव्वेण ईदिसं पदं आरोविदह्म। अण्णहा कुदो अज्जूए तह वञ्चिदाए दंसणमेत्तगब्भणिब्भेदणाआरभीसणसाअरमज्झप्पवट्टमाणतारिसप्पवहणमज्झट्ठिदाए अदिभीसणप्पआरदुल्ळक्खणहूणराअप्पवहणदंसणकादराक्केरकण्णधाराविण्णादगदिविसेसदावाउळाए मह तह अणुऊळदरसुहंउवाउगमणाणुरोहेण कहं वि अहिळसिदसिद्धिक्खमदेसप्पावणं, तत्तवि कुदो चिराहिळसिदवरस्स अच्चंदसण्णिहाणवासो। परंदु परमकोवणाए देवीए सण्णिहाणजणिदो महंदो अंदराओ संभावीअदि।

(मैवं भण। यतोऽस्माकमनुकूलतरेणैव दैवेनेदृशं पदमारोपितौ स्वः। अन्यथा कुत आर्यया तथा वञ्चितायाः दर्शनमात्रगर्भनिर्भेदनाकारभीषणसागरमध्यप्रवर्तमानतादृशप्रवहणमध्यस्थितायाः अतिभीषणप्रकारदुर्लक्षणहूणराज

प्रवहणदर्शनकातरासदीर्घकर्णधाराविज्ञातगतिविशेषताव्याकुलाया मम तथानुकूलतरसुखंयुग्मयुगमनानुरोधेन कथमपि अभिलषितसिद्धिक्षमदेशप्रापणं, तत्रापि कुताश्चिराभिलषितवरस्य अत्यन्तसन्निधानवासः । परन्तु परमकोपनाया देव्याः सन्निधानजनितो महानन्तरायः संभाव्यते ।)

राजा— [सशङ्कं] धन्यः खल्वसौ योऽनयापि स्वयमभिलष्यते । किन्तु देव्यास्तत्रान्तरायहेतुतामवजिगामिषामि ।

विदूषकः— [सस्मितं] मा गव्वं वहेहि । (मा गर्वं वह ।)

राजा— शृणुमः परस्तादपि ।

वसुलक्ष्मीः— तहवि ताए भादुणो वसुसेणस्स अपच्चकिदअत्तणेण मइ अच्चंदाणुरत्ताए ण किंपि अच्चंदं पडिहीअदित्ति पडिभाइ । (तथापि तस्या भ्रातुर्वसुषेणस्य अपत्यकृतकत्वेन मयि अत्यन्तानुरक्ताया न किमप्यत्यन्तं परिहीयत इति प्रतिभाति ।)

राजा— शक्यमुच्छ्वसितुम् ।

विदूषकः— सुदं देवीए भीदिकारणत्तणं । (श्रुतं देव्या भीतिकारणत्वम् ।)

राजा— न पर्याप्तमिदमपि हृदयस्य ।

चन्द्रलेखा— ता णिव्वट्टेहि देवीए अण्णं । (तन्निर्वर्तय देव्या आज्ञाम् ।)

वसुलक्ष्मीः— तह । [इति वीणादण्डमुत्क्षिपति ।] (तथा ।)

राजा — [सकौतुकं पश्यन् वीणादण्डं प्रति] अयं हि —

अस्याः कराग्रमिषकोमलपल्लवाग्र-
संभावितः कुचसरोरुहकोशसङ्गी ।
उद्यत्प्रवाळबहळः स्वयमेव साक्षा-
द्विज्ञायते जनतया नियतं प्रवाळः ॥४३॥

विदूषकः— णं पेक्खदु भवं । एसा विपंचिआविभूसिदवामंसमणहरा किंचि गादुं विअ पवट्टेइ । (ननु प्रेक्षतां भवान् । एषा विपञ्चिकाविभूषितवामांसमनोहरा किञ्चिद् गातुमिव प्रवर्तते ।)

राजा— ननु पश्याम्येव । अधुना हि—

आविष्कृतक्रमविलुप्तसिराककण्ठ-
नाळीमनोहरमुदञ्चदृजूकृतभ्रूः ।
वीणागुणप्रविचलत्करजाग्ररम्य-
मारब्धगीतिरियमावृणुते मनो मे ॥४४॥

वसुलक्ष्मीः —

अइ णाह! चित्तफळए कदावि दिट्ठो सि सिविणअम्मि विअ ।
तहवि बळिअं मणं मे णिग्घिणओ वम्महो कदत्थेइ ॥४५॥

(अयि नाथ! चित्रफलके कदापि दृष्टोऽसि स्वप्नक इव ।
तथापि बलीयो मनो मे निर्घृणको मन्मथः कदर्थयति ॥)

राजा— [स्वगतं] किन्न्वहमनयापि चित्रफलक एवाभ्यक्षितः प्रथमम् ।

विदूषकः— [स्वगतं] अहो एकरूवं पुढमदंसणं एदाणं ति

अच्चरिअं अच्चरिअं । [प्रकाशं] अवि पज्जत्तं तुह हिअअस्स । (अहो! एकरूपं प्रथमदर्शनमेतयोरित्याश्चर्यमाश्चर्यम् । अपि पर्याप्तं तव हृदयस्य ।)

राजा— सखे! सत्यमिदमद्य पर्याप्तमिव हृदयस्य । सत्यमनयापि प्रथमं चित्रफलक एवाध्यक्षितोऽस्मि [सोच्छ्वासं] आ!

आत्मानुरागपिशुनं मधुराधरायाः
श्रुत्वा वचः स्मरसुदीप्तशराग्रकल्पम् ।
जिह्मत्स्वतोऽप्यहमगाधसुधासरस्या-
मामज्ज्य मग्न इव सम्प्रति निर्वृणोमि ॥ ४६ ॥

[साकूतं पश्यन् प्रकाशं] रे प्रियाळ!

धन्यस्त्वमेव सफलं तु तवैव जन्म
श्लाघ्यं कुलं विटपिनां भवतोऽद्य सञ्जात् ।
यस्येयमादरवती बत दोहळाय
मूले किरत्यमृतमेव मिषेण गीतेः ॥ ४७ ॥

विदूषकः— [दृष्ट्वा] अहो! एसो पिआळरुक्खो तुमं विअ आमूळग्गणिबद्धकोरओग्गमो अणुराअपिसुणहरिसंतपळ्ळवणआहिरामो इमाए गीईपरवसो विअ ळक्खीअदि । किं ण पेक्खसि तुमं । (अहो! एष प्रियालवृक्षस्त्वमिव आमूलाग्रनिबद्धकोरकोद्गमोऽनुरागपिशुनहृष्यत्पल्लवनयनाभिरामोऽस्या गीतिपरवश इव लक्ष्यते । किं न पश्यसि त्वम् ।)

राजा— [दृष्ट्वा सविस्मयं] अयि भो वनस्पते! अस्या हि—

तन्व्याः कोमलकण्ठकम्बुविवरप्रश्च्योतदार्द्रामृत-
स्रोतोनिर्झरमज्जनात् पुळकितावावां रसज्ञौ समम् ।

उद्गच्छन्नवपल्लवाक्षिनिवहैरामूलमापादितै-
रुद्यद्रागभरैरिमामनुभवन्मन्ये त्वमेकः कृती ॥ ४८ ॥

विदूषकः— भो वअस्स! किं बहुदरदिट्ठित्तणं ओळोअणे अव-गादिविसेसं उप्पादेइ। (भो वयस्य! किं बहुतरदृष्टित्वमवलोकनेऽवगतिविशेष-मुत्पादयति।)

राजा— [सस्मितं] मूर्ख! पिहितैकाक्षः पश्यन् स्वयमेवावगच्छ।

विदूषकः— [तथा कृत्वा पश्यन् विहस्य] णं सव्वण्णो तुमं जं ईदिसविसेसं वि जाणासि। (ननु सर्वज्ञस्त्वं यद् ईदृशविशेषमपि जानासि।)

चन्द्रलेखा— [सस्मितं]

अज्ज पेक्खइ तुमं वि जणो सो आअदो हि अहिमाहवपूअं।
सो वि ढज्झइ अणंगसरेहिं तिक्खणेहि दिउणं अ तुवत्तो ॥ ४९ ॥

(अद्य पश्यति त्वामपि जनः स आगतो ह्यधिमाधवपूजम्।
सोऽपि दहत्यनङ्गशरैस्तीक्ष्णैर्द्विगुणं च त्वत्तः ॥)

वसुलक्ष्मीः— [सव्रीळं] हळा परिहाससीळत्तणं मुंचेहि। मए उण पिआळदोहळणिमित्तं जाए काए वि उवाळंभणं गीईए उवक्कंतं। तुए उण अण्णहा गहीदं। (हला परिहासशीलतां मुञ्च। मया पुनः प्रियाळदोहलनिमित्तं यस्याः कस्या अपि उपालम्भनं गीत्या उपक्रान्तम्। त्वया पुनरन्यथा गृहीतम्।)

चन्द्रलेखा— [सानुनयं] किं हिअअस्स वि ळज्जा गुरुई। (किं हृदयस्यापि लज्जा गुर्वी।)

वसुलक्ष्मीः— [साक्षेपं] किं एत्थ लज्जाए णिगूहिदं । (किमत्र लज्जया निगूहितम् ।)

चन्द्रलेखा— [सकोपं] ता तुह दोहळेण आमूळदंसिअपळ्ळअकोरअविसेसरमणिज्जं परिहसन्तं विअ पुढमोग्गमिअकुसुमपळ्ळवदाए किंचि विछाआइ महाराअपरिग्गहीदाइ महीरुहमंडळाइ देवीए तुरिअं णिवेदह्म । (तत् तव दोहळेन आमूलदर्शितपल्लवकोरकविशेषरमणीयं परिहसन्तमिव प्रथमोद्गमितकुसुमपल्लवतया किञ्चिद् विच्छायानि महाराजपरिगृहीतानि महीरुहमण्डलानि देव्यै त्वरितं निवेदयावः ।)

वसुलक्ष्मीः— [सोद्वेगानुनयं] हळा, सव्वस्स मह जीविअधारणस्स आळंबणं तुमं । (हला सर्वस्य मम जीवितधारणस्यालम्बनं त्वम् ।)

चन्द्रलेखा— [सस्मितं] तहिं किं देवीए वउळमूळोवसप्पणं । तं ठाऊण एत्थ एव्व देविं दक्खामो त्ति अज्झवसाओ । (तर्हि किं देव्या बकुळमूलोपसर्पणम् । तत् स्थित्वा अत्रैव देवीं द्रक्ष्याव इत्यध्यवसायः ।)

वसुलक्ष्मीः— [सव्रीळम् अधोमुखी सखीं पटाञ्चले गृहीत्वा] एत्थ सो जणो आअच्छदित्ति सुणीअदि । (अत्र स जन आगच्छतीति श्रूयते ।)

राजा— [सशिरःकम्पं सखीं प्रशस्य] सर्वज्ञमौलिलालिता त्रिजगन्निर्वृतिकारिणी चन्द्रलेखा किल त्वम् । यतः,

उन्मीलिलज्जाविषविह्वलाङ्गीं
नित्यौषधान्तःकलनव्यथाताम् ।

---

१. 'किंपि' ख.

कृत्वा क्रमोन्मूलितदुःखजालां
निरामयीकर्तुमिमां क्षमासि ॥ ५० ॥

[वसुलक्ष्मीं प्रति ससंभ्रमं]

यः श्रूयते स्वकृतकल्यपनोदहेतो-
र्देव्यानुनीयत इतो बकुळस्य मूले ।
इत्यद्य शश्वदवरोधकुले मृगाक्षि!
सोऽहं रसात् त्वदनुनीतिसमुत्सुकोऽस्मि ॥ ५१ ॥

अपि च,

स्मरवीरशरार्दितं चिरात् ते विरहव्याजविकारिघर्मतप्तम् ।
अयि वीजय किञ्चिदार्तमेनं प्रणयोद्गारसुशीतळैः कटाक्षैः ॥ ५२ ॥

[इति वसुलक्ष्मीमनुनेतुमिच्छति ।]

विदूषकः— [पार्श्वतो दृष्ट्वा] हद्धि हद्धि । भो वअस्स! इदो देवी सभाअणसंभारहत्थाहिं चेडीहिं सह सुवअणादंसिदमग्गा कणअमेहळाळंबिअपाणिपळ्ळवा वउळतरुमूळदिण्णदिट्ठी पदंदरगदाणं बि अह्माणं उवरि अ दिण्णदिट्ठी इदो ओसप्पइ । [इति राजानमाकर्षति ।] (हा धिक् हा धिक् भो वयस्य! इतो देवी सभाजनसम्भारहस्ताभिः चेटीभिः सह सुवचनादर्शितमार्गा कनकमेखलालम्बितपाणिपल्लवा बकुलतरुमूलदत्तदृष्टिः पदान्तरगतानामप्यस्माकमुपरि च दत्तदृष्टिः इत उपसर्पति ।)

राजा— [सोद्वेगसम्भ्रमं] क्वासौ क्वासौ । [इति सर्वतः पश्यन् दृष्ट्वा साश्चर्यं]

इयं हि मितभूषणा धृतमहार्हपट्टांशुका
वसन्तकुसुमोत्करैः कृतयथार्हभूषोज्ज्वला ।

इतः किल पदान्तरे मधुरभाषिणी यात्यहो
श्रिता विनयसम्पदा सहजयेव सख्या स्वया ॥ ५३ ॥

[विमृश्य सचकितं] सखे! अनेन निगूढसरण्यन्तरेण देव्याः पुरत एव बकुलमूलं सम्भावयितुमिच्छामि ।

विदूषकः— तहा। (तथा।) [इति ससंभ्रममुभावुपसर्पतः।] इदो णिरंतरणिपडिअबकुळकुसुमप्पच्छादिअं वि आआरकप्पिदणाणाकुसुमप्पच्छादिअदळं तुह देवीए कप्पिदं णवरअणसिंहासणं। उपविसदु भवं। अण्णदो मह णिमित्तं परिकप्पिदे आआरवेत्तासणे अहं वि उवविसामि। (इतो निरन्तरनिपतितबकुळकुसुमप्रच्छादितमपि आचारकल्पितनानाकुसुमप्रच्छादिततलं तव देव्या कल्पितं नवरत्नसिंहासनम्। उपविशतु भवान्। अन्यतो मम निमित्तं परिकल्पिते आचारवेत्रासने अहमप्युपविशामि।)

राजा— धिक् चपल, यावद्देव्यागमनमत्रैव शुचिनि स्फटिकशिलातल उपविशावः। [इत्युभावुपविष्टौ।]

[ततः प्रविशति यथानिर्दिष्टा देवी।]

देवी— हळा कणअमेहळे! अवि सच्चं मह संभावणाणिमित्तं अग्गदो गदुअ बउळदळं अहिवसइ अय्यउत्तो त्ति। (हला कनकमेखले! अपि सत्यं मम सम्भावनानिमित्तमग्रतो गत्वा बकुळतलमधिवसत्यार्यपुत्र इति।)

कनकमेखला— [स्वगतं] णं दिट्ठो मए पिआळमूळणिगूहिदं तारिसं बुद्धिसाअरणीइप्पहावं ओळोइदो सवअस्सो ळदाविडवंदरिदो

भट्टा इदो एव्व कहंदरप्पत्थावणपराए मए कहं वि देवीदंसणादो मोचिओ। होदु एव्वं भणिस्सं। [प्रकाशं] को एत्थ संदेहो। (ननु दृष्टो मया प्रियाळमूलनिगूहितं तादृशं बुद्धिसागरनीतिप्रभावमवलोकितः सवयस्यो लताविटपान्तारितो भर्ता इत एव कथान्तरप्रस्तावनपरया मया कथमपि देवीदर्शनान्मोचितः। भवतु एवं भणिष्यामि। कोऽत्र सन्देहः।)

देवी— ता तुरिअं गच्छह्म। [इति परिक्रम्यावलोक्य सहर्षप्रश्रयं] कहं एत्थ पुडमं एव्व अय्यउत्तो मं पडिपाळेइ। [इत्युपसर्पति] (तत् त्वरितं गच्छावः। कथमत्र प्रथममेव आर्यपुत्रो मां प्रतिपालयति।)

राजा— [उत्थाय]

यस्य प्रसादनकृते नळिनायताक्षि!
संरम्भ एष परमः क्रियते त्वयेत्थम्।
सोऽहं प्रसादनपरस्तव पूर्वमेव
प्राप्तश्चिरादभिलषन्निह सम्प्रतीक्षे॥ ५४॥

[इति प्रत्युद्गच्छति]

देवी— [सलज्जं] णं सुइरं अवरद्धह्मि अय्यउत्तस्स। [इत्यधोमुखी तिष्ठति।] (ननु सुचिरमपराद्धास्मि आर्यपुत्रस्य।)

राजा— [गत्वा मुखमुन्नमय्य]

न नमय चटुलाक्षि! क्षिप्तसोमं मुखं ते
गगनविवरगताश्चन्द्रिकाः पूरयन्तु।
शशिरुचिरुचिहानाद्रात्रिवलप्तोपवासा
दिशि दिशि च चकोराः पारणां संश्रयन्तु॥ ५५॥

देवी— [मुखमुन्नम्य बकुलमूलमुपसृत्य] हंजे, उवणेहि अय्यउत्तस्स उइदं सिंहासणं। (हञ्जे, उपनयार्यपुत्रस्योचितं सिंहासनम् ।)

चेटी— इदो कुसुमभरंतरिअं रअणसिंहासणं सज्जं। [इति पुरत आसनं निर्दिशति ।] (इतः कुसुमभरान्तरितं रत्नसिंहासनं सज्जम् ।)

देवी— एत्थ उवविसदु अय्यउत्तो। जत्थ सुहोवविट्ठं अय्यउत्तं एदेहिं पूआसंभारेहिं अच्चिदुं इच्छामि। [इति सप्रश्रयं पाणाववलम्ब्योपवेशयति ।] अत्रोपविशत्वार्यपुत्रः। यत्र सुखोपविष्टमार्यपुत्रमेतैः पूजासम्भारैरर्चितुमिच्छामि ।)

राजा— [उपविश्य] देवि! त्वयाप्युपवेष्टव्यम् । न खलु सौदामिनीं विना गिरिशिखरमलङ्कर्तुमीष्टे जलधरः।

देवी— अज्ज णिअमट्ठिदा णिअमंते उवविसामि। (अद्य नियमस्थिता नियमान्ते उपविशामि ।)

राजा— भवतु। परवानस्मि देवीवचनेन।

विदूषकः— [सरोषं किञ्चिदपसृत्य] होदु। गमीअदि बह्मणो णविआरिदो। अहवा होदु मं विणा कहं वुदस्स सहळत्तणं होदि। [इति गन्तुमिच्छति ।] (भवतु। गच्छति ब्राह्मणो नविचारितः। अथवा भवतु मां विना कथं व्रतस्य सफलत्वं भवति ।)

[देवी चेटीमुखमवेक्षते ।]

चेटी— अय्य! इदो वउळकुसुमंतरिअं वेत्तासणं कप्पिदं। [इति

हस्तेनाकृष्य आसने उपवेशयति ।] (आर्य! इतो बकुळकुसुमान्तरितं वेत्रासनं कल्पितम् ।)

विदूषकः— (करौ विधून्वन्) ण खु ण खु दासीए पुत्ति! बह्मणो फंसेण दूसणिज्जो। [इति दण्डकाष्ठमादाय ताडयितुमिच्छति । सर्वे हसन्ति ।] (नखलु नखलु दास्याः पुत्रि! ब्राह्मणः स्पर्शेन दूषणीयः ।)

राजा— मूर्ख! न अबलाजनमधिक्षेप्तुमर्हसि ।

विदूषकः— हुं चिट्ठदु एदं । जं वअस्सस्स देवीए वा अहिरुई । [इत्युपविशति ।] (हुं तिष्ठत्वेतत् । यद्वयस्यस्य देव्या वा अभिरुचिः ।)

देवी— हळा सुवअणे! ओणेहि अच्चणासंभाराइ। (हला सुवचने! उपनयार्चनासंभारान् ।)

सुवदना— इदो सव्वं सज्जं । [इति परिजनहस्तेभ्य आदाय सन्निधापयति ।] (इतः सर्वं सज्जम् ।)

[देवी स्रक्चन्दनादिभी राजानमर्चयति ।]

वसुलक्ष्मीः— हळा चंदलेहे! किं देवी आअदा ण वेत्ति इदो णिग्गमिअ पेक्ख । [इति प्रियाळमूलाद् बहिर्निर्गत्य बकुलतरुमूलं पश्यन्ती] हळा! को काळो देवीए आअदाए । (इति निगूढे उपसृत्य विभाव्य सरोमाञ्चं पश्यन्ती सभयहर्षगद्गदकण्ठस्तिमिता तिष्ठति ।) (हला चन्द्रलेखे! किं देवी आगता न वेति इतो निर्गत्य प्रेक्ष । हला कः कालो देव्या आगतायाः ।)

चन्द्रलेखा— (वसुलक्ष्मीं निर्वर्ण्य) हळा!

मोरंगणेव्व महुरस्स पओहरस्स
णिव्वण्णणेण व इरम्मदभीसणस्स ।
उण्णिद्दलोमलहुकंटाकिदंगजट्ठी
उक्कंठिआसि सहि कस्स विलोअणेण ॥ ५६ ॥

(मयूराङ्गनेव मधुरस्य पयोधरस्य
निर्वर्णनेनेव इरम्मदभीषणस्य ।
उन्निद्रलोमलघुकण्टकिताङ्गयष्टि-
रुत्कण्ठितासि सखि कस्य विलोकनेन ॥)

वसुलक्ष्मीः— [सविस्मयं] हळा! माहवपूआसमअप्पवट्टमाण-वम्महपूआववदेसेण महाराओ देवीए पसादणत्थं अच्चीअदित्ति सुवअणाए मंतिदं । एत्थ उण अण्णहा पवट्टइ । जं पच्चक्खो एव्व वम्महो अब्भच्चीअदि । महाराओ उण ण दीसइ । (हला! माधवपूजा-समयप्रवर्तमानमन्मथपूजाव्यपदेशेन महाराजो देव्याः प्रसादनार्थमर्च्यत इति सुवदनया मन्त्रितम् । अत्र पुनरन्यथा प्रवर्तते । यत् प्रत्यक्ष एव मन्मथो-ऽभ्यर्च्यते । महाराजः पुनर्न दृश्यते ।)

चन्द्रलेखा— (सबहुमाणं) हळा,

जो दिट्ठो महुरम्मि चित्तफळए जं तातपादा भिसं
सव्वण्णोत्ति उवत्थुअंदि पुडवी जेणव्व राजण्णई ।
जस्सासूअदि वम्महो किळ जदो भीदिं गदो जस्स सो-
भग्गेणव्व समाअदा तुममिदो जस्सिं णिमग्गंतरा ॥ ५७ ॥

रूवविणिंदिअमारो पुरदो सो एव्व रामवम्मेंदो ।
दट्ठूण जं दु होदी मुत्तं मअणं वि संकेदि ॥ ५८ ॥

---

१. 'भण' ख.

(यो दृष्टो मधुरे चित्रफलके यं तातपादा भृशं
सर्वज्ञ इत्युपस्तुवन्ति पृथिवी येनैव राजन्वती ।
यस्मा असूयति मन्मथः किल यतो भीतिं गतो यस्य सौ-
भाग्येनैव समागता त्वमितो यस्मिन् निमग्नान्तरा ॥)

(रूपविनिन्दितमारः पुरतः स एव रामवर्मेन्द्रः ।
दृष्ट्वा यं तु भवती मूर्तं मदनमपि शङ्कते ॥)

वसुलक्ष्मीः— [सबहुमानं स्वगतं]

धण्णम्मि धण्णदिट्ठी धण्णो भावो अ मह मणं धण्णं ।
रूवविणिंदिअमअणं पुरदो दक्खामि जं महप्पाणं ॥ ५९ ॥

[प्रकाशं सव्रीडं] हळा! सो एव्व एसो चित्तगअं वि जं पेक्खमाणाए मह तारिसो भावो तुए उण्णीदो । जण्णिमित्तं अ ईदिसं परप्पेसि-अत्तणदुःखं अणुहोंदी वि ण णिव्विण्णह्मि । ता इदो सेसकज्जेसु मह तुमं सरणं होहि । [इति सखीमालिङ्गति ।]

(धन्ये धन्यदृष्टिर्धन्यो भावश्च मम मनो धन्यम् ।
रूपविनिन्दितमदनं पुरतः पश्यामि यं महात्मानम् ॥

हला! स एवैष चित्रगतमपि यं प्रेक्षमाणाया मम तादृशो भावस्त्वयोन्नीतः । यन्निमित्तं चेदृशं परप्रेष्यत्वदुःखमनुभवन्त्यपि न निर्विण्णास्मि । तदितः शेष-कार्येषु मम त्वं शरणं भव ।)

चन्द्रलेखा— [सस्मितं] अंहो सच्चं मुद्धासि । जं समसुहदुक्खं वि इमं जणं सदो एव्व पवट्टमाणं वि पवट्टेसि । (अहो सत्यं मुग्धासि । यत् समसुखदुःखमपि जनं स्वत एव प्रवर्तमानमपि प्रवर्तयासि ।)

राजा— देवि! न खलु, साधु सम्भावितोऽस्मि यदीदृशस्य मेऽङ्कतलमध्यास्यात्मानं नोपचारयसि ।

देवी— [सादरं] अय्यउत्तस्स साहीणो अअं जणो । तहवि दाणिं णिअमट्ठिदह्मि । (आर्यपुत्रस्य स्वाधीनोऽयं जनः । तथापीदानीं नियमास्थितास्मि ।)

विदूषकः— उदळंभरी बह्मणो हं किं विसुमरिदो देवीए । (उदरम्भरिर्ब्राह्मणोऽहं किं विस्मृतो देव्या ।)

कनकमेखला— चवळ खणं पडिक्ख । सअं एव्व आअच्छइ । (चपल! क्षणं प्रतीक्षस्व । स्वयमेवागच्छति ।)

देवी— [राजाभिमुखी सप्रश्रयं] जं मए अकाळणे उण मण्णू किदा तुमे तं मरिसेदुं इच्छामि । (यन्मयाकारणे पुनर्मन्युः कृता त्वयि तन्मर्षयितुमिच्छामि ।)

राजा— [सहर्षं] यद्येवं तर्हि श्रूयताम्—

विप्रक्षत्रविशः स्वधर्मनिरताः सर्वे तुरीयैः समं
यां प्रीतिं मम तन्वते सुफलिनी विश्वम्भरा चैव याम् ।
निश्शेषीकृतवैरिराजविभवो यां वा बलाम्भोनिधि-
स्ताभ्यः कोटिगुणोत्तरं सुमुखि! ते प्रीणामि सत्यं ब्रुवे ॥६०॥

देवी— सुवअणे एदं वि मोदअसरावं बह्मणं पावेहि । (सुवदने! इममपि मोदकशरावं ब्राह्मणं प्रापय ।)

विदूषकः— [उत्थाय] इदो अहं एव्व गह्णेमि । [इति प्रतिगृह्णाति ।] (इतोऽहमेव गृह्णामि ।)

[नेपथ्ये कलकलः]

राजा—

भिन्दन् चक्राह्वहर्षं युवजनहृदये स्मेरतामादधानो
धून्वन् दुर्मन्युनागानतिकुटिलमनःकोटरान्मानिनीनाम् ।
मुष्णन् नैश्चिन्त्यमग्न्याहितगृहिहृदये व्याकुलत्वं ददानः
कर्णश्राव्यः ककुप्सु प्रसरति समयावेदकः शङ्खनादः ॥ ६१ ॥

अपि च,

सायंनटच्चतुरचन्द्रकलावतंस-
मञ्जीरमञ्जुळनिनादमनोहरोऽयम् ।
आविर्भवन्ननुसंगरयोगशंसी
सायाह्नशङ्खनिनदः कुतुकं विधत्ते ॥ ६२ ॥

तदेहि । अभ्यन्तरमेव प्रविशावः ।

देवी— जं रुच्चइ अय्यउत्तस्स । (यद्रोचते आर्यपुत्राय ।)

वसुलक्ष्मीः— [दृष्ट्वा ससंभ्रमं] हळा! अब्भंतरं उद्दिसिअ पत्थिदो जणो सो । किं करिस्सं । (हला! अभ्यन्तरमुद्दिश्य प्रस्थितो जनः सः । किं करिष्ये ।)

चन्द्रलेखा— [सानुनयं] हळा! मा भआहि । जदो देव्वेणव्व एव्वं दत्तावळंबह्म । ता अह्मे वि अब्भंतरं एव्व पविसामो । (मा बिभेहि । यतो दैवेनैव दत्तावलम्बाः स्म तदावामपि अभ्यन्तरमेव प्रविशावः ।)

[इति निष्क्रान्ताः सर्वे ।]

द्वितीयोऽङ्कः ।

तृतीयोऽङ्कः ।

(ततः प्रविशति विदूषकः ।)

विदूषकः— [विसंस्थुलोदरं विकटं परिक्रम्य] हि हि हि परिपुण्णं मे देवीसमप्पिदेहिं मोदअखंडएहिं ळंबमाणघडिआआरं [1]उदळब्भंतरं [2]फुडादि विअ । अदो पदादो पदं वि गंदुं ण पारेमि । [विचिन्त्य सविषादं] ण मे अज्ज णिद्दापसंगो खणं वि भविस्सदि । जदो वअस्सो ताए पच्चक्खदंसणप्पहुदि खणे खणे अण्णो विअ संपज्जमाणो गहावेसिदो विअ किंवि किंवि असंबद्धं [3]पळवन्तो अज्ज एव्व तं पुणो वि दट्ठुं मं पीडेइ । अहं उण संझं वि विह्मरिअ उत्तरिज्जणिबद्धाइ मोदअखंडाइ खादअमाणो एव्व पुणो वि उववणाप्पिआळमूळं पविसिअ तिहुवणळळामभूदं तं ताए सहिं वा अण्णेसमाणो जदा ण पेक्खिस्सं तदा एव्व अच्चंदपिपासाकुळदाए विसाचो विअ इदो तदो भमन्तो देवीए मळ्ळिआवाडिआमज्झट्ठिददिग्घिअं ओदरिअ आकंठापीदसळिळो तक्खणसमाप्पिदसंझो पुणो वि गुळुगुळाअमाणोअळब्भंतरो सणिअं सणिअं इमं संगीदसाळापरिसरं आअदो ह्मि । किं करिस्सं । जाव संझापआसो ण विरमइ तदो पुव्वं एव्व वअस्ससमीवं गच्छाह्मि । [इति परिक्रम्य पुरतो विलोक्य सहर्षं] अहो एसा ताए सही विअ विसण्णमुही का वि आअच्छइ । [निरूप्य] हंत सही एव्व ताए । [विचिन्त्य] कहं अपरिचिदाए इमाए पुडमदो सळ्ळाओ मंह वडिस्सदि । [इति विचिन्तयन् स्थितः ।] (हि हि हि परिपूर्णं मे देवीसमर्पितैर्मोदकखण्डैर्लम्बमानघटिकाकारमुदराभ्यन्तरं स्फुटतीव । अतः पदात्पदमपि

---

१. ‘ उअळ ’ ख. २ ‘ पुडदि ’ क. ३. ‘ पळावन्तो ’ ख.

गन्तुं न पारयामि । न मेऽद्य निद्राप्रसङ्गः क्षणमपि भविष्यति । यतो वयस्य-स्तस्याः प्रत्यक्षदर्शनात् प्रभृति क्षणे क्षणे अन्य इव सम्पद्यमानो ग्रहाविष्ट इव किमपि किमप्यसंबद्धं प्रलपन्नद्यैव तां पुनरपि द्रष्टुं मां पीडयति । अहं पुनः सन्ध्यामपि विस्मृत्योत्तरीयनिबद्धानि मोदकखण्डानि खादन्नेव पुनरप्युपवन-प्रियाळमूलं प्रविश्य त्रिभुवनललामभूतां तां तस्याः सखीं वान्विष्यन् यदा न द्रक्ष्यामि तदैवात्यन्तपिपासाकुलतया पिशाच इवेतस्ततो भ्रमन् देव्या मल्लिका-वाटिकामध्यस्थितदीर्घिकामवतीर्याकण्ठापीतसलिलस्तत्क्षणसमापितसन्ध्यः पुन-रपि गुळुगुळायमानोदराभ्यन्तरः शनैः शनैरिमं सङ्गीतशालापरिसरमागतोऽस्मि। किं करिष्ये। यावत्सन्ध्याप्रकाशो न विरमति ततः पूर्वमेव वयस्यसमीपं गच्छामि । अहो! एषा तस्याः सखीव विषण्णमुखी काप्यागच्छति । हन्त! सख्येव तस्याः । कथमपरिचितया अनया प्रथमतः सल्लापो मम घटिष्यति ।)

[ततः प्रविशति चन्द्रलेखा ।]

चन्द्रलेखा— [सविषादं] किं करिस्सं । जस्सिं खणे सहीए सो महप्पा महाराओ पच्चक्खीकिदो तक्खणं आरहिअ सा हि,

गच्छइ पुणो णिवट्टइ पेक्खइ सुण्णं मुहा परिब्भमइ ।
उपविसइ जप्पइ सअं खिज्जइ मुच्छेदि चेदणं ळहइ ॥१॥

एव्वं एक्कं खणं वि कप्पसहस्सं मण्णमाणाए ठावराणं वि सुहोण्णेअच-रिदाए ताए देवीपरिअणसमाजाचट्ठाणं ण जोग्गं ति मए कुह वि एक्कंदे परहुदिआमेत्तसहाइणिं सहिं णिक्खिविअ इदो तदो परिब्भमीअदि । [विचिन्त्य] होदु । महाराअणम्मसइवो पिठरसम्मो ओळोइदव्वो । [इति पुरोऽवलोक्य सविस्मयं] अह्यो एत्थ किं भणामि देव्वाणुऊलत्तणं । जदो मह्मरणमेत्तसण्णिहाणो एसो । [उपसृत्य] अय्य वंदामि । (किं करिष्ये । यस्मिन् क्षणे सख्या स महात्मा महाराजः प्रत्यक्षीकृतः तत्क्षणमारभ्य सा हि

गच्छति पुनर्निवर्तते पश्यति शून्यं मुधा परिभ्रमति ।
उपविशति जल्पति स्वयं खिद्यति मूर्च्छति चेतनां लभते ॥

एवमेकं क्षणमपि कल्पसहस्रं मन्यमानायाः स्थावराणामपि सुखोन्नेयचरितायास्तस्या देवीपरिजनसमाजावस्थानं न योग्यमिति मया कुत्राप्येकान्ते परभृतिकामात्रसहायिनीं सर्वां निक्षिप्य इतस्ततः परिभ्रम्यते । भवतु महाराजनर्मसचिवः पिठरशर्मा अवलोकितव्यः । अहो! अत्र किं भणामि दैवानुकूलत्वम् । यतः संस्मरणमात्रसन्निधान एषः । आर्य वन्दे ।)

विदूषकः — [सहर्षं स्वगतं]

कहं इमाए मह पुव्वभासणं घडिस्सदित्ति क्खणवाउळत्तणो ।
इअं सअंभासणिआ उवट्ठिआ बुभुक्खिअस्सम्मि जहव्व लड्डुओ ॥२॥

[प्रकाशं] अहिळसिदसिद्धिमदी होहि । एत्तिअम्मि अवरोहमंडळे संचरमाणाणं विळासिणीणं अपरिइदमुही का तुमं ।

(कथमनया मम पूर्वभाषणं घटिष्यतीति क्षणव्याकुलता ।
इयं स्वयंभाषणिकोपस्थिता बुभुक्षितास्ये यथैव लड्डुकः ॥

अभिलषितसिद्धिमती भव । इयत्यप्यवरोधमण्डले सञ्चरमाणानामपि विलासिनीनामपरिचितमुखी का त्वम् ।)

चन्द्रलेखा— [विहस्य] वच्छाए वसुळच्छीए सहअरिं मं अवगच्छदु अय्यो । (वत्साया वसुलक्ष्म्याः सहचरीं मामवगच्छत्वार्यः ।)

विदूषकः— [साक्षेपं] का उण वसुळच्छी । (का पुनर्वसुलक्ष्मीः ।)

---

१. 'हु' ख. २. 'वच्चा' क. ख. ३. 'ळच्ची' क. ख.

चन्द्रलेखा — णं देवीभादुणो अवच्चाकिदआ इअं । (ननु देवी-भ्रातुरपत्यकृतकेयम् ।)

विदूषकः — [स्वगतं] अह्मो बुद्धिसाअरणीदिमाहप्पं । [प्रकाशं] दाणिं कुदो पत्थिदासि । (अह्मो बुद्धिसागरनीतिमाहात्म्यम् । इदानीं कुत्र प्रस्थितासि ।)

चन्द्रलेखा— अय्यसमीवं । (आर्यसमीपम् ।)

विदूषकः — जदि एव्वं कुदो विळंबीअदि । [इति समीपमुपसर्पति ।] (यद्येवं कुतो विलम्ब्यते ।)

चन्द्रलेखा— अय्य! सुणाहि [त्ति कण्णे] एव्वं विअ । [इति कथयति ।] (आर्य शृणु [इति कर्णे] एवमिव ।)

विदूषकः — [सहस्तताळं विहस्य] जदि एव्वं उज्जीविदो पिअवअस्सो । एदं अत्थं पिअवअस्सस्स णिवेदिअ जहसमीहिदं संपादेमि । तुमं वि संकेतदेसं उवसप्पेहि । (यद्येवमुज्जीवितः प्रियवयस्यः । इममर्थं प्रियवयस्याय निवेद्य यथासमीहितं सम्पादयामि । त्वमपि सङ्केतदेशमुपसर्प ।)

चन्द्रलेखा— तह । (तथा ।) [इति निष्क्रान्तौ]

प्रवेशकः

[ततः प्रविशति विरहोत्कण्ठितो राजा ।]

राजा— या हि,

दृष्टालेख्यमयी मुधेव तरुणी काप्यद्भुता प्रागभूद्
दिष्ट्याद्योन्मुखपूर्वपुण्यविभवैरारामध्ये मया ।
ज्योत्स्नेन्दोरिव माधुरीव गलिता पीयूषसाराद् भव-
प्लुष्टाजीवकलेव पुष्पधनुषः सैत्यैव सालोकिता ॥३॥

[विचिन्त्य साश्चर्यं]

हन्तासन् कति मे न पुण्यजनयः कत्यद्भुताः सुभ्रुवो
दिव्या वा क्षितिजाः फणीन्द्रकुलजा भुक्तोज्झिता नो मया ।
अद्यालोकनचन्द्रिका नयनयोर्यत् पात्रमासीदियं
साफल्यं त्विदमेव जन्मविततेः किञ्चोत्सवोऽस्यायुषः ॥४॥

[पुनः सवितर्कं]

भावाः सन्तु शतं पटीरकुसुमस्रक्चन्द्रिकापल्लवो-
द्गारालक्तकमन्दमारुतपिकप्राया मनोन्मादकाः ।
यद्वानीदृशकामनीयकमदाः कान्तास्त्वतोऽन्या स्वयं
नैवासेचनकेदृशी क्षितितले कुत्रापि सम्भाव्यते ॥५॥

[इति परितः पश्यन् सस्पृहातङ्कमाकाशे लक्ष्यं बद्ध्वा]

अयि भोः,

---

१. 'दृष्ट्वा' क. २. 'सत्येव' ख.

हहह कलयती मां दर्पकव्याघ्रवक्त्रे
सुमुखि मयि तदा त्वं भाविनी चालपन्ती ।
चकितहरिणशावह्रीकरापाङ्गलीला-
कुवलयितसमीपोद्देशभागा क नु सा ॥६॥

[इति विभावयन् पुनः सविमर्शं]

मन्ये मन्मथ! मन्मनोरथपथे मित्रान्मधोराहृतै-
र्मालत्याः किल मर्मभिर्हिमरुचेः सारोत्तरैः शारदैः ।
सर्वस्वैरपि मन्दमारुतकरादाच्छिद्य सायं हृतै-
रेनामादिरसार्द्रगात्रलतिकां सत्यं भवान् निर्ममे ॥७॥

[स्मृतिमभिनीय सातङ्कपुळकं]

तस्याः किलेदानीम्,

मुखं कमलसन्निभं कुवलयप्रभे लोचने
भ्रुवौ स्मरधनुर्निभौ तुलितविद्रुमश्चाधरः ।
स्मितं त्वमृतसुन्दरं पिकसखी च वाणी मम
स्फुरन्ति हरिणीदृशः पुरत एव हा किं ब्रुवे ॥८॥

मम हि तामिदानीम्,

उदारभ्रूवल्लीमुचितवचनस्मेरवदना-
मुरोजातोत्सेकक्षपितमदहेमाद्रिशिखराम् ।
उरुश्रोणीबिम्बोपमितपुलिनामूरुयुगळी-
क्षताहन्तारम्भाभ्रमुपातिकरां चुम्बति मनः ॥९॥

[मदनव्यथामभिनयन्]

करकलितविपञ्चीं सा रसाद् वादयन्ती
किमपि किमपि गायन्त्यादरान्मां प्रतीव ।
वदनकमलगन्धापातिलोलम्बवीता
पुलकयति तनुं मे मानसं गाहमाना ॥१०॥

[विचिन्त्य मदनावेगमभिनयन् विहस्य] सा हि,

स्वात्मानमेव यदवोचदनङ्गतीक्ष्ण-
नाराचदारणदुरन्तगुरुव्यथार्तम् ।
प्रत्याययच्छतगुणैरधिकां व्यथां मे
मज्जामितामनवधौ विरहाग्निकुण्डे ॥११॥

[इति क्षणमिव स्तिमितः स्थित्वा सचमत्कारं]

चित्रावलोकसमये तरुणी श्रुतादौ
युक्त्या मताथ मनसा परिभाविता च ।
साक्षात्कृताप्यथ पुनः परिभाव्यते चेत्
किं ब्रूमहे मदनतन्त्ररहस्यमीदृक् ॥१२॥

[इति विष्फारिताक्षः परितः पश्यन् सविस्मयं]

सर्वं खल्विदमामनन्ति निगमा ब्रह्मैव नान्यत्त्विति
द्रागारोहति नानुभूतिपदवीमेतद्विचार्यापि मे ।
किन्तु स्मेरमुखं घनस्तननतं ह्रीसात्कृतापाङ्गकं
विद्युत्पिञ्जरमीक्ष्यतेऽखिलमिदं तन्वीमयं किं ब्रुवे ॥१३॥

[इति क्षणमिव स्तिमितः स्थित्वा प्रतीचीं पश्यन्]

सन्ध्यानलं प्रविष्टे पत्यौ पतित इव वारुणीसङ्गात् ।
मीलन्ति पद्मिनीनां गळद्गळिबाष्पाणि पद्मनयनानि ॥१४॥

[सर्वतः पश्यन्] अपि च,

तमःसन्ध्याप्रसाराभ्यां भागयोः कृष्णपिङ्गलम् ।
व्योमेदं व्योमकेशस्य साक्षाद् वपुरिवेक्ष्यते ॥१५॥

किञ्च,

आतप्तकाञ्चनहरिन्मणिमञ्जुसान्ध्य-
रोचिस्तमःपटलिकाभृशरुद्धपार्श्वम् ।
पार्श्वोपविष्टकमलाधरणीमनोज्ञा
श्रीविष्णुमूर्तिरिव विष्णुपदं विभाति ॥१६॥

[उपरिष्टात् पश्यन्]

नभोविपणिमाश्रयन् समयसंज्ञिकापूपिकः
प्रभर्जयति तप्तसान्ध्यरुचिकन्दुपीठे किमु ।
कलिक्षपितमानिनीकुटिलमानशालीन् न चेत्
कथं नु दिवि कीर्यताममलतारलाजावलिः ॥१७॥

अथवा,

सन्ध्याग्निं पुरतो निधाय दिवसः श्यामां निशामुद्वहन्
लाजान् किं विचकार होमसमये शिष्टान् समन्तौद्दिवि ।
दृश्यन्तां कथमन्यथार्धविकचोद्यन्माधवीसुन्दरा-
स्तारा इत्यपदेशतोऽत्र क इवाकस्मान्नभः सर्वतः ॥१८॥

अपि च,

तमोभिरपघनागमे पिहितपूर्वकाष्ठान्तरे
स्फुटन्ति कुटजोद्गमा नभसि शुभ्रताराच्छलात् ।
दृगम्बुरुहसंहतिर्ननु मुधात्वपाथोन्तरे
निमज्जति नटत्यहो चतुरकामिनीकेकिनी ॥१९॥

[क्षणं विचिन्त्य सस्मरणौत्सुक्यं] मम हि,

आनीलकुन्तलभरान्तरदृश्यचारु-
सीमन्तराजिललितं नलिनायताक्ष्याः ।
एतद्विसृत्वरतमःपटलानुषङ्गि
चेतः समुत्कयति सान्ध्यमयूखजालम् ॥२०॥

[इति क्षणं विचिन्त्य] इदमिदानीं मम,

यावद् विमूर्च्छति तमः पिहितार्थजातं
तावद् दृशोरखिलवस्तुषु शक्तिलोपात् ।
पश्यामि तामित इतश्च निरन्तराय-
मत्यद्भुताकृतिमनावरणीयशोभाम् ॥२१॥

अथवा किमुपकृतं तमसा,

प्रागेव मे परमकारुणिकस्मराख्य-
तादृग्गुरोः सदुपदेशवशेन जज्ञे ।
खं वायुरग्निरुदकं पृथिवीति सर्वं
विश्वं लसत्कुचकचं ललनाद्वितीयम् ॥२२॥

---

१. 'तात् कृति' ख.

[सविस्मयं विचिन्त्य] नैवमप्येतत् ।

सुन्दर्यः कति वा न सन्ति भुवने दृष्टाः श्रुता वा मया
नैवं काचन कस्यचित् त्रिजगतीविस्मारिकाभूत् क्वचित् ।
तन्मन्ये कनकस्मयापहतनोस्तस्याः श्रियोद्वेलया
[1]मात यत्किल लाक्षयेव वसनं तत्तन्मयं लक्ष्यते ॥२३॥

[इति विचिन्तयन्नग्रतो दृष्ट्वा सहर्षं]

अयमितः पिठरो विकटोदराद्
विवशनिर्गलितार्धपटावृतः ।
प्रमुदितः किमपि त्वरया स्खल-
न्नभिमुखः समुपैति ममान्तिकम् ॥२४॥

[इति पश्यन् स्थितः ।]

[ततः प्रविशकः विदूषकः ।]

विदूषकः— कहं पिअवअस्सो ताए दंसणक्खणादो आरहिअ खणक्खणविळक्खणो विअ दक्खिअमाणो अघडिदघडणाळद्धळक्खस्स मह समाअमं सग्गदिण्णदिट्ठी उक्कंठिददाए सअं एव्व किं वि किंवि जप्पंतो पमुदिआम्हकेरवअणावळोअणसमुण्णीदकज्जदाए हरिसंचित्थारिदेहिं णअणंजालिहिं आपिवन्तो विअ मं इदो देवीए अक्खसाळापच्चिमम्मि मादुळुंगवेदिआअं ओळंबिअतकेरसाहो चिट्ठइ । [संस्कृतमाश्रित्य] अयं हि,

हृदयनिहितवामाचारुसौन्दर्यसार-
प्लुतिपुळकितगात्रस्त्वा नखादा शिखाग्रात् ।

---

१. ' क्षणेयव ' क.

कुपितमदनमुक्तापुङ्खमयूखजाल-
स्थगित इव समिन्धे मूर्तिशोभैर्ष्ययेव ॥२५॥

ता णं उवसप्पेमि । [इत्युपसृत्य] जेदु पिअवअस्सो । (कथं प्रियवयस्यस्तस्या दर्शनक्षणादारभ्य क्षणक्षणविलक्षण इव दृश्यमानोऽघटितघटनालब्धलक्ष्यस्य मम समागमं मार्गदत्तदृष्टिरुत्कण्ठिततया स्वयमेव किमपि किमपि जल्पन् प्रमुदितास्मदीयवदनावलोकनसमुन्नीतकार्यतया हर्षविस्तारिताभ्यां नयनाभ्यामापिबन्निव मामितो देव्या अक्षशालापश्चिमे मातुलुङ्गवेदिकायामवलम्बिततदीयशाखस्तिष्ठति । तदेनमुपसर्पामि । जयतु प्रियवयस्यः ।)

राजा— [साकूतं पश्यन्] अपि सफलस्ते समारम्भः ।

विदूषकः— [सगर्वं] किं पिठरो खलिअसमारम्भो दिट्ठपुव्वो । (किं पिठरः स्खलितसमारम्भो दृष्टपूर्वः ।)

राजा— यद्येवं तर्हि कुतो विलम्ब्यसे ।

उपवनपादपवर्गे समूलशुष्केऽस्ति किं फलं वृष्ट्या ।
मयि चार्तिमयहृदये सान्द्राश्लेषेऽपि किं फलं तस्याः ॥२६॥

विदूषकः— [स्वगतं] अहो उम्मत्थओ से राआवेसो । होदु । एव्वं [2]कीळिस्सं । [प्रकाशं] भो वअस्स मए ताए सही केवळं चंदळेहा णाम दिट्ठा । (अहो उन्मस्तकोऽस्य रागावेशः । भवतु एवं क्रीडिष्यामि । भो वयस्य ! मया तस्याः सखी केवलं चन्द्रलेखा नाम दृष्टा ।)

राजा— [सादरं] ततः सा किं ममार्तिमवगमिता ।

---

१. 'थव्वो' ख.   २. 'किळिस्सं' क.

विदूषकः— सविसेसं अवगमिदा । किंवि पसण्णमुही कहाव-साणे कदिपएहिं दिवसेहिं महाराअस्स अम्हकेरभट्टिदारिआए अ संविहाणपुव्वं समाअमं णिव्वट्टेमित्ति पदिण्णापुव्वं उत्तवदी । (सविशेषमवगमिता । किमपि प्रसन्नमुखी कथावसाने कतिपयैर्दिवसैर्महाराजस्य अस्मदीयभर्तृदारिकायाश्च संविधानपूर्वं समागमं निर्वर्तयामीति प्रतिज्ञापूर्व-मुक्तवती ।)

राजा— सत्यं परवेदनानभिज्ञो मुग्धवधूजनः । भवतु । ततः सा विलम्बकारणं पृष्टा किमाह ।

विदूषकः— पिआळदोहळपरितुट्ठाए देवीए से उइअं पारि-तोसिअं कप्पेदुं अत्तसमीवं उवणीदा इमं रत्तिं तदो एव्व अहिवस इत्ति । (प्रियाळदोहळपरितुष्टया देव्या अस्या उचितं पारितोषिकं कल्पयितु-मात्मसमीपमुपनीता इमां रात्रिं तत एवाधिवस इति ।)

राजा— [सविषादं स्वगतं] हन्त उचितमस्याः पारितोषिकं कल्पयितुमिति यत्सत्यं विभिन्नमिव मे हृदयम् । [विचिन्त्य] किमिदं वयस्यस्य मद्भावशुश्रुत्सया परिहासजल्पितं स्यात् । अथवा सत्यमिदं परिहासजल्पितमेव । यतः प्रमुदितोऽयं दृश्यते । [प्रकाशं— विदूषकं हस्ते गृहीत्वा] सखे किं तर्हि प्रहृष्ट इवात्थ स्खलितसमारम्भोऽदृष्टपूर्व इति ।

विदूषकः— [विहस्य] कीळाणिमित्तं मए इदं जप्पिअं । मा कुप्पेदु भवं । मा कुप्पेदु भवं । (क्रीडानिमित्तं मयेदं जल्पितम् । मा कुप्यतु भवान् । मा कुप्यतु भवान् ।)

---

१. 'इमं तिरत्ति' ख.

राजा— [सोच्छ्वासं]

अविरतकरयुग्मोन्मुक्तपुष्पायुधास्त्र-
ज्वलदमितहुताशज्वाललीढाखिलाङ्गे ।
मयि शमय निषिञ्चन् सारसाक्ष्याः प्रवृत्ति-
च्छलबहळसुधां द्राग् दुस्सहं मेऽनुतापम् ॥२७॥

विदूषकः— ता सुणाहि जं चंदळेहा सअं एव्व मं कहिदवदी ।
(तच्छृणु यच्चन्द्रलेखा स्वयमेव मां कथितवती ।)

राजा— [सादरं] अवहितोऽस्मि ।

विदूषकः—

आरामम्मि सही चिराहिळसिदं दट्ठूण मुत्तं सअं
पज्जुम्मं विअ पेक्खणीअसुसमं देवीसमब्भच्चिअं ।
आसंग्गेव्व सुहंयुगब्भकुहरासारम्मि जाणादि णो
अप्पाणं ण परं विणिद्दपुळआ विप्फारिदक्खी खणं ॥२८॥

(आरामे सखी चिराभिलषितं दृष्ट्वा मूर्तं स्वयं
प्रद्युम्नमिव प्रेक्षणीयसुषमं देवीसमभ्यर्चितम् ।
आमग्नेव शुभंयुगर्भकुहरासारे जानाति नो
आत्मानं न परं विनिद्रपुळका विस्फारिताक्षी क्षणम् ॥)

राजा— [सरोमाञ्चं] ततस्ततः ।

विदूषकः— तदो अ, साअंसूअअसंखणादसमाकण्णणेण ससं-

---

१. 'किल' क. २. 'सु' क. ३. 'मग्गव्व' क.

भमविणिग्गदेसु तुम्हेसु आदंसणपहं तहव्व ओलोअअंती दंसणपहागोअरेसु अ उदग्गप्पसरंतणिरंतरस्सुपुण्णमुहकंठी क्खलिअपदविण्णासं देवीसमक्खं कहंवि आअछंदी अट्ठाणव्व किंवि किंवि मंतअंती अणाकण्णअंती अहिमुहठिदाणं वि समसुहदुक्खाणं वि अम्हाणं अमिअणिसेअमहुराइ पिअसामवअणाइ असत्ता विअ कहंवि उम्मत्ता विअ परदो दुग्गहाविट्ठा विअ सुण्णा विअ अ जदा संपण्णा तदो अम्हेहिं ईरिसीए देवीसमक्खगमणं तक्केरपरिअणसण्णिहाणावट्ठाणंवा ण जोग्गं ति कुहवि एक्कंदे परहुदिआमेत्तसहाइणिं तं ठाविअ ईरिसेसु कज्जेसु परमचउरस्स तुह अण्णेसणपरा जदा णिग्गमि (स्सं? आ) तदा पदंतरे एव्व सहीए जीविदव्वत्तणेण मुत्तो विअ पुव्वपुण्णरासी तुमं ओलोइदो। ता इदो वरं कालक्खेवासहणाए ताए अअं ळद्धोवाओत्ति मह कहिअ तुवरमाणव्व सहीसमीवं गदेत्ति [कर्णे एवमिव।] (ततश्च सायंसूचकशङ्खनादसमाकर्णनेन ससंभ्रमाविनिर्गतेषु युष्मासु आदर्शनपथं तथैवावलोकयन्ती दर्शनपथागोचरेषु चोदग्रप्रसरन्निरन्तराश्रुपूर्णमुखकण्ठी स्खलितपदविन्यासं देवीसमक्षं कथमपि आगच्छन्ती अस्थान एव किमपि किमपि मन्त्रयन्ती अनाकर्णयन्ती अभिमुखस्थितानामपि समसुखदुःखानामपि अस्माकममृतनिषेकमधुराणि प्रियसामवचनानि अमत्या इव कथमप्युन्मत्ता इव परतो दुर्ग्रहाविष्टा इव शून्या इव च यदा सम्पन्ना, ततोऽस्माभिरीदृश्या देवीसमक्षगमनं तदीयपरिजनसन्निधानावस्थानं वा न योग्यमिति कुत्राप्येकान्ते परभृतिकामात्रसहायिनीं तां स्थापयित्वा ईदृशेषु कार्येषु परमचतुरस्य तवान्वेषणपरा यदा निर्गता तदा पदान्तरे एव सख्या जीवितव्यत्वेन मूर्त इव पूर्वपुण्यराशिस्त्वमवलोकितः। तदितः परं कालक्षेपासहनायास्तस्याः अयं लब्ध उपाय इति मम कथयित्वा त्वरमाणेव सखीसमीपं गता इति।)

राजा— [स्वगतं] यथाभिलषितं मय्यनुगृह्णाति पद्मनाभदेवः। [प्रकाशं—विदूषकस्य च्छोटिकां दत्त्वा समोदं]

अप्यलभ्यं सुरैर्वापि मया यदभिलष्यते ।
मन्त्रिणो नीतियोगाद्वा तदा तदुपभुज्यते ॥२९॥

विदूषकः— [स्वगतं] तारिसो वि सइवप्पओओ मं विणा फळं ण दंसइस्सदित्ति दिढं जाणादि वअस्सो । [प्रकाशं] दाणिं पसण्णो होहि । (तादृशोऽपि सचिवप्रयोगो मां विना फलं न दर्शयिष्यतीति दृढं जानाति वयस्यः । इदानीं प्रसन्नो भव ।)

राजा— [सानुमोदं]

खर्जूरमूलशशिकान्तशिलोपक्लृप्त-
सुश्लक्ष्णकुट्टिमतटीं लवलीपरीताम् ।
आनीयते मम सखी त्वरया युवां च
तं देशमाप्नुतमिति प्रजगे प्रियाळ्या ॥३०॥

[विचिन्त्य] सखे देवीपरिजनसम्भावनाविदूरेण केन पथा उपवनप्रत्यक्-सीमापर्यन्तावस्थितस्य तस्य महीरुहस्य मूलतलोपनिबद्धां दिव्यौषधि-लतामण्डपिकासमुज्ज्वलितां शशिशिलावेदिकां सम्भावयावः ।

विदूषकः— किं सण्णिहिदेण देवीपरिअणेण करीअदि । जदो तुह मुत्तं विअ अणुऊळभाअहेअं संतमसजाळं सव्वदो दिट्ठिं कदत्थेइ । ता जहपुव्वं एव्व परिचिदद्मेण पहेण उववणं उवसप्पम्ह । (किं सन्निहितेन देवीपरिजनेन क्रियते । यतस्तव मूर्तमिवानुकूलभागधेयं सन्तम-सजालं सर्वतो दृष्टिं कदर्थयति । तद् यथापूर्वं परिचिततमेन पथोपवनमुप-सर्पावः ।)

राजा— [दिशः पश्यन्]

आवृण्वन् विदिशो दिशश्च परितो द्यावापृथिव्यौ लिह-
न्नुत्सेकेन विलासिनीजनमनःखेदं समुन्मूलयन् ।
स्वैरिण्याश्चिरकालसम्भृतमिथःसंकेतमावेदयन्
कोऽप्यद्धैष तमस्तमालविटपी रुन्धे प्रसारं दृशाम् ॥३१॥

अपि च,

दिवाभीतदृशां सिद्धाञ्जननीलाश्मसम्पुटी ।
स्वैरिणीहृन्मयूरीणां तमः कादम्बिनी[1] यतः ॥३२॥

तदादेशयोपवनमार्गम् ।

विदूषकः[2]— [पृष्ठतोऽनुसरन्] इदो इदो एदु भवं । [इति पुरो गच्छति ।]

राजा— [विहस्य] धिङ् मूर्ख! कथमपथे मार्गमादिशसि । एवमितो दक्षिणभागेनादेशय । [इति स्वयं पुरो व्रजति ।]

विदूषकः— [पृष्ठतोऽनुसरन्] वुड्ढो खु अहं । सुलोअणं अवे-क्खादि[3] मे चक्खू । ता तुमं अणुगमिस्सं । [इत्युभौ गत्वोपवनप्रवेशं नाटयतः ।] (वृद्धः खल्वहम् । सुलोचनमपेक्षते मे चक्षुः । तत्त्वामनुगमिष्यामि ।)

राजा— [पुरः पश्यन्]

बहिरेव दृशौ रुन्धन्नन्धकारो महानयम् ।
तमालवीथीगर्भेऽत्र कथं न द्विगुणायताम् ॥

---

१. 'दम्बरी यतः' ख. २. 'कः—इदो' ख. ३. 'क्खि' क.

[इति कथञ्चिद् गच्छन् विचिन्त्य सविस्मयं]

मुनेरिव मुहुर्मुहुर्विषयवासना मानसं
  तमःपटलिका दृशोः प्रसरणं पिधत्ते बलात् ।
स योगबलमाश्रयन्निव तदन्तराध्मातधीः
  सतीव पथि सञ्चराम्यविगणय्य तामप्यहम् ॥३४॥

सखे कथमीदृशेऽन्धकारे प्रिया समीहितदेशमायास्यति ।

विदूषकः – णहि भअं कामोपहददहिअआणं सुणीअदि । (नहि भयं कामोपहतहृदयानां श्रूयते ।)

[ततः प्रविशति परभृतिकान्वास्यमाना विरहखिन्ना नळिनी-
शयनमधिशयना वसुलक्ष्मीः ।]

वसुलक्ष्मीः – मा खु मा खु पज्जलिदस्स वम्महववदेसंतरिदस्स महग्गिणो उवसमणत्थं अज्जधाराजदुगुग्गुलूहिं उवसिंचह । [इति पुरोदेशाद्धिमजलादीन्यपनेतुकामा पाणिभ्यामुरः स्पृष्ट्वा] हळा पेक्खह कुदो तुम्हेहिं णिक्खित्ता उवसमणसामग्गी सव्वा वि पज्जळिदा महग्गिणा । (मा खलु मा खलु प्रज्वलितस्य मन्मथव्यपदेशान्तरितस्य महाग्नेरुपशमनार्थमाज्यधाराजतुगुग्गुलुभिरुपसिञ्चत । हला प्रेक्षध्वं कुतो युष्माभिर्निक्षिप्ता उपशमनसामग्री सर्वापि प्रज्वलिता महाग्निना ।)

परभृतिका – [ससम्भ्रममाकाशे] हंजे चूदळदिए महुअरिए अच्चाहिदं पिअसहीए उण्णीअदि । जदो मए तावोवसमणत्थं अप्पिदाइ तुम्हेहिं आणीदाइ हिमजळचंदणद्दवमिणाळाइ अज्जधाराइन्तित्ति । मण्णे इमाइ चुण्णसेसत्तणं आवण्णाइ । (हञ्जे चूतलतिके, मधुकरिके,

अत्याहितं प्रियसख्या उन्नीयते । यतो मया तापोपशमनार्थमर्पितानि युष्माभिरानीतानि हिमजलचन्दनद्रवमृणालानि आज्यधारायन्त इति । मन्ये इमानि चूर्णशेषतामापन्नानि ।)

[ततः प्रविशतो मृणालादीन्यादाय चेट्यौ ।]

चेट्यौ [ससंभ्रमं] हळा परहुदिए णं इमाइ सरसाइ मिणाळाइ । एदेहिं पच्छादेहि थणदेसे तावोवसमणणिमित्तं सहिं । [इति मृणालान्यर्पयतः ।] (हला परभृतिके नन्विमानि सरसानि मृणालानि । एतैः प्रच्छादय स्तनदेशे तापोपशमननिमित्तं सखीम् ।)

परभृतिका— [आदाय वसुमक्ष्मीमुपनयन्ती सविषादं] अच्चरिअं अच्चरिअं एदाइ इमाए सण्णिहाणमेत्तेणव्व दज्झमाणाइ चुण्णसेसत्तणं आवण्णाइ । (आश्चर्यमाश्चर्यम् । एतान्यस्याः सन्निधानमात्रेणैव दह्यमानानि चूर्णशेषतामापन्नानि ।)

वसुलक्ष्मीः— [सास्रं]

हहह ण सम्मइ तात्र तुम्हाणं सीअळोवआरेहिं ।
फळइ दु सव्वं तम्मे दुद्धं विअ सप्पिणीदिण्णं ॥३५॥

(हहह न सम्म्रियै तावद् युष्माकं शीतळोपचारैः ।
फलति तु सर्वं तन्मे दुग्धमिव सर्पिणीदत्तम् ॥)

परभृतिका— [आत्मगतं] सच्चं उत्तं सहीए । जं तह तह पडिकरिज्जमाणं वि से तावजाळं सहस्सगुणाहिअं संपज्जइ । ता ईदिसे

---

१. 'तुवो तु' क.

अच्चाहिदसमए चंदळेहासण्णिहाणेण होदव्वं । ता एव्वं करिस्सं । [प्रकाशं] हंजे चूदळदिआ महुअरिआओ ईरिसावत्थं सहिं चंदळेहाए णिवेदिअ इह तं आणेह । (सत्यमुक्तं सख्या । यत्तथा तथा प्रतिकार्यमाणमपि अस्यास्तापजालं सहस्रगुणाधिकं सम्पद्यते । तदीदृशे अत्याहितसमये चन्द्रलेखासन्निधानेन भवितव्यम् । तदेवं करिष्यामि । हञ्जे चूतलतिका मधुकरिके ईदृशावस्थां सखीं चन्द्रलेखायै निवेद्य इह तामानयतम् ।)

चेट्यौ--- इदो आअदे अम्हे ताए समं । [इति निष्क्रान्ते ।] (इत आगते आवां तया समम् ।)

वसुलक्ष्मीः --- [सास्रं] हा ताद हा अज्जु ! एसा तुम्हाणं तेहिं तेहिं ळाळणविसेसेहिं उच्चंगवड्ढिआ तारिसप्पेमेक्कभाअणं अणासस्सणिज्जासंसिणी वच्चा वसुळच्छी अपुण्णमणोरहा असमक्खं वो विपज्जइ । [इति उत्थाय मलयानिलाभिमुखी मणिशिलापट्टमधिशेतुमिच्छति ।] (हा तात हा आर्ये ! एषा युष्माकं तैस्तैर्लालनविशेषैरुत्सङ्गवर्धिता तादृशप्रेमैकभाजनं अनाश्वासनीयाशंसिनी वत्सा वसुलक्ष्मीः अपूर्णमनोरथा असमक्षं वो विपद्यते ।)

परभृतिका--- [ससम्भ्रमं] हद्धि हद्धि मा एव्वं साहसं कुणंती इत्थिआकुळदूमणी होहि । इदो पत्ता संपुण्णकज्जसिद्धी चंदळेहा । [इति निवार्य आकाशे] हळा चंदळेहे अकाळणे अत्तवावादिणी विपज्जइ दे सही । ता तुरिअं संभावेहि णं । [इत्युच्चै क्रोशति ।] (हा धिक् हा धिक् ! मैवं साहसं कुर्वन्ती स्त्रीकुलदूषणी भव । इतः प्राप्ता संपूर्णकार्यसिद्धिश्चन्द्रलेखा । हला चन्द्रलेखे अकारणे आत्मव्यापादिनी विपद्यते ते सखी । तत् त्वरितं सम्भावयैनाम् ।)

---

२. 'महुरि' ख -

[ततः प्रविशति संभ्रान्ता चन्द्रलेखा ।]

चन्द्रलेखा— सहि! इदो पत्तम्हि गहिदकज्जसिद्धी तुमं संभावेदुं। [इति वसुलक्ष्मीमुपसर्पति ।] (सखि इतः प्राप्तास्मि गृहीतकार्यसिद्धिस्त्वां सम्भावयितुम् ।)

वसुलक्ष्मीः— [उत्थाय] अवि सच्चं एदं, पुणो पुणो भणाहि। [इति सखीमालिङ्गय] ता कुदो विळंबीआदि । कुदो गच्छम्ह । [इति परिभ्रमति ।] (अपि सत्यमिदं, पुनः पुनर्भण । तत्कुतो विळम्ब्यते। कुतो गच्छामः ॥)

चन्द्रलेखा— [सस्मितं] णं इमिणा फळिआसिळाजाळकप्पिददाए गाढंधआरे वि फुडळक्खेण रुक्खरहिदेण धिण्णिअमग्गेण उववणपेरंतट्ठिदखज्जूरमूळट्ठिदमहोसहिळवळिआपरिवुदससिमणिवेदिआअं उपसप्पम्ह । [इति सर्वाः परिक्रम्योपवनप्रवेशं नाटयित्वा त्वरिततराः प्रसर्पन्ति ।] (नन्वनेन स्फटिकशिलाजालकल्पिततया गाढान्धकारेऽपि स्फुटलक्ष्येण वृक्षरहितेन धिष्ण्यमार्गेण उपवनपर्यन्तस्थितखर्जूमूलस्थितमहौषधिलवलिकापरिवृतशशिमणिवेदिकायामुपसर्पामः ।)

परभृतिका— [पुरोऽवलोक्य सविस्मयं] हळा एत्तिअम्मि गाढंधआरे पज्जळन्तमहोसहिप्पहादिवसाअमाणसपेरंतब्भंतरस्स ससिसिळावेदिअत्थळस्स किं वण्णेमो सोभग्गं । (हला एतादृशे गाढान्धकारे प्रज्वलन्महौषधिप्रभादिवसायमानसपर्यन्ताभ्यन्तरस्य शशिशिलावेदिकास्थलस्य किं वर्णयामः सौभाग्यम ।)

वसुलक्ष्मीः— [सस्पृहं पश्यन्ती सातङ्कं] हळा एत्थ कोवि ण दीसइ । किं एदं । (हला अत्र कोऽपि न दृश्यते । किमेतत् ।)

चन्द्रलेखा— [सस्मितं] णं तमालवीहिआपहेण तेहिं आअं-तव्वं । अम्हे अत्थ पुडमं पविसिअ पडिक्खमाणाओ महाराअं संभा-वेम्ह । [इति प्रविश्य वेदिकायामुपविशन्ति ।] (ननु तमालवीथिकापथेन तैरागन्तव्यम् । वयमत्र प्रथमं प्रविश्य प्रतीक्षमाणा महाराजं सम्भावयामः ।)

राजा— [पुरोऽवलोक्य सहर्षं] ननु प्राप्ताः स्मः कथञ्चित् खर्जूर-वनस्पतिम् ।

पर्यन्तसान्द्रसुमहौषधिवल्लिमाला-
दीप्यत्प्रदीपकलिकाशतदीप्रमूलः ।
स्विद्यन्निशाकरमणिप्रवरोपक्लृप्त-
सुश्लक्ष्णकुट्टिमतटः स्वदते तरुर्मे ॥३६॥

अपिच,

उद्यानलक्ष्म्यास्त्वानीलतमालकबरीभृतः ।
स्फुरन्मूर्तिरयं मध्ये दीप्रसीमन्तरत्नति ॥३७॥

विदूषकः— [आकर्ण्य] भो वअस्स एत्थ ळदाणिकुंजंतरे संळावो विअ सुणीअदि । खणं तुण्हिं होहि । (भो वयस्य लतानिकुञ्जान्तरे संलाप इव श्रूयते । क्षणं तूष्णीं भव ।)

राजा— एवमस्तु । [इति निभृतमुपसर्पतः ।]

वसुलक्ष्मीः— [परितो विलोक्य सभयविषादं]

मण्णे मम्महणत्थं तुमं अणंगो सहिं सहीकदुअ ।
उववणपावणमुदिओ दिढोपविट्ठो धणुं परामिसइ ॥३८॥

(मन्ये मन्मथनाथं त्वामनङ्गः सखीं सखीकृत्वा ।
उपवनप्रापणमुदितो दृढोपविष्टो धनुः परामृशति ॥)

चन्द्रलेखा— [सस्मितं] जह तह वा उक्कंठिदाए कालक्खेओ संपादणिज्जो त्ति इमं विवित्तरमणिज्जं देसं पाविदासि । (यथा तथा वा उत्कण्ठितायाः कालक्षेपः सम्पादनीय इतीमं विविक्तरमणीयं देशं प्रापितासि ।)

राजा— [विहस्य] स्थानेऽतिशङ्कानुरूपमुत्तरितं सख्या । [वसुलक्ष्मीं पश्यन् स्वगतं]

हहह निहता धातुः सृष्टौ महत्यपि चातुरी
हहह मघवा साम्राज्यं स्वं शुचैव जिहासति ।
हहह कमला क्वापि स्थैर्यं न विन्दति लज्जया
नियतमतनोच्छिल्पी[1] मेनामुदीक्ष्य तु सुन्दरीम् ॥३९॥

[पुनः सोत्प्रासं]

आसीदग्रेऽवलग्नाम्बरमिदमतनोरात्मयोनेर्मृगाक्ष्या
निःश्वासात्मा ततोऽभूत्पवनशिशुरतो ज्योतिरासीत् स्मिताख्यम् ।
आपो लावण्यसंज्ञास्त्वमुत उदभवन्नाभ्य आसीत्तु पृथ्वी
नूनं भोगैकहेतुर्घनजघनतटी श्राम्यते यत्र लोकैः ॥४०॥

[इति क्षणं विचिन्त्य पुनः सवितर्कं]

सत्यं सादरमामनन्ति निगमाः सर्गादिकाले ह्यपः
सृष्ट्वेत्यादि यदेतदद्य सुचिरात् संपन्नमेनामनु ।

---

१. 'मनोशिल्पी' क. 'मतनोशिल्पी'

यल्लावण्यमपीरपोऽतनुरसौ सृष्ट्वा स्वतेजोऽदधा-
दास्वासीत्तदुरोजमण्डलमुधा हेमाण्डमुद्यत्स्मरम् ॥४१॥

[इति विमृशन् सश्लाघं]

यत्सृष्टौ हेमभूभृद्द्वयमनुरजनि ज्योत्स्नया चारुबिम्बं
शीतांशोः पूर्णमास्ते विकसितकमलालोलभृङ्गाभिरामम्।
रम्भे किंचोर्ध्वमूले सरसिजयुगळीं पञ्चपत्रां सुवाते
काळिन्दी च स्रवन्ती दिवि किल स कथं वर्ण्यतां पुष्पधन्वा ॥४२॥

विदूषकः— तदो किं विळंबीअदि। (ततः किं विळम्ब्यते।)

राजा— [सकौतुकं] शृणुमः परस्तादपि।

वसुलक्ष्मीः— [सोद्वेगं] हळा ईरिसदुक्कराणत्थणिक्करुणकारिणी तुमं किं किं वा मं दुक्खं ण पावेसि। [इति चकिता मुखं परावर्तते।] (हला ईदृशदुष्करानर्थनिष्करुणकारिणी त्वं किं किं वा मां दुःखं न प्रापयसि।)

परभृतिका— [सभयाशङ्कं स्वगतम्] जदि एव्वं एदं भवे तदो एत्थ एव्व सच्चं सहि मरिस्सदि। [विचिन्त्य] अहवा ण हु एदं चंदळेहाए सिविणए वि संभावीअदि। (यद्येवं भवेत्ततोऽत्रैव सत्यं सखी मरिष्यति! अथवा न खल्वेतत् चन्द्रलेखया स्वप्नेऽपि सम्भाव्यते।)

राजा— [सकौतुकं गच्छन्]

सुमुखि विसृज मिथ्याभाषिणीं चन्द्रलेखां
भज जनमिममेकं प्रेमविस्रम्भपात्रम्।

---

१. 'जनीज्यो' ख. २. 'भृङ्गा'

तव सकरुणवीक्षास्नेहरागार्द्रवादा:
सुदति नहि विशीर्यन्त्वाश्रयालाभदोषात् ॥४३॥

[इत्यभिमुखं गत्वा पाणिं गृह्णाति । सर्वाः ससम्भ्रममुत्तिष्ठन्ति ।]

विदूषकः — (अनुसृत्य) होदि चिरदरुक्कंठिओ तुए पच्चक्खवम्महो विअ सुंदरो अणासंसणिज्जो देव्वविळासिणीणं वि तुह रूवळावण्णसुंदरत्तणाणुरूवो इदो वरो मए समप्पिदो। पडिच्छ णं। (भवति! चिरतरोत्कण्ठितस्त्वया प्रत्यक्षमन्मथ इव सुन्दरोऽनाशंसनीयो देवविलासिनीनामपि तव रूपलावण्यसुन्दरत्वानुरूपः इतो वरो मया समर्पितः। प्रतीच्छैनम्।)

वसुलक्ष्मीः — (ससंभ्रमसहर्षगद्गदं) हळा किं असरणा मुत्तम्हि तुम्हेहिं। [इति कथञ्चिदात्मानं मोचयित्वा सख्योः समीपमुपसृत्य भयस्तिमितवचना पराङ्मुखी तिष्ठति।] (हळा किमशरणा मुक्तास्मि युष्माभिः।)

राजा — [सहर्षं स्वगतम्]

विकारः कोऽप्यन्तर्मुषितकरणग्राममहिमा
सुखाद्वैताशंसी परिहृतपरिच्छेदलघिमा।
विसर्पन् सर्वाङ्गे कबळितचतुर्वर्गगरिमा
मनोवृत्तिं मुष्णन् मदयति ममात्मानमपि च ॥४४॥

(पराङ्मुखीं वसुलक्ष्मीं प्रति)

शशिमुखि वदनं चेन्मे पराचीकरोषि
द्विगुणमियमितो मे कौतुकं संविधत्ते।
कनकफलकमुग्धस्निग्धगौरापराङ्गो-
ल्लिखितमनसिजाज्ञा वर्णलेखेव वेणी ॥४५॥

---

१. 'गुणिमिय' क. 'गुमिय' ख. २. 'खये' क.

अपिच,

नितम्बपुलिनोज्ज्वला तव पराङ्गजम्बूनदी
न कस्य मुदमावहेद् यमुनयैव वेण्याश्रिता ।
वियोगसमये त्वया मम हृदि स्मृताया व्यधाद्
व्यथां स्मरविपाटितासिलतहेमकोशो यथा ॥ ४६ ॥

अपिचेयम्,

विरागतादर्पजुषां धृतात्मनां
मनस्तुरङ्गस्य वशीकृतिक्षमा ।
कशैव या वेणिमिषेण भासते
कुवेगकुप्यत्कुसुमास्त्रसादिनः ॥ ४७ ॥

[इत्यनुसरति ।]

चन्द्रलेखा— [वसुलक्ष्मीमभिमुखीकृत्य] हळा,

अणिसं हिअअणिळीणो पीडिअवंदो तुमं दु जो मअणो ।
पीडेहि णं वि मुत्तं पुरदो वक्खोजंतणेण दिढं ॥ ४८ ॥

(हला,

अनिशं हृदयनिलीनः पीडितवांस्त्वां तु यो मदनः ।
पीडयैनमपि मूर्तं पुरतो वक्षोजयन्त्रणेन दृढम् ॥)

राजा— [विमृश्य सादरं वसुलक्ष्मीं प्रति]

---

१. 'तासितहे' ख. २. 'जुषो धृता' क. ख.
३. 'जजंतिणेण' क. ख. ४. 'वसुलक्ष्मीं पश्यन् विमृश्य सानन्दं' क.

विप्राः पश्चिमबुद्धयः सुदति ! यत् सृष्ट्वा स्वयं सन्निधि-
र्नाबैदुत्तरसृज्यवस्तुसदृशं स्रष्टुं तु पूर्वं जगत् ।
अद्येमावतनू क्षणक्षणकृतोज्जृम्भौ कुचौ कातरः
पश्यन् खिद्यति हन्त पुष्करमपर्याप्तान्तरं संविदन् ॥ ४९ ॥

[पुनः स्वगतम्]

सत्यं साहसिकाः क्षतानृतभया धीराः कवीन्द्रा इति
प्रत्यक्षं तुलयन्ति ये तु सुदृशां शैलैरसारैः कुचान् ।
क्वैते वज्रकठोरकान्तनखरोद्भेदेऽपि हृष्यन्ति ये
क्वान्ये वज्रभयाद् विगाह्य जलधिं जीवन्ति ये कातराः ॥ ५० ॥

[प्रकाशं वसुलक्ष्मीं प्रति] अयि सुन्दरि,

प्रहिणु रजतभूभृत्प्रान्तरूढाच्छतृण्या-
कबळनरसिकस्वर्धेनुदुग्धातिगौरान् ।
स्मितरुचिपरिपुष्टानादरापाङ्गसारा-
नलनुशरविदग्धो येरहं निर्वृणोमि ॥ ५१ ॥

[इति मुखं[2]सुन्नयति ।]

वसुलक्ष्मीः— [परिहृत्य सप्रेमासूयं] हळा पिअकळत्तो महाराओ किं मए असरणाए [3]देवीं पुणो वि कुप्पिस्सदि । (हला प्रियकलत्रो महाराजः किं मयाशरणया देवीं पुनरपि कोपयिष्यति ।)

राजा— [सखेदव्रीळं]

---

१. 'सुदिति' क. ख. २. 'खमझयति' ख.
३. 'देवी' क. ख.

यदि परमनुनीयाभ्यर्चितस्तत्प्रियः त्वां
तव पदपरिचर्यानित्यसक्तोऽनुनेता ।
दरचलितलसद्भ्रूव्यञ्जिताज्ञानुसारी
नलिनमुखि ! शपे ते ब्रूहि कस्ते भवामि ॥ ५२ ॥

विदूषकः — [विहस्य] णं फुडं एदं दआणिज्जो किंकरो त्ति । (ननु स्फुटमेतद् दयनीयः किङ्कर इति ।)

सख्यौ— अदो वरं किं भणसि । अण्णसंकंतहिअआ पुरुसा बहुसो कळत्तेसु परमचउरा होंदित्ति णं सव्वजणीणं । (अतः परं किं भणसि । अन्यसङ्क्रान्तहृदयाः पुरुषा बहुशः कळत्रेषु परमचतुरा भवन्तीति सार्वजनीनम् ।)

विदूषकः — [बहिः पश्यन्] हन्त वसुळक्खीवअणं विअ पुव्वदिसामुहं वि विम्हेरं दीसइ । ता इदो अम्हे माळदीवाडिअं गदुअ दरदळिआइ कुसुमाइ ओचिणुम्ह । जेहिं पिअकुसुमो वअस्सो तुम्हाणं सहीअ उवट्ठादव्वो । (हन्त वसुलक्ष्मीवदनमिव पूर्वदिशामुखमपि विस्मेरं दृश्यते । तदितो वयं मालतीवाटिकां गत्वा दरदळितानि कुसुमान्यवचिनुमः यैः प्रियकुसुमो वयस्यो युष्माकं सख्या उपस्थातव्यः ।)

सख्यौ— तह । [इति जिगमिषतः ।] (तथा ।)

वसुलक्ष्मीः— हळा, कहं मं एकाइणिं परिच्चअह । [इति स्वयं पुरो गच्छति ।] (कथं मामेकाकिनीं परित्यजथ ।)

---

२. 'चहह' क. ख.

राजा— [निवार्य]

न बहिरिममिदानीं दर्शय त्वन्मुखेन्दुं
सुदति बहिरुदश्चत्पूर्वभूभृन्निकुञ्जात् ।
परिभवपरितापाक्रान्तिदीर्णस्त्रपार्त-
स्तव धुरि कथमिन्दुस्तिष्ठतात् क्लाम्यतां वा ॥ ५३ ॥

[इति साकूतं पश्यन् वसुलक्ष्मीं प्रति] अयि पश्य पश्य । अयं हि,

नियम्य परतः करैस्तिमिरसञ्चयं रागवान्
बलाद् धुरि निपीडयन् पृथुपयोधराभ्युन्नतिम् ।
शशी तरळतारकं विकसदाकुलेन्दीवरं
प्रसन्नमिह चुम्बितुं लषति पौरुहूतीमुखम् ॥ ५४ ॥

[वसुलक्ष्मीर्लज्जयाधोमुखी तिष्ठति ।]

चन्द्रलेखा – हळा दाणिं णीसंकं पेक्खणीओ भअवं मिअंको ।
(हला इदानीं निःशङ्कं प्रेक्षणीयो भगवान् मृगाङ्कः ।)

वसुलक्ष्मीः— [सकौतुकं प्राचीं विलोक्य जनान्तिकं] हळा, पेक्ख अब्भुदिओ एसो,

चक्कंगणाविरहवह्निसमग्गमुत्ती
मुत्तं चओरपडळीकिदपुव्वपुण्णं ।
किं चांधआरविसमुच्छिदळोअदिट्ठी
संजीवणोसहिगुडी भअवं मिअंको ॥ ५५ ॥

---

१. 'म ... चु' क, 'समुह' ख. २. 'घुडी' क. 'पुडी' ख.

(हलं पश्य, अभ्युदित एषः,

चक्राङ्गनाविरहवह्निसमग्रमूर्तिः
मूर्तं चकोरपटलीकृतपूर्वपुण्यम् ।
किञ्चान्धकारविषमूर्च्छितलोकदृष्टि-
सञ्जीवनौषधिगुडी भगवान् मृगाङ्कः ॥)

सख्यौ – [सहर्षं] अवि सुहाअदि दे तिहुवणाणंदणो भअवं मिअळंछणो । (अपि सुखायते ते त्रिभुवनानन्दनो भगवान् मृगलाञ्छनः ।)

राजा — [सकौतुकं पश्यन् वसुलक्ष्मीं प्रति ।] सुमुखि पश्य पश्य,

प्राच्याः कौतुकपद्मरागमुकुराकारः पुरस्तादयं
पश्चादाकुलभृङ्गचारुविकसल्लीलारविन्दप्रभः ।
किञ्चापाण्डुकपोलपाळिमधुरश्चन्द्रो ललाटस्थली-
मध्यालङ्करणाभ्रचारुतिलकोदारः क्रमाज्जृम्भते ॥ ५६ ॥

विदूषकः — [राजानं प्रति– संस्कृतमाश्रित्य] वयस्य पश्य पश्य,

दुग्धाब्धेररविन्दनाभशयनात् त्वद्रूपगूढात्मनः
कंसारेः पृथुबाहुलालितमहीमालोकयन्त्याः श्रियः ।
कोपेनारुणमाननं दरचलद्भ्रूमुग्धमालोक्यते
प्रायः पूर्णविभावरीशशशयत् प्रत्यग्रबिम्बच्छलात् ॥ ५७ ॥

राजा — [सशिरःकम्पं विदूषकं प्रशस्य] साधु वयस्य महाकविरसि ।

विदूषकः— सव्वं वअस्सस्स सण्णिहाणविसेसेण । (सर्वं वयस्यस्य सन्निधानविशेषेण ।)

राजा— [चन्द्रं दृष्ट्वा सर्वतः पश्यन् सानुशयं]

सर्वज्ञेनापि हाहा त्रिभुवनवपुषा गौरवादम्बिकाया
दग्ध्वाजीवि स्मरो यत् कृतमिदमसमीक्ष्यैव यो मत्सरेण ।
लक्षीकृत्य त्रिलोकीमुदयगिरितटादौषधाक्तं शतघ्न्या
सन्तप्तं लोहमिन्दुच्छलममुचदतः क्षुद्रलोहैः प्लुतं भैः ॥ ५८ ॥

[पुनः सस्पृहं पश्यन्]

नूनं चण्डमयूखचण्डकिरणैरामर्ध संप्लोषितां
मध्याह्ने दयितां नु नीलनळिनीमामीलितां मूर्च्छया ।
कृत्वाङ्के मृदुभिः करैरभिमृशन्नाश्वासयत्यादरा-
दङ्कच्छद्मनिगूहितामिव भयाद् रात्र्या सहिष्या विधुः ॥ ५९ ॥

[पुनः पश्यन्] अयि प्रिये,

पश्यायं कुमुदादृतः परिचितस्ताराध्रुवा च श्रिया
पाथोधिं शशिराडपस्तरळयन् सल्लक्ष्मणान्वादृतः ।
उल्लङ्घ्याम्बुधिमावहन् जनदृशां प्रीतिं सुवेलाचलं
क्रामन् सन्तमसाख्यराक्षसकुलं निःशेषयत्यूर्जितम् ॥ ६० ॥

[वसुलक्ष्मीं पश्यन् साक्षेपं]

बिम्बत्वं विधुमण्डले त्वदतुलाभिख्योष्ठबिम्बोन्मिष-
न्माधुर्यानुकृतिप्रसक्तिविरहाद् बिम्बोष्ठि! भूयात् कुतः ।
रागाच्चेत् क्षणिकान्न सोऽप्यविकलस्तन्वङ्गि यस्तेऽधरे
तन्मन्येऽस्य गुणानुषङ्गचपलैर्धूर्तैर्जगद् वञ्च्यते ॥ ६१ ॥

---

१. ‘क’ ख.

[सदैन्यं]

द्रवति सुमुखि जिह्वा त्वन्मुखास्वादनोत्का
स्फुरति तु करयुग्मं त्वत्कुचामर्दनोत्कम् ।
लषति कषितुमङ्गैस्तावकैर्मेखलाङ्गं
सफलय मदभीष्टं कृत्स्नमार्द्रावलोकैः ॥ ६२ ॥

[इति मुखमुन्नमयति ।]

परिजनाः— इदो अम्हे माळदीवाडिअं साधयम्ह । [इति शनैरन्यतो गच्छन्ति ।] (इतो वयं मालतीवाटिकां साधयामः ।)

[नेपथ्ये कलकलः ।]

[सर्वे शृण्वन्ति ।]

[पुनर्नेपथ्ये]

देवः पट्टाभिषिक्तः प्रविशति नगरीं येन वध्वीन्द्रमौलि-
र्यस्मिन् विश्राम्यति द्राग् वनगजमृगयागर्तपातोद्धृतिर्वा ।
अब्धेरुन्मज्ज्य तिष्ठंस्तट इव गिरिराणन्दनो यश्च भायाद्
इभः सोऽयं प्रतोळ्यां प्रविचलति गजग्रामणीर्ध्वस्तबन्धः ॥ ६३ ॥

वसुलक्ष्मीः— [सातङ्कं] परित्ताअदु परित्ताअदु मं असरणं महाराओ । [इति संभ्रान्ता राजानमालिङ्गति ।] (परित्रायतां परित्रायतां माम् अशरणां महाराजः ।)

राजा— [सानन्दं]

सरभसमतिवेलत्रस्यदाघूर्णिताक्षं
हृदि हठपरिरम्भामग्नवक्षोजरम्यम् ।
अवशचलितबाहामुद्रणामानितांसं
कुतुकयति मृगाक्ष्या स्वेन सम्भावना माम् ॥ ६४ ॥

[क्षणमिव विवशः स्थित्वा साश्वासं]

अद्यान्तर्बहिरेव वाखिलमिदं सानन्दभूमाद्वयं
विश्वं भाति निरन्तरं नहि भिदां पश्यामि चाणीयसीम् ।
अद्वैता विलयं गता मम महावाक्येष्वसम्भावनाः
साकं तद्विपरीतभावनशतैस्तन्वीविषक्तात्मनः ॥ ६५ ॥

अपिच,

दिष्ट्याद्य श्रुतयः प्रमाणपदवीं प्राप्ता निसर्गोज्ज्वलां
दिष्ट्या नोपहतो महाजनपथो दिष्ट्या हतः कापथः ।
दिष्ट्यास्मानवलम्ब्य शास्त्रविहितो ह्यर्थोऽनुभूतिं गतो
दिष्ट्यात्रापि निमित्ततां गतवती सेयं स्वयं सुन्दरी ॥ ६६ ॥

[इति दृढं परिष्वजन् निमीलिताक्षस्तिष्ठति ।]

परिजनाः [श्रुत्वा ससम्भ्रमं] महंतो खु एसो कदावि पदग्गणोदणणिपडिदावरणाभित्तिओ उववणं पविसे । ता परित्ताआहि अम्हे । [इति राजानमुपसर्पन्ति ।] (महान् खल्वेष कदापि पदाग्रनोदननिपतितावरणभित्तिकः उपवनं प्रविशेत् । तत्परित्रायस्वास्मान् ।)

राजा— [सधैर्यं] मा बिभीत । क्षणादेनं निगृह्णीयुराधोरणाः सुशिक्षिताः ।

[पुनर्नेपथ्ये]

प्रमादः प्रमादः ।

विहरन् पटीरमरुदीप्सया बहिः
परिभूयते पिठरजोऽमुना हठात् ।

विदूषकः— [श्रुत्वा सभयकम्पं] हा हदम्हि एक्कपुत्तो मंदभाअ-
हेओ देव्वदुव्विळसिदेण । [आकाशे लक्ष्यं बद्ध्वा सशोकं]

हा ळद्धोसि चिरेण जो कडुदरारंभोववासादिहिं
अम्हेहिं पिअकुक्खिहिं वि बहुहिं तित्थाडणेहिं तह ।
पूआहिं कुळदेवदाण गुरुहिं रक्खाणिबंधादिहिं
पाणेहिं महिदो सहीण अ कहं तस्सेदिसी दे [1]दसा ॥ ६७ ॥

अविअ,

हेमंते सिसिरे वि थंडिळअळे जा केवळे जाद दे
[2]वत्तीए सअणेण रत्तिसु चिरं संपत्तदुक्खा मुहा ।
अज्जेमं तुह वज्जपा[3]तकठिणं हाहा विपत्तिं कहं
वुद्धा सा जणणी सहेदि विसमं पत्ता वहूहिं समं ॥ ६८ ॥

[इति करुणं विलप्य पुनराकाशे]

हा दुव्वातणुमूळमे(त्त)सिठिळाळंबा गभीरंदरे
कूवे पुव्वपिदामहा मह णिराळंबा विपत्तिं गदा ।

---

१. 'दवा' ख. २. 'वद्दीए' ख.
३. 'पत्त' क.

हाहा राअउळे वसामि सुइरं कादुं बळिं पुत्तअं
हा णस्सामि समूळळ्ळूणबहळासातंतुसंभावणो ॥ ६९ ॥

[इति व्यादिताास्य आक्रोशन्] परित्ताअदु परित्ताअदु बअस्सो। [इति राज्ञः पादयोः पतितुमिच्छति।] (हा हतोऽस्म्येकपुत्रो मन्दभागधेयो दैवदुर्विलसितेन।)

हा लब्धोऽसि चिरेण यः कटुतरारम्भोपवासादिभिः
अस्माभिः प्रियकुक्षिभिरपि बहुभिस्तीर्थाटनैस्तथा।
पूजाभिः कुलदेवतानां गुरुभी रक्षानिबन्धादिभिः
प्राणैर्महितः सखीनां च कथं तस्येदृशी ते दशा॥

अपि च,

हेमन्ते शिशिरेऽपि स्थण्डिलतले या केवले जात ते
पत्न्या शयनेन रात्रिषु चिरं संप्राप्तदुःखा मुधा।
अद्येमां तव वज्रपातकठिनां हा हा विपत्तिं कथं
वृद्धा सा जननी सहेत विषमं प्राप्ता वधूभिः समम्॥

हा दूर्वातनुमूलमात्रशिथिलालम्बा गभीरान्तरे
कूपे पूर्वपितामहा मम निरालम्बा विपत्तिं गताः।
हा हा राजकुले वसामि सुचिरं कर्तुं बलिं पुत्रकं
हा नश्यामि समूललूनबहळाशातन्तुसम्भावनः॥

---

१. 'णंसामि' क.

परित्रायतां परित्रायतां वयस्यः ।)

राजा— [निवार्य वसुलक्ष्मीं प्रति] प्रिये परवानहं विप्रकार्येण । अभ्यन्तरमेव सह सखीभ्यां प्रतिष्ठस्व । सखे मा भैषीः । इतो मोच्यसे त्वदीयपुत्रः । [इति वसुलक्ष्मीं कथञ्चिद् विमोच्य विदूषकेण सह निष्क्रान्तः ।]

[पुनर्नेपथ्ये]

दिष्ट्या दिष्ट्या । अन्यथैवेदं गृहीतमाकृतिमात्रान्महाजनैर्निशीथिनीवशात् ।

इयमत्र गर्भभरखिन्नविटङ्किटि-
प्रमदालसा चलति विद्रुतामुना ॥ ७० ॥

हन्त हन्त सापि दुरवगाहगर्तमध्यं प्रविष्टा निर्मुक्तास्मात् । [सर्वाः श्रुत्वा हर्षमभिनयन्ति ।]

वसुलक्ष्मीः— [सविषादं स्वगतं] अंहो खणंदरेणव्व वाउळीकिदम्ह देव्वदुव्विळसिदेण । (अम्हो क्षणान्तरेणैव व्याकुलीकृताः स्मो दैवदुर्विलसितेन ।)

सख्यौ— हळा ण दुम्मणाअमाणा होहि । जदो आवण्णाणुअंपी महप्पा महाराओ ण गहीदपाणिं तुमं विम्हारिस्सदि । किंदु अज्ज रत्तिम्मि देवीए समक्खं जं वुत्तंतं संपज्जेइ तं निरवसेसं विआरिअ आअंतव्वं ति विसज्जिदाओ चूदळदिआमहुअरिआओ । ता

१. 'अविकटि' ख.

अब्भंतरं पविसिअ ताणं अण्णेसणं करम्ह। (हला न दुर्मनायमाना भव। यत आपन्नानुकम्पी महात्मा महाराजो न गृहीतपाणिं त्वां विस्मरिष्यति। किन्त्वद्य रात्रौ देव्याः समक्षं यद् वृत्तान्तं सम्पद्यते तन्निरवशेषं विचार्यागन्तव्य-मिति विसर्जिते चूतलतिकामधुकरिके। तदभ्यन्तरं प्रविश्य तयोरन्वेषणं कुर्वः।)

वसुलक्ष्मीः— जं दे रुच्चइ। (यत्ते रोचते।)

[इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे।]

तृतीयोऽङ्कः।

चतुर्थोऽङ्कः

[ततः प्रविशतश्चूतलतिकामधुकरिकाख्ये चेट्यौ ।]

प्रथमा — [सविषादं] हंजे हिओ णिसामुहे अम्हाणं भट्टि-दारिअं दोहळसंपत्तिप्पसादणत्थं अण्णेसंती णिच्चवसंइट्ठाणे जदा ण विंदइ तदेव्व संपण्णासंका महाराअं वि ठाणदो ण पेक्खदी कणअमेहळाए समं किंवि किंवि मंतअंदी दोहळप्पसादणव्ववदेसेण अच्चाहिदं सहीए- केणवि कज्जविसेसेण हिओ मज्झंदिणोवट्ठिअस्स चेराहिवणंदणस्स अत्तणो भइणीसुदस्स पदाणं अज्ज रअणीसमए महाराअस्स वि अविण्णादं णिच्चिदवदी । (हञ्जे ह्यो निशामुखेऽस्माकं भर्तृदारिकां दोहळसम्पत्तिप्रसादनार्थमन्विष्यन्ती नित्यवसतिस्थाने यदा न विन्दति तदैव सम्पन्नाशङ्का महाराजमपि स्थानतो न प्रेक्षमाणा कनकमेखलया समं किमपि किमपि मन्त्रयन्ती दोहळप्रसादनव्यपदेशेन अत्याहितं सख्याः- केनापि कार्यविशेषेण ह्यो मध्यन्दिनोपस्थितस्य चेराधिपनन्दनस्य आत्मनो भगिनीसुताय प्रदानं अद्य रजनीसमये महाराजस्याप्यविज्ञातं निश्चितवती)

द्वितीया — [साशङ्कं] हंजे जदव्व अह्मे मह सामिणीए चंदळेहाए समं एव्वं आणत्तह्म जह- तुम्हेहिं एदं विआरिअ परहुदिआचेडिणीं चूदळदिआं सेसवुत्तंतावगमणणिमित्तं तदो एव्व ठाविअ तुए अवगतवुत्तंतं गण्हिअ झत्ति आअंतव्वं त्ति । मए उण एदं विआरिअ णिद्दाळोळुअदाए पसुत्तं । ण जाणे सामिणी किं करिस्सदित्ति । (हञ्जे यदैव आवां मम स्वामिन्या चन्द्रलेखया सममेव आज्ञप्ते स्वः यथा- युवाभ्यां

---

१. 'सट्टा' ख. २. 'आं सेस' क.

एतद्विचार्य परभृतिकाचेटिनीं चूतलतिकां शेषवृत्तान्तावगमननिमित्तं तत एव स्थापयित्वा त्वया अवगतवृत्तान्तं गृहीत्वा झटित्यागन्तव्यमिति । मया पुनरेतद् विस्मृत्य निद्रालोलुपतया प्रसुप्तम् । न जाने स्वामिनी किं करिष्यतीति ।)

चूतलतिका— तुमं अण्णेसंदी तदव्व तुह सामिणी मए देवीए कुडिळत्तणं णिवेदिअं पिठरमुहेण महाराअं वि अवगामिदवदी । ता पदुमणाहप्पसादविहवेण ण किंवि परिहीआदि । (त्वामन्विष्यन्ती तदैव तव स्वामिनी मया देव्याः कुटिलत्वं निवेदितं पिठरमुखेन महाराजमप्यवगमितवती । तत् पद्मनाभप्रसादविभवेन न किमपि परिहीयते ।)

मधुकरिका— [पुरोऽवलोक्य सभयकम्पं] णं एसा मह सामिणी रोसकसाअणअणा कसापाणी मं अहिद्दवइ । [इति चकिता तिष्ठति ।] (नन्वेषा मम स्वामिनी रोषकषायनयना कशापाणिर्मामभिद्रवति ।)

[ततः प्रविशति संरब्धा कशापाणिश्चन्द्रलेखा ।]

चन्द्रलेखा— [कशामुद्यम्य] हुं दासीए पुत्ति णिद्दं कादुं वा[1] मए आणत्तासि । सच्चं णिद्दावदेसेण केण वि चेडेण कीळिदुं गदासि । ता तुमं एव्वं अण्णाविरुद्धकारिणीं वावादेमि । [इति सहुङ्कारं कशया हन्तुमिच्छति ।] (हुं दास्याः पुत्रि निद्रां कर्तुं वा मया आज्ञप्तासि । सत्यं निद्राव्यपदेशेन केनापि चेटेन क्रीडितुं गतासि । तत् त्वामेवमाज्ञाविरुद्धकारिणीं व्यापादयामि ।)

मधुकरिका— [सकम्पं पाणिं कशाभिमुखं प्रसार्य] सामिणि णिद्दावाउळादाए मए उळ्ळंघिदा सामिणीए अण्णा । ता मरिसेदु अण-

---

१. 'वा आण'

हिण्णाए मह अदिक्कमं । सिस्साए अवराहं गुरुअणं विणा को मरिसेदि । [इति पादयोः पतति ।] (स्वामिनि निद्राव्याकुलतया मया उल्लङ्घिता स्वामिन्या आज्ञा । तन्मर्षयतु अनभिज्ञाया मम अतिक्रमम् । शिष्याया अपराधं गुरुजनं विना को मर्षयति ।)

चन्द्रलेखा— हुं साहसिणि ईरिसं वि अपराहं लोहपिंडभक्खणं सुंठीकसाएण विअ पणामेण पमज्जिदुं इच्छसि । [इति पदाग्रेण नोदयति ।] (हुं साहसिनि ईदृशमप्यपराधं लोहपिण्डभक्षणं शुण्ठीकषायेणेव प्रणामेन प्रमार्जितुमिच्छसि ।)

मधुकरिका— [उत्थायाश्रूणि विमुच्य ससंरम्भं] णं एव्वं सामिद्दोहिणं अत्ताणं कुहवि पादेमि । [इति परावर्तते ।] (नन्वेवं स्वामिद्रोहिणमात्मानं कुत्रापि पातयामि ।)

चन्द्रलेखा— [स्वगतं] अगदिआ तवस्सिणी मए अदिमेत्तं वित्तासिदा अत्तनिरवेक्खिणी जादा । [प्रकाशं– कशाम् अन्यतः क्षिप्त्वा] मा खु इदो वरं एव्वं पमादिणी होहि । [इति सस्मितं तां करेणाकर्षति] (अगतिका तपस्विनी मयातिमात्रं वित्रासिता आत्मनिरपेक्षिणी जाता । मा खल्वितः परमेवं प्रमादिनी भव ।)

मधुकरिका— [सहर्षं] अम्हो पसादो सामिणीए । [इति पुनः पादयोः पतित्वोत्थाय] कुहवि णिओएदु मं सामिणी । [इति पार्श्वे-तस्तिष्ठति ।] (अहो प्रसादः स्वामिन्याः । कुत्रापि नियोजयतु मां स्वामिनी ।)

चन्द्रलेखा— इमं वुत्तंतं सुणिअ अत्ताणिरवेक्खाए भट्टिदारि-

आए पिठरकहिअं इमं सुहवअणं त्रिण्णविअ देवीए अण्णाणुरूवं कोदुअसाळं णेमि णं । तुम्हे वि तहिं एव्व आअच्छह । [इति निष्क्रान्ता ।] (इमं वृत्तान्तं श्रुत्वा आत्मनिरपेक्षायै भर्तृदारिकायै पिठरकथितमिदं शुभवचनं विज्ञाप्य देव्या आज्ञानुरूपं कौतुकशालां नयाम्येनाम् । युवामपि तत्रैवागच्छतम् ।)

चेट्यौ— ता तहिं एव्व अळंकरिज्जमाणं भट्टिदारिअं पेक्खम्ह । [इत्युभे निष्क्रान्ते ।] (तत् तत्रैवालङ्क्रियमाणां भर्तृदारिकां पश्यावः ।)

[अङ्कास्यम्]

[ततः प्रविशत्युन्मनायमानावस्थो दुर्वृत्तान्तश्रवणखिन्नश्च राजा ।]

राजा— [सपुलकं]

तद्वक्त्रं तदुदीक्षणं नयनयोस्तात्त्विकश्च मन्दस्मितं
प्रस्यन्दन्मधुपूरमुग्धमधुरा सा भाषणे चातुरी ।
तावुत्थाननिरुद्धबाहुलतिकामध्यावकाशौ कुचौ
तत्तादृग् जघनं तदूरुयुगळं चेतो न मुञ्चन्ति मे ॥ १ ॥

[विचिन्त्य]

तद्वक्त्रं यदि पङ्क एव विशताद् दूनं पुनः पङ्कजं
वार्धावेव पुनर्निमज्जतु यतो जातो वराकः शशी ।
शीर्णं यातु पराणुतामपसरद्दर्पं पुनर्दर्पणं
वक्त्रं चोद्धृतसारमन्यसुदृशां वक्रत्वमापद्यताम् ॥ २ ॥

---

१. ' सुहवणं विण्णसिअ ' ख. २. ' मनुदयद्दर्पं ' क.
३. ' मापाद्य ' ख.

[साश्चर्यं] तदा हि,

सान्द्राश्लेषप्रसृमरनिरातङ्कनिर्वाणधारा-
सारामर्शप्रणयिकरणग्रामतारुद्धबुद्धेः ।
हा मे तस्या मधुरमधुरो यौवनोत्सेकसारः
पातुं नैव स्मृतिमुपगतश्चारुबिम्बाधरोऽपि ॥ ३ ॥

[पुनः सविस्मयं]

येऽमी भावास्तरळनयनापाङ्गसारावमृष्टा
नाशास्यन्तेऽप्यमरपतिभिद्रागविज्ञातसारैः ।
ते मद्भाग्यैरवधिरहितैरेकदारूढपाकै-
रास्वाद्यन्ते स्वयमिति तदा विस्मितो वञ्चितोऽस्मि ॥ ४ ॥

[पुनः सातङ्कं]

सम्भाव्यैव न यादृशाद्भुतकृतिः स्वप्ने विधात्रापि वा
तादृश्या मम पूर्वपुण्यविभवैर्लाभोऽप्यकस्मादभूत् ।
इत्यानन्दसुधाप्लुतोऽस्मि विवशो यावत्तु तावद्धठा-
दाच्छिद्यैव करान्मदाद्यदुरितैः सैवातिदूरीकृता ॥ ५ ॥

[पुनर्विचिन्त्य सवितर्कं]

किमेष स्वप्नः स्यात् [सविमर्शं] नहि किल तदास्वाप्समथवा
मतिभ्रंशो नैवं [हृदयं निर्दिश्य] कुचमसृणपङ्कोऽत्र यदयम् ।
न चेन्माया स्मारी नहि सचिवनीतिस्तदनुगा
तदेषानिर्वाच्या तिरयति मतिं कापि तरुणी ॥ ६ ॥

[पुनः सविमर्शं]

---

१. 'न्द्रश्लेष' क, 'न्द्राशेष' ख.

सत्यैवेयमनिर्गळप्रविसरन्निर्वाणधाराशत-
स्रोतःक्षालितदुःखपङ्कविहतिः काप्यद्भुता सुन्दरी ।
नो चेद् ब्रह्म न तादृशाद्भुतरसं सत्या कथा चेच्छ्रुतिः
प्रामाण्यादृषिभिश्चिरादवधृतादामूलतः प्रच्यवेत् ॥ ७ ॥

[पुनः सप्रमोदं] अहं हि तस्याः,

इन्दीवरोदरचमत्कृतिसत्कृतानां
श्रीपुण्डरीकसुषमाद्भुतभाग्यभाजाम् ।
कल्हारगर्भगतगन्धपिबां कणानां
पात्रं तदासमसकृन्नयनाञ्चलानाम् ॥ ८ ॥

[पुनः सपुळकोत्कम्पं] मदगजवृत्तान्तश्रवणकातरा हि सा,

प्रथमरससमृद्धस्निग्धसौवर्णकुम्भ-
प्रतिभटकुचयुग्मेनादरावर्जितेन ।
करमिषसुममालां कण्ठदेशेऽर्पयन्ती
प्रसवशरपदे मामभ्यषिञ्चन्मृगाक्षी ॥ ९ ॥

[सविस्मयं हृदयदेशमालभ्य] मम हि,

पङ्केरुहप्रतिभटाननमुन्नमद्भ्रू-
लीलाहृतस्मयमनोभवजैत्रचापम् ।
आपाटलाधरदलाहृतविद्रुमश्रि
तस्या वपुर्निरुपमं हृदि सन्निधत्ते ॥ १० ॥

[साशंसं]

पुनरपि सकृदेनां पीनवक्षोजगाढा
क्रमणनिरवशेषामृष्टमद्बाहुमध्याम् ।

पुलककनिचुलिते मे लीयमानामिवाङ्के
किमहमनुभवेयं स्वेन सम्भावयन्तीम् ॥ ११ ॥

[विचिन्त्य सविचिकित्सं] अथवा,

पिठरः किल चन्द्रलेखयोक्तं
यदिह प्रस्तुतशाठ्यकर्म देव्याः ।
भयगद्गदमूचिवान् रहो मे
सविषं शल्यमिवार्पितं तदन्तः ॥ १२ ॥

[इति क्षणं ध्यायन् सवितर्कानुतापं]

एवं चेत् फलितं यदुक्तममुना जह्यादसून् सा ध्रुवं
स्यादेवं भुवनत्रयी प्रमुषितालोका तमोमज्जिता ।
किञ्चातः श्रमशेष एव स विधिर्हा हा तपस्वी भवे-
च्छान्तं पापममङ्गलं प्रतिहतं सञ्चिन्त्य यन्मे भवेत् ॥ १३ ॥

[पुनर्विमृश्य] सत्यमिदं विधिश्चेदनुकूलतामियान्नासम्भावितं नाम किञ्चित् स्यादिति । यतः—

श्रुत्वा सा तुमुलं बहिः कलकलं त्रासाद् भृशं वेपिता
सख्योरप्यनवेक्षणादशरणा व्याधूय लज्जामपि ।
आमूलादवभुग्नपीनकठिनोरोजद्वयीयन्त्रणा-
दूरोद्धूतदुरन्तमद्व्यथमियं स्वैनैव शिश्लेष माम् ॥ १४ ॥

[विचिन्त्य सनिर्वेदं]

धिग् धिग् दुर्विधिदुर्विपाकरभसं धिक् संसृतौ माधुरीं
यां हित्वा मुनयो वसन्ति विपिने माध्वीं विषार्तामिव ।

[पुनः सानुशयं]

यद्वा ज्ञातमिदं विधेर्व्यवसितं सद्वस्तुलाभं न मे
मृष्यत्येष यदीर्ष्यतीत्थमसकृद् धिग् दुर्जने जीवनम् ॥ १५ ॥

अथवा,

उप्यन्ते न कृषीवलैः किमु यवा स्थाल्यो गृहस्थैरधि-
श्रीयन्ते न कटङ्करीयनिवहे सत्येव भिक्षुव्रजे ।
अस्मिन्नीर्ष्यति दुर्विधावपि मया स्वार्थः समुद्धार्यते
कृच्छ्रेणापि हि साधयन्त्यभिमतं सन्तो दृढोद्योगिनः ॥ १६ ॥

[विमृश्य पुनः ससमाधानं]

नात्राण्वप्यपराध्यते हि विधिना मद्दुर्नयादागतं
शैथिल्यं न समीकरोति यदयं स स्यात् कथं दुर्विधिः ।
देवीमप्यनुकूलयन् सुसचिवावुद्योजयन् पश्य मे
वात्सल्येन कृतघ्नतामगणयन् मय्यश्नुतेऽसौ कृपाम् ॥ १७ ॥

[इति क्षणं निभृतः स्थित्वा सस्मरणं स्मितं कृत्वा] अहो पिठरो वृथैव भीषितो जनभ्रान्त्या । अथवा नात्राण्वप्यविमृश्यकारित्वं महाजनस्य निशि प्रासादाग्रस्थितस्य । यदन्तिके दिवापीदृशीमेव शङ्कामावहति अकस्मादुपनतः पिठरपुत्रः प्रायेण । अथापि नामास्माभिरीदृश्यत्युत्कट-पापवार्तापि प्रायो नायुष्यायेति शान्तिकादिकर्मणे तदैव चोदितः पिठरः । [पुनः सानुस्मरणकरुणं] ह्यः किल शर्वर्याम्—

पुत्रं स्वमेत्य परिरभ्य निरन्तरं तं
दृष्ट्वाचिरान्मृतमिवोत्थितमादरेण ।
नीत्वा गृहं द्विजमुखैरथ वाचयित्वा
पुण्याशिषः पिठरकः स गतव्यथोऽभूत् ॥ १८ ॥

[दक्षिणाक्षिस्पन्दं सूचयन् सवितर्काशंसं]

किं मे दक्षिणमक्षि शंसति शुभं चिन्तानिमग्नात्मनः

[ससमाधानं]

यद्वा भावि तु यद्भवेद्भवति तद् दूरेऽथवाप्यन्तिके ।

दृष्टान्ता बहवोऽत्र सन्ति कविभिर्दृष्टाः श्रुता वा स्वयं
किं भूयः प्रकृते क्व सा क्व नु कुलं वज्रीश्वराणामिदम् ॥ १९ ॥

[इति सप्रत्याशस्तिष्ठति ।]

[ततः प्रविशति परिधाननिगूहितवस्त्राभरणकरण्डः समलङ्कृतः
सोत्साहश्च विदूषकः ।]

विदूषकः— [संस्कृतमाश्रित्य]

पुत्रापमृत्युहतयेऽद्भुतशान्तिकर्म-
ण्याराधितैर्द्विजवरैः प्रतिपादितानाम् ।
तत्तादृशां सह सुतेन च भार्यया च
मन्त्राशिषां प्रवचनेन कृतार्थितोऽस्मि ॥ २० ॥

[इत्यात्मानं पश्यन् सहर्षं]

अतो वयस्यार्पितचारुभूषा-
विभूषितोऽस्मिन् शुभकर्मणि द्राक् ।
सन्तर्पितब्राह्मणलालितोऽह-
माकण्ठमाभुज्य विनिर्गतोऽस्मि ॥ २१ ॥

[इति सन्तुष्टः परिक्रामन् सानुस्मरणं] अंहो बुद्धिसाअरप्पओअचादुरी । जदो एव्व देव्वदुव्विळसिदेण कदत्थिदे थिवक्खिदत्थे एव्वं परिणाम-मणोहरं कादुं पारइ । होदु । ता इमाइ महाराआराहणणिमित्तं चेरा-

हिवप्पहिदाइ महग्घाइ तद्देसिअळक्खणळक्खिआइ वसणोण्हीसकवअ-मज्झबंधणमुहाइ रअणाभरणाइ अ सचिवमोळिणा मह हत्थे कदुअ कण्णे एव्वं विअ त्ति किंवि कहिअ उच्छाहिदो ह्मि। [इत्युद्धतं परिक्रामति।] (अम्हो बुद्धिसागरप्रयोगचातुरी। यत एव दैवदुर्विलसितेन कदर्थिते विवक्षितार्थे एवं परिणाममनोहरं कर्तुं पारयति। भवतु। तदिमानि महाराजाराधननिमित्तं चेराधिपप्रहितानि महार्घाणि तद्देश्यलक्षणलक्षितानि वसनोष्णीषकवचमध्यबन्धनमुखानि रत्नाभरणानि च सचिवमौलिना मम हस्ते कृत्वा कर्णे एवमिवेति किमपि कथयित्वा उत्साहितोऽस्मि।)

राजा— [दृष्ट्वा सहर्षं] हन्त स्मृतमात्रकृतसन्निधानः पिठरः। [निरूप्य] हन्त करगतमिव निरवशेषं कार्यजातं पश्यामि। यदयमतिविकृताकारोऽपि मनःप्रसादपिशुनाकारो दृश्यते। तथाहि,

क्लिन्ने वान्तमले सुसूक्ष्ममशकैरावार्यमाणे दृशौ
हर्षात् स्फारयतीव मूषिकमुखं किञ्चिद् विवृत्ताननः।
इङ्गालैरिव निर्मितः प्रविचलद्ध्रस्वातिमात्रोदर-
प्रभ्रश्यत्परिधानरुद्धगमनः शुष्कोरुजङ्घाकटिः॥ २२॥

अपि चास्मिन्,

कनककुण्डलहारनवाङ्गुली-
यकमुखं मणिभूषणजालकम्।
जरठमर्कटभूषणवद् भृशं
वहति कामपि मां जनहासिनीम्॥ २३॥

[इति विस्मयविस्फारिताक्षः पश्यति।]

विदूषकः— [दृष्ट्वा] इदो,

मणिवेदिअवुत्तंतस्सव(ण ?) भग्गोज्जमो वि जो ।
पीदिविप्फारिदक्खं मं पेक्खंतो विम्हिदो भिसं ॥ २४ ॥

ता पिअणिवेदअत्तओ णं उवसप्पे मि । [इत्युपसर्पति] (इतः,

मन्निवेदितवृत्तान्तश्रवभग्नोद्यमोऽपि यः ।
प्रीतिविस्फारिताक्षं मां प्रेक्षमाणो विस्मितो भृशम् ॥

तत् प्रियनिवेदयितृक एनमुपसर्पामि ।)

राजा— सखे समग्रयेव कार्यसम्पत्त्या प्रीतिमावहसि मे ।

विदूषकः— [सगर्वं] को एत्थ संदेहो । [इति करण्डद्वयं पुरतो निधाय कर्णे] एव्वं विअ । [इति कथयति ।] (कोऽत्र सन्देहः । एवमिव ।)

राजा— [सस्पृहानुमोदमाकाशे] साधु भो अमात्यमौलिमणे बुद्धिसागर! साधु ।

ईदृशे दुर्घटेऽप्यर्थे जागर्षि मतिचक्षुषा ।
बुद्ध्वा नीतिगुणैरुग्रं वशयन् कार्यहस्तिनम् ॥ २५ ॥

[विदूषकं प्रति] सरभसमुद्घाटयैते करण्डके कुञ्चिकया । यतोऽयमस्ताभिलाषी भगवानरविन्दबन्धुः । सन्निहितश्चोत्सवसमयः । तदलंकारनिगूहिताकृतिभिः सचिवशिखामणिनिर्दिष्टः किल देशोऽनुसर्तव्यः । यत्र च स्थित्वा देव्या निदेशावसरं प्रतीक्षमाणानां चेराधिपनन्दनस्य वसुवर्मणो नर्मसुहृत्कूश्माण्डरूपमास्थितेन त्वयान्वास्यमानानां कौतुकालङ्करणैः स्वयमेव देव्या अलंक्रियमाणां प्रेयसीं हर्म्यभित्तिकायमानमहादर्पणमुखेन पुनः पुनरुद्ग्रीवमवलोकमानानां देव्या कनकमेखलामुखेन प्रहितैराभरणाम्बरहारिचन्दनद्रवमृगमदसुगन्धि-

कुसुममालिकादिभिः क्रियासमभिहारेणात्मानं मण्डयमानानामस्माकं सुगमः समयशेषः ।

विदूषकः— तह । [इति कुञ्चिकया करण्डे उद्घाटयति ।](तथा ।)

राजा— [दृष्ट्वा साश्चर्यं] हन्त महार्घाणीमानि । [इति पाणिभ्यामादाय पश्यति ।]

विदूषकः— णं एदेहिं विभूसिअं अप्पाणं वि सअं ण जाणाइ । किं उण अण्णो । (नन्वेतैर्विभूषितमात्मानमपि स्वयं न जानाति । किं पुनरन्यः ।)

[राजा आभरणवस्त्रादीन्यादाय यथोचितमात्मानमलंकरोति, विदूषकः परिधानाञ्चलनिबद्धं स्वोचितालङ्करणमादाय स्वयमप्यलंकृत्य राज्ञः स्वस्य च प्राग्धृतसर्वाभरणनिगूहनं नाटयति ।]

राजा— [विदूषकं दृष्ट्वा सविस्मयं] यत्सत्यमन्य एवासि संवृत्तः ।

विदूषकः – [सहर्षमुत्प्लुत्य राजानं विलोक्य सचकितविस्मयं] को तुमं अपरिचिदपुव्वो वअस्सो विअ मं ववहरासि । कुदो गदो वअस्सो । (कस्त्वमपरिचितपूर्वो वयस्य इव मां व्यवहरासि । कुतो गतो वयस्यः ।)

राजा – [स्मित्वा विदूषकं प्रशस्य] भवतु । देवीसमक्षं कथं वाग्व्यवहारो भविष्यति ।

विदूषकः— हुं मादुणो समक्खं ळज्जाए विअ मोणं मंदमिउभासणं वा तुह सरणं भविस्सादि । मह उण का गई । (हुं! मातुः

समक्षं लज्जयेव मौनं मन्दमृदुभाषणं वा तव शरणं भविष्यति । मम पुनः का गतिः ।)

राजा— [सलज्जं] मूढ, [1]मैवमवचनीयं वादीः । [इति तस्य छोटिकां दत्त्वा विचिन्त्य] तव त्वप्रधानत्वात् समाजे सहव्यवहारेणाप्यलम् ।

विदूषकः— ता तुरिअं जहाणिद्दिट्ठं पदेसं उवसंकमम्ह । (तत् त्वरितं यथानिर्दिष्टं प्रदेशमुपसङ्क्रमावः ।)

राजा— यद्येवं तर्हि मणिहर्म्यमार्गमादेशय ।

विदूषकः— [पुरो भूत्वा] इदो इदो एदु भवं । [इत्युभावुपसृत्य हर्म्याधिरोहणं नाटयतः ।] (इत इत एतु भवान् ।)

विदूषकः— इदो तुह देवीए [इत्यर्धोक्ते सवाक्स्तम्भं] अज्जाए परिकप्पिदं णवरअणघडिअं अग्गासणं । एत्थ उवविसिअ एक्कंदरमणिज्जदाए णिव्वुदहिअओ णेण रअणभित्तिआमुहेण देवीणिम्माविदमाणिमआहिणवकोदुअवेदिआअं सअं देवीए अलंकरिज्जमाणं कमळाए विअ कामवहुं वसुळच्छिं ओळोअंतो णिव्वुदो होहि । (इतस्तव देव्या—आर्यया परिकल्पितं नवरत्नघटितमग्रासनम् । अत्रोपविश्य एकान्तरमणीयतया निर्वृतहृदयोऽनेन रत्नभित्तिकामुखेन देवीनिर्मापितमणिमयाभिनवकौतुकवेदिकायां स्वयं देव्या अलङ्क्रियमाणां कमलयेव कामवधूं वसुलक्ष्मीमवलोकयन् निर्वृतो भव ।)

---

१. 'किमेवम' क.

[राजा सव्रीळमुपविशति । ततः प्रविशति परभृतिका-
चन्द्रलेखाभ्यां सह प्रमुदिता वसुलक्ष्मीः ।]

वसुलक्ष्मीः— [सप्रमोदं]

अदिसंकक्खित्तमणा दोहळसंतोसिअव्व मे देवी ।
होंदी पदारिदव्व सच्चं हंत पदारिदा होदि ॥ २६ ॥

(अतिशङ्काक्षिप्तमना दोहळसन्तोषितैव मे देवी ।
भवन्ती प्रतारितैव सत्यं हन्त प्रतारिता भवति ॥)

चन्द्रलेखा— **हळा देव्वाअत्तो जणो केण वा अदिसंधादुं पारीअदि ।** (हला दैवायत्तो जनः केन वा अतिसन्धातुं पार्यते ।)

परभृतिका— **हळा चंदळेहे अवि सच्चं एदं महाराओ सअं एव्व चेराहिवणंदणो भविअ मणिहम्मिअत्थळं देवीए अळंकरिज्जमाणं सहिं णिव्वण्णेदुकामो आरूहंदो मए पच्चक्खदो दिट्ठो त्ति । णूणं चेराहिवणंदणो सच्चो एत्थ णअरे हिओ समाअदो । सव्वं अमच्चबुद्धिसाअरणीदिविळसिदं ति अय्यपिठरसम्मेण कहिदं त्ति एदं वि सच्चं एव्व ।** (हला चन्द्रलेखे अपि सत्यमिदं महाराजः स्वयमेव चेराधिपनन्दनो भूत्वा मणिहर्म्यस्थलं देव्या अलङ्क्रियमाणां सखीं निर्वर्णयितुकाम आरोहन् मया प्रत्यक्षतो दृष्ट इति । नूनं चेराधिपनन्दनः सत्य अत्र नगरे ह्यः समागतः । सर्वममात्यबुद्धिसागरनीतिविलसितमिति आर्यपिठरशर्मणा कथितमित्येतदपि सत्यमेव ।)

वसुलक्ष्मीः— [स्वगतं] **जं मए अदिसंकाणिज्जं तं परहुदिआए सअं अदिसंकिदं । एत्थ जं उत्तरं पडिवज्जइ चंदळेहा तदो तदणुरूवं अणुचिट्ठिस्सं ।** [इत्यवहिता चन्द्रलेखामुखं पश्यन्ती तिष्ठति ।] (यन्मया

अतिशङ्कनीयं तत् परभृतिकया स्वयमतिशङ्कितम् । अत्र यदुत्तरं प्रतिपद्यते चन्द्रलेखा ततस्तदनुरूपम् अनुष्ठास्यामि ।)

चन्द्रलेखा— [विहस्य] **ण जाणे सुहोग्गारिणी चंदळेहा विसं वमइ त्ति ।** (न जाने सुधोद्गारिणी चन्द्रलेखा विषं वमतीति ।)

[वसुलक्ष्मीः प्रेमार्द्रं चन्द्रलेखां पश्यति ।]

परभृतिका— [सहर्षं] **जदि एव्वं तदो कंजणमाळामुहेण आणत्तं देवीए अहिणवमणिमअमंडवाअमं कोदुआळंकारणिमित्तं कुदो विळंबीअदि ।** (यद्येवं ततः काञ्चलमालामुखेन आज्ञप्तं देव्या अभिनवमणिमयमण्डपागमं कौतुकालङ्कारनिमित्तं कुतो विलम्ब्यते ।)

इतरे— **इदो गच्छह्म ।** [इत्युत्थाय सर्वाः कौतुकमण्डपप्रवेशं नाटयन्ति ।] (इतो गच्छामः ।)

[नेपथ्ये]

इदो इदो । (इत इतः ।)

सर्वाः— (दृष्ट्वा) **इदो देवी कोदुअवेदिआसण्णभूमिणिक्खित्तं कणअमआसणं मिदपरिअणभूसणादिपेडिआहत्थाहिं कणअमेहळा-कंजणमाळामुहाहिं सहीहिं उवसप्पिअमाणा उवसप्पइ । ता अह्मे वि उवसप्पम्ह ।** [इत्युपसर्पन्ति ।] (इतो देवी कौतुकवेदिकासन्नभूमिनिक्षिप्तं कनकमयासनं मितपरिजनभूषणादिपेटिकाहस्ताभिः कनकमेखलाकाञ्चनमाला-मुखाभिः सखीभिरुपसर्प्यमाणोपसर्पति । तद्वयमपि उपसर्पामः ।)

[ततः प्रविशति यथानिर्दिष्टा देवी ।]

देवी— [आसने उपविश्य] **अवि अवरोहदुवारिआइ अग्गळि-अकवाडाइ सुसंरक्खिआइ कदावि उवट्ठिदो अज्जउत्तो वि जह ण**

पविसादि। (अप्यवरोधद्वाराणि अर्गलितकवाटानि सुसंरक्षितानि कदाप्युपस्थित आर्यपुत्रोऽपि यथा न प्रविशति।)

परिजनः— जह आणत्तं देवीए। सव्वं सज्जं। (यथाज्ञप्तं देव्या। सर्वं सज्जं।)

देवी— बहुसो ईरिसे संज्झावसाणे[1] समाविअसंज्झो कज्जासणाहिमुहो भवे। का संगई अट्ठाणे अवरोहोवसप्पणस्स। कुमाळो वसुवम्मो वि जहणिद्दिट्ठं पदेसं अवि उवसंकंतो। (बहुश ईदृशे सन्ध्यावसाने समापितसन्ध्यः कार्यासनाभिमुखो भवेत्। का सङ्गतिरस्थाने अवरोधोपसर्पणस्य। कुमारो वसुवर्मापि यथानिर्दिष्टं प्रदेशमप्युपसंक्रान्तः।)

काञ्चनमाला— णं दाणिं एव्व कुह्मंडमेत्तसहाओ आरुहिदो सोपाणपहेण मणिहम्मिअं पच्चक्खीकिदो। (नन्विदानीमेव कूश्माण्डमात्रसहाय आरूढः सोपानपथेन मणिहर्म्यं प्रत्यक्षीकृतः।

देवी— [परितोऽवलोक्य][2] अंहो कुमाळुच्छाहणणिमित्तं मए णिव्वट्टिदस्स दीविआसहस्समंडिदस्स अणग्घमणिप्पहाकिम्मीरिदं[3]दिसामुहस्स अहिणवकोदुवमंडवस्स सास्सिरीकत्तणं। [स्वगतं सहर्षं] अंहो सिद्धं णो समीहिदं। जं इअं वच्छा[4] वसुसेणसुदा मह गळरोआअमाणा दोहळप्पसादव्ववदेसेण देव्वाणुऊळत्तणेण अच्चउत्तदंसणपहादो अवणीअदि। कुमाळमुहेण भइणी बहुमदा होइ। [पुरोऽवलोक्य सहर्षं] इदो एहि वच्छे वसुळक्खि इदो एहि। [इति वसुलक्ष्मीं पाणिनाकृष्य स्वाङ्क उपवेशयति।] (अम्हो कुमारोत्साहननिमित्तं मया निर्वर्तितस्य दीपि-

---

१. 'णे कज्जा' क. २. 'तो विलो' ख
३. 'दस्स दिसा' ख. ४. 'वच्चा' क.

कासहस्रमण्डितस्यानर्घमणिप्रभाकिर्मीरितदिशामुखस्याभिनवकौतुकमण्डपस्य सश्रीकत्वम् । अम्हो सिद्धं नः समीहितम् । यदियं वत्सा वसुषणसुता मम गळरोगायमाणा दोहळप्रसादव्यपदेशेन दैवानुकूलत्वेन आर्यपुत्रदर्शनपथादपनीयते । कुमारमुखेन भगनी बहुमता भवति । इत एहि वत्से वसुलक्ष्मि इत एहि ।)

राजा— [वसुलक्ष्मीं विलोक्य सानुरागविस्मयं] सखे पश्य पश्य ।

केयं लावण्यपूरा प्रवहति तटिनी प्लावितोत्तुङ्गशैला
वेलोद्यत्कल्पवल्लीपरिचयमधुरा पङ्कजेन्दीवराढ्या ।
गम्भीरावर्तमध्या कवळितपुळिनाभोगरम्यात्तरम्भा-
स्तम्भश्रीर्विद्रुमश्रीरपि नभस इवाभ्येत्य योगं समृद्धा ॥ २६ ॥

[पुनः सोन्मादानन्दं स्वगतं चक्षुरादीन् प्रति] अयि भोः! चपलाश्चक्षुरादयः! सावधाना मनसि कुरुत परमहितं वोऽस्मदुपदेशमेकमिमम्-

उच्चैर्विद्युदुपासितेयमधुना कादम्बिनी दृश्यते
किं ब्रूमः सुषमानदी पुनरियं प्रागेव कूलङ्कषा ।
द्रागारोहत शैलशृङ्गशिखराण्याशा यदि प्राणितु
मा भूदक्षगणाः! स दृप्तमदनग्राहः सकामोऽधुना ॥ २७ ॥

[प्रकाशं- विदूषकं प्रति साश्चर्यम्]

उच्चैः कादम्बिनीयं मसृणरुचिभरद्योतिसौदामिनीका
सोमः सम्पूर्णबिम्बः स्फुरति तु तदधश्चन्द्रिकोद्गाररम्यः ।
मध्येव्योमाक्तचूर्णं तदुपरि तपनीयाचलद्वन्द्वमेतद्
द्योतन्ते क्वापि ताराः पृथुपुळिनतले किन्न्वितः पश्य चित्रम् ॥

१. 'माक्तपूर्तं' ख.

[इति विस्मयविस्फारिताक्षः पुनरापादतलं पश्यन्]

सेयं कोकनदद्वयी परिभवत्रासाद् यतोऽधोमुखी
ते शुण्डे रतिमारगन्धकरिणोर्मध्ये क्वचित् क्रीडतोः ।
अन्योन्याभिमुखस्थयोरुपरि यत् कुम्भद्वयी दृश्यते
वप्राघातविषक्तपङ्कमलिनोद्वृत्ताङ्कुशाविक्षता ॥ २९ ॥

किञ्च,

व्योम्न्येषा यमुना न जह्नुतनया तस्याः प्रपातह्रदो
गम्भीरोऽत्र विलोक्यते न तु पुनः शम्भोः कपर्दावलिः ।
पातावेगतटो महान् सिकतिलो नैव प्रवाहोऽन्तिके
क्षुभ्नात्येष मनांसि नः सगरजातैनांसि नैवाधुना ॥ ३० ॥

[इति पश्यन् निर्वृतः स्थितः ।]

देवी— [तस्याश्चिबुकमुन्नमय्य] मा खु लज्जाए ओणदमुही होहि । अहं एव्व तुमं एहिं आहरणादिहिं अलंकरिदुं इच्छामि । ता उण्णमिदमुही[1] होहि । [काञ्चनमालां विलोक्य] ओणेहि कुञ्चिओग्घाडिआइ आहरणादिपे(डि ? ड) आइ । एत्थ कोदुअवेदिआमज्झे ठावेहि । (मा खलु लज्जया अवनतमुखी भव । अहमेव त्वां एभिराभरणादिभिरलङ्कर्तुमिच्छामि । तदुन्नमितमुखी भव । उपनय कुञ्चिकोद्घाटितान्याभरणादिपेटकानि, अत्र कौतुकवेदिकामध्ये स्थापय ।)

काञ्चनमाला— इदो एव्वं सज्जं । [इति यथोक्तं करोति ।] (इत एवं सज्जम् ।)

---

१. ' णणदमु ' ख.

देवी— हळा कणअमेहळे तुए आणीदं सकुंचिअं भूसणादि-पेडिअं अणुपदं गमणेण कुमाळपरिचिदा तुमं एव्व कुमाळं पावेहि । एव्वं अ भणिदव्वो । (हला कनकमेखले त्वया आनीतां सकुञ्चिकामाभरण-पेटिकाम् अनुपदं गमनेन कुमारपरिचिता त्वमेव कुमारं प्रापय । एवं च भणितव्यः ।)

कनकमेखला— कहं विअ । (कथमिव ।)

देवी— इदो तुमं[1] आणेदुं अहं आअदव्व । ता सज्जो होहि त्ति । (इतस्त्वामानेतुमहमागतैव । तत् सज्जो भवेति ।)

कनकमेखला— एव्वं होदु । [इति भूषणादिपेटिकामादाय मणि-हर्म्यारोहणं नाटयित्वा दृष्ट्वा] इदो महाराओ [इत्यर्धोक्ते] कुमाळो सव-अस्सो चिट्ठइ । णं उवसप्पेमि । [इत्युपसृत्य राज्ञः पुरस्तात् पेटिकां निक्षिप्य] अज्जू आणवेदि एहिं अळङ्करिअ कुमाळो सज्जो होदु । अहं इदो आअदव्वात्ति । (एवं भवतु । इतो महाराजः— कुमारः सवयस्य-स्तिष्ठति । एनमुपसर्पामि । आर्या आज्ञापयति— एभिरलङ्कृत्य कुमारः सज्जो भवतु । अहमागतैवेति ।)

राजा— [सव्रीळं स्मित्वा] एवं भवतु । [इति तैरात्मानं पुनरल-ङ्करोति ।]

कनकमेखला— [स्वगतं साश्चर्यं] अम्हो चिरपरिचिदाए वि मए ण पच्चभिज्जाणीअदि महाराओ पिठरो वा । सव्वहा बुद्धिसाअरो पसंसणिज्जो । [प्रकाशं] कुमाळ देवीए अण्णा तुवरावेदि मं । ता

---

1. 'मं णेदुं' ख. 2. 'सव्वअण्णहा' ख.

उवसप्पेमि । [इति हर्म्यादवतीर्य देवीमुपसर्पति ।] (अहो चिरपरिचितयापि मया न प्रत्यभिज्ञायते महाराजः पिठरो वा । सर्वथा बुद्धिसागरः प्रशंसनीयः । कुमार देव्या आज्ञा त्वरापयति माम् । तदुपसर्पामि ।)

[देवी मालिकाभूषणादिभिर्वसुलक्ष्मीमलङ्करोति ।]

राजा— [दृष्ट्वा सहर्षं] सखे पश्य पश्य । इयं हि देवी,

कनककुसुमपङ्क्त्या केतकीनां दळैश्च
 स्वयमिह रचयन्ती साधु वेणीं मृगाक्ष्याः ।
वरतनुतनुसृष्टौ शोधिताद्रूपसारा-
 द्धुघुचलितबुसांशानेकतो व्यस्यतीव ॥ ३१ ॥

अपिच,

नवमणिखचिताभ्यां चन्द्रसूर्यप्रभाभ्यां
 शिरसि मणिललन्तीपार्श्वयोः सेविताया ।
यदि भवति चिरावस्थायिनी विद्युदभ्रे
 शशिमिहिरपरीता साम्यमृच्छेत्तयैषा ॥ ३२ ॥

विदूषकः— [साश्चर्यं] भो वअस्स इदं देवीए चउरत्तणं ण पेक्खसि । (भो वयस्य इदं देव्याश्चतुरत्वं न पश्यसि ।)

राजा— [निरूप्य सविस्मयं] साधूपलक्षितवानसि ।

शलाकया कज्जळसम्पुटादियं
 नवाञ्जनं द्विस्त्रिरुपाददत्यपि ।
प्रियाद(शावा? शोपा)न्तमिहाङ्क्तुमक्षमा
 सखीमुखं पश्यति विस्मिता भृशम् ॥ ३३ ॥

---

१. ' गाय स्था ' ख.

विदूषकः— [विहस्य] अह्मो सव्वो वि जणो अत्तणो समत्थत्तणं विज्जमाणाहिअं सदसहस्सगुणं मण्णेइ । जं एसा देवी अत्तणो वसुळच्छीणअणंजणे विअ पय्यत्तं समत्थत्तणं असेसंगाळंकरणजोग्गं मण्णेइ । (अहो सर्वोऽपि जनः आत्मनः सामर्थ्यं विद्यमानाधिकं शतसहस्र-गुणं मन्यते । यदेषा देवी आत्मनो वसुलक्ष्मीनयनाञ्जने इव पर्याप्तं सामर्थ्यं अशेषालङ्करणयोग्यं मन्यते ।)

राजा — धिङ् मूर्ख, नैवं देवीमनात्मज्ञां सम्भावयितुमर्हसि । पश्य,

चातुर्यात् स्वयमन्वहं कुतुकिनी सङ्गीतशालान्तरे
या कन्याः समलङ्करोति न च वा तत्र श्रमं विन्दति ।
वेणीशिल्पविधानतोऽपि यदि सा खिन्नाङ्गुलिर्न क्षमा
प्रेयस्या नयनाञ्जने वद महान् दोषोऽत्र कस्योपरि ॥ ३३ ॥

विदूषकः— [विहस्य] णं अवगदं एदं तुह पेअसीए केस-णअणाणं अच्चंदाअदभावस्स एव्व एसो दोसो । होदु । पेक्खामो सेस-मंडणविहिं । (नन्ववगतमिदं तव प्रेयस्याः केशनयनानामत्यन्तायतभावस्यै-वैष दोषः । भवतु । पश्यामः शेषमण्डनविधिम् ।)

देवी -- [साश्चर्यं] हळा वच्छाए वसुलच्छीए णअणंजणविहिणो कहं वि पारं गदह्मि । णं तुह्मे वि जाणह जं अहिणअसाळागआणं कण्णआणं सहस्सं वि कोदुइणी खणंदरेणव्व चउरदरं अळंकरेमि । इमाए उण अळंकरणविहाणे ण पारीअदि मए । ण जाणीअदि किं काळेणं त्ति । होदु । तुह्मे वि झत्ति णेवच्छसेसं करेह । जदो देवण्ण-णिण्णीदो पाणिग्गहसमओ सण्णिहिदो । जस्सिं जामित्तगुणविसेस-रमणिज्जम्मि सव्वभोमत्तणं णीसवत्तत्तणं अ परिणेदुणो सुणीअदि त्ति

पसंसिदो देव्वण्णेहिं । (हला वत्साया वसुलक्ष्म्या नयनाञ्जनविधे कथमपि पारं गतास्मि । ननु यूयमपि जानीत— यदभिनयशालागतानां कन्यकानां सहस्रमपि कौतुकिनी क्षणान्तरेणैव चतुरतरमलङ्करोमि । अस्याः पुनरलङ्करणविधाने न पार्यते मया । न ज्ञायते किं कारणमिति । भवतु । यूयमपि झटिति नेपथ्यशेषं कुरुत । यतो दैवज्ञनिर्णीतः पाणिग्रहसमयः सन्निहितः । यस्मिन् जामित्रगुणविशेषरमणीये सार्वभौमत्वं निस्सपत्नत्वं च परिणेतुः श्रूयत इति प्रशंसितो दैवज्ञैः ।)

परिजनः— जं देवी आणवेदि । [इति सर्वा वसुलक्ष्मीं यथोचितमलङ्कुर्वन्ति ।] (यद्देवी आज्ञापयति ।)

राजा— [सकौतुकं]

पश्यैषा मणिकुण्डलोज्ज्वलकनत्ताटङ्कवाल्युत्पलै-
स्तन्वङ्ग्याः श्रवसी कपोलयुगलीमेणद्रवैरेकिका ।
अत्यालङ्कुरुतेऽत्र यावकरसैर्बिम्बाधरं नेशते
वक्षोजौ हरिणद्रवैर्महयितुं सख्यः समस्ता अपि ॥ ३४ ॥

विदूषकः— [विहस्य] ण हु ईदिससिप्पलद्धलक्खाणं इमाणं एदं अचउरत्तणं । (न खल्वीदृशशिल्पलब्धलक्ष्याणाम् आसामिदमचतुरत्वम् ।)

राजा— अपि तर्हि कस्य ।

विदूषकः— अणुक्खणत्थणवित्थारइत्तस्स पच्चग्गजोव्वणस्स । (अनुक्षणस्तनविस्तारयितृकस्य प्रत्यग्रयौवनस्य ।)

राजा— [साकूतं पश्यन्]

इयमिह तरळाक्ष्याः साधु चन्द्रोपजन्मा
मृगमदतिलकेनालङ्क्रियाकल्पितेन ।
समयति मलिनिम्ना तेन पश्याननेन्दुं
क इव परमसाम्यं नाधिगन्तुं यतेत ॥ ३५ ॥

अपिच,

श्रवणनिहितनीलाम्भोजयोरायताक्ष्या-
श्चलदळियुगळीयं कौतुकं संविधत्ते ।
अवजिगमिषयास्मत्सन्निधेः प्रान्तनीता
मुहुरतिचकितह्रीलोलतारद्वयीव ॥ ३६ ॥

किञ्च,

त्रिभिरिह पुरुषार्थैर्हन्त पर्यन्तसंस्थै-
स्तिलकनयनतारद्वन्द्वसंज्ञैः सुवृत्तैः ।
सममिह शुचिनासामौक्तिकाख्या विमुक्ति-
र्धुतनिखिलपुमर्था साधु तन्वीमुपास्ते ॥ ३७ ॥

[पुनः सप्रमोदं] सखे किं न पश्यसि । इयं हि,

शक्र(को ? गो)पनिभपट्टकञ्चुकं
स्वेन वक्षसि पिनह्य बालिका ।
वेणिकाविरचने सखीमुखं
व्रीडया नतमुखं विलोकते ॥ ३८ ॥

विदूषकः— [साश्चर्यं] णं साधु पेक्खेमि । अण्णं अ,

कंठं हारमुहेहि हेमवळअस्सणंगुळीआदिहिं
कण्णाए करकप्पवल्लिजुअळिं णेऊरएहिं पदं ।

एदाओ णिउणं पसाहिअ जहाणत्तं ठिदाओ सअं
देवी रत्तदुऊळकंचिरसणा बंधेदि णाहीमुहे ॥ ३९ ॥

(ननु साधु पश्यामि । अन्यच्च,

कण्ठं हारमुखैर्हेमवलयस्वर्णाङ्गुलीयादिभिः
कन्यायाः करकल्पवल्लियुगळीं नूपुरादिभिः पदम् ।
एता निपुणं प्रसाध्य यथाज्ञप्तं स्थिताः स्वयं
देवी रक्तदुकूलकाञ्चिरशना बध्नाति नाभीमुखे ॥)

राजा— [निरूप्य सपुळकौत्सुक्यं]

अस्या लावण्यसिन्धो रतिपतिरमृतं चारु शृङ्गारसंज्ञं
देवेभ्योऽस्मभ्यमारादिव मथितुमना रत्नसानुं नितम्बम् ।
उद्यत्सद्रत्नकाञ्चीमिषफणिपतिना वेष्टयन् रोमरेखा-
मिथ्याहालाहलेन क्षपयति जगतीं मध्यसम्भावितेन ॥ ४० ॥

[इति विस्मियस्तिमिताक्षः क्षणं पश्यन्]

रशनाकुरुविन्दरत्नरश्मि-
च्छलरक्ताम्बुजगर्भतश्चलन्ती ।
नवरोमलतालिपङ्क्तिरस्या
वलते घ्रातुमुरोजपद्मकोशौ ॥ ४१ ॥

[पुनः सचमत्कारं]

भ्रान्तेयं भ्रमराळिरादरवती वापीति सम्प्रत्यया-
न्नालीकं किल मध्यतोऽत्र वलते सम्भावयन्तीव या ।

---

१. 'रत्त' ख.

सा किं ज्ञास्यति पद्मकोशयुगळीमाबद्धमौनव्रतां
शीतांशुं समया यतोऽभिलषति घ्रातुं शनैः प्रान्तगा ॥ ४२ ॥

अपिच,

तस्या नीवीनहनसमये किञ्चिदालक्ष्यरेख-
स्वर्णच्छायत्रिवलिमधुरं मध्यमालक्ष्य मन्ये ।
वक्षोजन्मद्वयभरनमन्मध्यभङ्गप्रसङ्गाद्
भीतो धाता त्रिवलिकपटाद्धेमपट्टान् बबन्ध ॥ ४३ ॥

देवी -- [वसुलक्ष्मीं निर्वर्ण्य सविस्मयासूयं दीर्घं निश्श्वस्य स्वगतं] अम्हो मह वि पुरुसत्तणाहिळासिमणोरहकाळिणी इअं दारिआ अय्यउत्तदंसणपहादो एत्तिअं समअं कहंकहं वि मह जण्णंतराअरिअपुण्णविहवेण दाणिं जीविदव्वत्तणेण अ गोविदा । इदो वरं ण मए संकणिज्जा । जदो सुवो पच्चूससमअव्व सह इमाए पत्थाविअदि कुमाळो मए । होदु । सेसं णिव्वट्टमो । [प्रकाशं] हळा सहीओ, पसाहिआ इअं वसुलक्खी मए । जाव मिदपरिजणाए पच्चुग्गमिअ कुमाळो पुरदो एव्व सण्णिहाविदो इदं संभाररमणिज्जं उवट्ठिअपुरोहिदं मणिमअकोदुअमज्झं णीअदि दाव तुम्हेहिं वि इअं से पस्सं पावइदव्वा । (अहो ममापि पुरुषत्वाभिलाषिमनोरथकारिणी इयं दारिका आर्यपुत्रदर्शनपथादियन्तं समयं कथंकथमपि मम जन्मान्तराचरितपुण्यविभवेनेदानीं जीवितव्यत्वेन च गोपिता । इतः परं न मया शङ्कनीया । यतः श्वः प्रत्यूषसमये एव सहानया प्रस्थापयितव्यः कुमारो मया । भवतु । शेषं निर्वर्तयामः । हला सख्यः, प्रसाधितेयं वसुलक्ष्मीर्मया । यावन्मितपरिजनया प्रत्युद्गम्य कुमारः पुरत एव सन्निधापितः इदं संभाररमणीयमुपस्थितपुरोहितं मणिमयकौतुकमध्यं नीयते तावद् युष्माभिरपि इयं तस्य पार्श्वं प्रापयितव्या ।)

---

१. 'सहिओ' ख.

परिजनः— [सहर्षं] इदो सव्वा सज्जम्ह । (इतः सर्वाः सज्जाः स्मः ।)

देवी — [उत्थाय कनकमेखलाकरमवलम्ब्य परिजनं प्रति] हळा पिअवाणि पदीविआहत्थाओ काओ वि मह पुरदो गच्छंदु । तुमं मणिहम्मिअमग्गं मे आदेसेहि । (हला पिकवाणि प्रदीपिकाहस्ताः का अपि मम पुरतो गच्छन्तु । त्वं मणिहर्म्यमार्गं मे आदेशय ।)

पिकवाणी— इदो इदो भट्टिणि । (इत इतो भट्टिनि ।)

देवी— इदो अहं कुमारं गण्हिअ आअदव्व । [इति यथोक्त-परिजना निष्क्रान्ता ।] (इतोऽहं कुमारं गृहीत्वा आगतैव ।)

राजा— [सहर्षमुत्थाय] इत आगता देवी सम्भावयितुं माम् । तदिमामभ्युद्गम्य अप्रमत्तावेव प्रतार्य समीहितं साधयावः । [इत्युभौ निष्क्रान्तौ ।]

चन्द्रलेखा— [जनान्तिकं] हळा उट्ठेहि उट्ठेहि । इदो महाराओ देवीए अणुणीअमाणो कोदुअवेदिं आक्कमइ । ता तुमं वि इमं आरुहदु । (हला उत्तिष्ठोत्तिष्ठ ! इतो महाराजो देव्यानुनीयमानः कौतुकवेदिमाक्रामति । तत् त्वमपि इमामारोहतु ।)

वसुलक्ष्मीः— जं सहीए रुच्चइ । [इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे ।] (यत् सख्यै रोचते ।)

चतुर्थोऽङ्कः ।

पञ्चमोऽङ्कः ।

[ततः प्रविशति कञ्चुकी ।]

कञ्चुकी— [सनिर्वेदं] कष्टम् ,

आ बाल्यात् परसेवयैव शिथिलेऽप्यङ्गे न मे विश्रमो
धात्रालिख्यत निर्दयेन कृपणो येनाधुना धिक्क्रिये ।

[सविस्मयं]

बिभ्यद् यः स्खलिताद् दिवापि चलितुं स्वेनैव नो शक्नुयां
वोढा कार्यधुरां चरामि सतमोगाढे निशीथेऽप्यहम् ॥ १ ॥

अपिच,

धिङ् मे जन्म धिगाधिकारिकमिदं दुर्जीवनं धिग् जरां
धिक् तत्रापि जिजीविषामकरुणां धिग् वृत्तिमीदृशीं मयि ।
धिग् देहिष्वकलत्रपुत्रजसुखाशंसाकथामीदृशीं
सेवां धिक् च तथा तथा परिणतिं मत्पूर्वदुष्कर्मणाम् ॥ २ ॥

[इति व्यथित इव क्षणं स्थित्वा सविमर्शं] ।

यद्वा साध्वपि पूर्वजन्मनि मयान्वस्थायि कर्मान्यथा
पुण्यश्लोकनृदेवसत्तमकुले वासो घटेत क्व मे ।
सत्या किञ्च जनश्रुतिः ह्युपनमेज्जीवन्तमानन्द इ-
त्येषा योऽभ्युदयानधीश्वरकुले पश्यामि हन्तेदृशान् ॥ ३ ॥

[इति पुरोऽवलोक्य सहर्षं]

अथैतत् फलितं चिराद् वसुमतीदेव्यास्तपो दुश्चरं
पातिव्रत्यमितोऽनयाद्य पितरो देवाश्च सम्भाविताः ।
स्वानिष्टोऽपि मनोरथो यदनया पत्युः स्वयं पूर्यते
पाणौ पाणिमुपावसज्य कमितुर्दात्र्या सपत्न्या अपि ॥ ४ ॥

[विमृश्य सविस्मयं]

सचिवनीतिरियं किल दुर्ग्रहा कनकमेखलया मयि यार्पिता ।
अहमिहाभ्युदयं परमं विदंस्तत इतो विचरामि दिदृक्षया ॥ ५ ॥

किञ्च,

देवीमुखेनैव समीहितार्थ-
सिद्धौ परं यत्नमुपैति मन्त्री ।
विदंस्तु देव्याः सुकृतं महीय-
स्तटस्थतामात्मनि भावयंश्च ॥ ६ ॥

तथाहि,

ज्ञातं वास्तु न वा यदेव सुकृतं दुष्कर्म वा जन्तुभि-
र्हन्तानुष्ठितमात्रमेव जनयेत् स्वस्वानुरूपं फलम् ।
वह्निः किन्न दहेज्जडैर्मणिधिया स्पृष्टो न वा वारयेत्
सन्तापं हिमवारि घर्मविवशैरासेवितं बालकैः ॥ ७ ॥

किञ्च,

यतो योऽर्थो विधातव्यः स चेत् तेन स्वयं कृतः ।

---

१. ' योऽर्थः पिधा ' ख.

कथमन्यमसूयेद् वा स जिहत् स्वात्मदुर्नये ॥ ८ ॥

[विचिन्त्य सहर्षाश्वासं]

अद्यैषा पृथिवी समुद्रपरिखा देव्याः सपत्नी भवे-
दद्यारात् करदान्नृपान्नृपकुलं भीत्या वरिष्यन्ति च ।
अद्यायास्यति हेमकुम्भभरितैः शिष्यैः समं मन्त्रिणा
साम्राज्ये ह्यभिषेक्तुमादृतमना देवं पुरोधाः स्वयम् ॥ ९ ॥

[इति सत्वरं परिक्रामन् स्खलनं रूपयित्वा पुरोऽवलोक्य सविषादं] हा धिक् सर्वमेवेदमाकुलितं प्रतिनिविष्टेनैव[1] दैवेन । तथाहि,

वरपाणौ वधूपाणिमर्पयन्ती स्वपाणिना ।
देवी देवमभिज्ञाय रुषिता याति चण्डिताम् ॥ १० ॥

[पार्श्वतो दृष्ट्वा सानुतापं] हन्त तदवस्थामेव वसुलक्ष्मीमपि विकृष्य भ्रुकुटिभीषणमुखी भर्त्सयन्तीव पार्श्वचरं परिजनमपि देवी साटोपमितो दक्षिणेन सपरिवारा अस्मद्दृग्गोचरमप्यतिक्रान्तैव । [परावृत्य पश्यन्] हन्त क देवोऽपि सह पिठरेण भग्नोत्साहो निर्गत एव । अहो सर्वमिदं चिन्ताविपरीतत्वे संवृत्तम् । [इति क्षणं व्यथित इव स्थित्वाकर्ण्य साश्चर्यं] हन्त प्रभातं प्रभातम् । तथाहि,

अरुणारुणकान्तिदीपितायां
यदिहैन्द्र्यां दिशि दावशङ्कयेव ।

---

१. 'ष्टेनेव' क

चकिता बत ताम्रचूडपालिः
कुकुकूःकूरिति चोक्रुशीति तारम् ॥ ११ ॥

[उपरि पश्यन् सविस्मयं] किञ्च,

विडम्बयति चन्द्रमा वसुमतीमुखं निष्प्रभं
कुतोऽप्युडुगणैरदःपरिजनैरिवालीयते ।
वधूवरहृदोर्विलग्न इव कश्चिदाकस्मिकः
पुरन्दरदिगन्तरेऽप्यतनुदीप्तिरर्चिर्गणः ॥ १२ ॥

[सर्वतः पश्यन् सविस्मयं] अहो रामणीयकं प्रभातसमयस्य । तथाहि,

वीचीकूचिति संस्तुवन्ति विहगा उद्यन्तमह्नां पतिं
पद्मिन्याः किल सौवशायनिकतां भृङ्गाः प्रयान्त्यारवैः ।
उद्यन्तः क्वचिदाहिताग्निशरणाद् धूमाः पयोगन्धिनो
घ्राणायुष्करवैधकर्मणि रसादाबद्धदीक्षा इव ॥ १३ ॥

[इति सर्वतो विभावयन् सावहेळस्मरणं] हुं तिष्ठत्विदम् । एवं विघटितमिदं कार्यं पुनः कथं घटिष्यते । [विचिन्त्य सधैर्यावष्टम्भं]

यो दूरादपि तादृशीं स्वसचिवद्वारावरोधे कृतः
स्वर्वामास्मयभञ्जिनीं स्वकमितुः साम्राज्यदां सुन्दरीम् ।
तास्ता यश्च मिथोऽन्वभावयदमूः स्नेहार्द्रसम्भावना
देवस्य स्वयमेव निर्वहति स श्रीपद्मनाभो हितम् ॥ १४ ॥

कुतोऽन्यथा स्वप्नेऽप्यस्खलितकार्यारम्भस्य स्वनीतिमूलचित्रफलकादर्शनप्रभृति ईदृशान्तरायशततमोगहनकार्यनिमीलनमहानिशीथेऽपि जागरूकप्रज्ञस्य मन्त्रिणोऽस्य बुद्धिसागरस्य विशेषतोऽद्य भूयान् संभ्रम उपलक्ष्येत ।

ह्यः सायंप्रभृति प्रबुद्ध इव यः सुप्त्वा चिरात् सर्वतो
वेश्मान्यायतनानि वा पुरि समीकुर्वन्नलं सम्भ्रमात् ।
अद्योपस्थवरोधवर्जमपराः कक्ष्यास्तु राज्ञो गृहे
प्रत्यासन्नमहोत्सवः किल परिष्कुर्वन् भृशं मोदते ॥ १५ ॥

[पार्श्वतो दृष्ट्वा सविस्मयं] अहो सर्वमिदं पुनः सुघटितमभिमुखेन पद्मनाभदेवेन । यदीदृशे समये स्वयं देवीभ्राता वेलान्तदुर्गाधिप इतोमुखमुपसर्पति । तदहं देव्याश्चिरकालप्रोषितदृष्टस्य भ्रातुश्चिराभिलषितं परस्परसन्दर्शनमीदृशसमये कथं सम्पत्स्यत इति जिज्ञासामि । तदितोऽहमन्तरेव प्रविशामि । [इति निष्क्रान्तः ।]

अङ्कावतरणम् ।

[ततः प्रविशति कनकमेखलानुनीयमाना आसनस्था
मितपरिजना सचिन्ता देवी ।]

देवी— हळा कणअमेहळे साहु । तुए जुत्तिजुत्तं उवण्णसिदं । ण एत्थ वच्चाए दोसळेसो वि । जं मह अधण्णाए कुहणापसादणं वि ताए धण्णदाए जहत्थं एव्व संपण्णं । [दीर्घं निःश्वस्य] होदु एदं । सो उण मह सिविणअक्खणादो आरहिअ ईदिसेहिं मम्मभेदणेहिं समारंभेहिं दिढं मं पीडंतो एव्वं परिणामकडुअं हिअअसळ्ळं मम्मुहेणव्व कारिदवंदो अच्चंदकुडिळमदी अय्यउत्तो कहंवि ण विस्ससणिज्जो । णं तस्स उवरि मण्णुभारदुब्भरा अहं भादुणो वि एव्वं अदिणिसंसकाळिणी णिग्घिणहिअआ संपण्णा । इदो वरं कहं भादुणो मुहं पेक्खिस्सं । [पार्श्वतो दृष्ट्वा सहर्षं] कहं इदो मए दुम्मण्णुबंदीकिअं वि सपरिवारं वच्चं वसुळक्खि मह पसादणाब्भणुण्णाणुक्खणं गण्हिअ कंजणमाळा इदो आअदव्व । (हला कनकमेखले साधु । त्वया युक्तियुक्त॰

मुपन्यस्तम् । नात्र वत्साया दोषलेशोऽपि । यन्ममाधन्यायाः कुहनाप्रसादनमपि तस्या धन्यतया यथार्थमेव सम्पन्नम् । भवत्वेतत् । स पुनर्मम स्वप्नक्षणादारभ्येदृशैर्मर्मभेदनैः समारम्भैरीदृशं मां पीडयन्नेवं परिणामकटुकं हृदयशल्यं मन्मुखेनैव कारितवानत्यन्तकुटिलमतिरार्यपुत्रः कथमपि न विश्वसनीयः । ननु तस्योपरि मन्युभारदुर्भराहं भ्रातुरप्येवमतिनृशंसकारिणी निर्घृणहृदया सम्पन्ना । इतः परं कथं भ्रातुर्मुखं द्रक्ष्यामि । कथम् ,इतो मया दुर्मन्युबन्दीकृतामपि सपरिवारां वत्सां वसुलक्ष्मीं मम प्रसादनाभ्यनुज्ञानुक्षणं गृहीत्वा काञ्चनमाला इत आगतैव ।)

[सर्वाः सविस्मयं पश्यन्ति । ततः प्रविशति सपरिवारा बाष्पायमानमुखी वसुलक्ष्मीः ।]

वसुलक्ष्मीः— [बाष्पं विमृज्य स्वगतं] अम्हो णिरासाए मह पत्थुदत्थसिद्धीए पच्चूहसदसंकुळदा । किं कादव्वं मए । [विचिन्त्य वामाक्षिस्पन्दं सूचयित्वा साश्वासं] अहवा अज्ज पच्चूसप्पहुदि णिमित्ताइ पच्चासण्णब्भुदअसूअआइ एव्वं खिज्जमाणं वि मं आसासंदि । होदु । कणअमेहळाणुणएण पक्किदिं पडिवज्जमाणा देवी बंदिसाळाणिक्खित्तं मं अणुणेदुमणा कंजणमाळामुहेण अत्तणो सण्णिहिं पाविअ तस्स [इत्यर्धोक्ते सपुळकबाष्पगद्गदं] महाणुभावस्स सअंपदाणळक्खणं अणुणअं पुणो वि मह करिस्सदि जदि तदो इत्तिआणं खणक्खणोवळक्खिज्जमाणाणं णिमित्ताणं सहळत्तणं होदि । ईदिसाणं अ सवत्तीजणविसए वि अणासस्सणिज्जाणं दुक्खाणं आमूळविच्छेदणं भविस्सदि । [सविमर्शनिर्वेदं] का कहा मह अधण्णाए पुण्णसीळधण्णजणासंसणिज्जस्स आसंसणस्स । अहवि पसीदइ मे अप्पा । (अहो निराशाया मम प्रस्तुतार्थसिद्धेः प्रत्यूहशतसङ्कुलता । किं कर्तव्यं मया । अथवा अद्य प्रत्यूषप्रभृति निमित्तानि प्रत्यासन्नाभ्युदयसूचकानि एवं खिद्यमानामपि मामाश्वासयन्ति ।

भवतु । कनकमेखलानुनयेन प्रकृतिं प्रतिपद्यमाना देवी बन्दिशालानिक्षिप्तां मामनुनेतुमनाः काञ्चनमालामुखेनात्मनः सन्निधिं प्रापय्य तस्मै महानुभावाय स्वयं प्रदानलक्षणम् अनुनयं पुनरपि मम करिष्यति यदि तत इयतां क्षणक्षणोपलक्ष्यमाणानां निमित्तानां सफलत्वं भवति । ईदृशानां च सपत्नीजनविषयेऽपि अनाशंसनीयानां दुःखानामामूलविस्मरणं भविष्यति । का कथा ममाधन्यायाः पुण्यशीलधन्यजनाशंसनीयस्याशंसनस्य । अथापि प्रसीदति मे आत्मा ।)

काञ्चनमाला— [पुरतो निर्दिश्य] **इदो देवी तुह दंसणोक्कण्ठिआ पसादपुण्णेहिं अक्खिपुंडरीएहिं आपिबंती विअ तुमं तुवरेदि ।** (इतो देवी तव दर्शनोत्कण्ठिता प्रसादपूर्णाभ्यामक्षिपुण्डरीकाभ्यामापिबन्तीव त्वां त्वरयति ।)

वसुलक्ष्मीः— [दृष्ट्वा सभयाश्वासं स्वगतं] **देविं पेक्खिअ तारिसं अ समअं संचिंतअंतो खणं अत्ता मे सहमूलबंधहिअआवट्ठंभणो वेपइ । पच्चा कंजणमालिआमुहमिऊग्गिण्णं वओमक्खिअं मंदं सम्हरिअ पसीदइ, भिसोक्कण्ठा समस्सासिदा ।** (देवीं दृष्ट्वा तादृशं च समयं संचिन्तयन् क्षणमात्मा मे सहमूलबन्धहृदयावष्टम्भनो वेपते । पश्चात् काञ्चनमालिकामुखमृदूद्गीर्णं वचोमाक्षिकं मन्दं संस्मृत्य प्रसीदति, भृशोत्कण्ठा समाश्वासिता ।)

देवी— **इदो एहि वच्चे अचंदणिसंसकम्माअरणेण कठोरहिअअं अपंडिअं वि पंडिअमाणिणिं मं तुह पिदुणो सोदरत्तणवच्छळदाए अगणिदापकिदी तुमं अकुसळेत्ति संभाविअ मह उच्चगसंभावणेन सिठिळेहि मे दुक्खं ।** [इत्युत्थाय वसुलक्ष्मीं गृहीत्वा तया सहोपविश्य तां परिष्वज्य] **पसीददु मे वच्चा । ण हु मम णिसंसत्तणं सिविणए वि सुमरिदव्वं । विसंसदो पिदुणो सण्णिहाणे ।** [इति तस्या मुखं पाणिना

प्रमृज्य परिचुम्बति ।] (इत एहि वत्से! अत्यन्तनृशंसकर्माचरणेन कठोरहृदयामपण्डितामपि पण्डितमानिनीं मां तव पितुः सोदरत्ववत्सलतया अगणितापकृतिस्त्वमकुशलेति सम्भाव्य ममोत्सङ्गसम्भावनेन शिथिलय मे दुःखम्। प्रसीदतु मे वत्सा। न खलु मम नृशंसत्वं स्वप्नेऽपि स्मर्तव्यं, विशेषतः पितुः सन्निधाने।)

[प्रविश्य प्रतीहरी]

प्रतीहारी— **इदो देवीए भादा वसुमन्तो आसण्णपडिहारभूमिं उवट्ठिओ तुवरेदि भट्टिणिं संभावेदुं।** (इतो देव्या भ्राता वसुमान् आसन्नप्रतिहारभूमिमुपस्थितः त्वरयति भट्टिनीं सम्भावयितुम्।)

देवी— [ससम्भ्रमातङ्कं स्वगतं] **किं करिस्सं।** [प्रकाशं] **कुदो कुदो विलंबीआदि। पविसेहि णं।** (किं करिष्ये। कुतः कुतो विलम्ब्यते। प्रवेशयैनम्।

प्रतीहारी— तह। (इति निष्क्रम्य पुनस्तेन सह प्रविश्य इदो इदो भाट्टिणी। उवसप्पदु भादा। (तथा। इत इतो भट्टिनी। उपसर्पतु भ्राता।)

वसुमान्— [स्वगतं]

चिरादपत्याननपङ्कजेक्षण-
स्पृहाप्रकर्षाच्चरळं मनो मे।
निशम्य संचिन्तितसिद्धिमद्य
पुरः पुरो धावति नद्धचापलम्॥ १६॥

[इति पुरोऽवलोक्य सहर्षं] **इतः किल वत्सा,**

धृतकौतुकमण्डना विशङ्क
समधिष्ठाय पितृष्वसुर्मुदाङ्कम् ।
स्वमनोरथसिद्धिवारिराशेः
परपारं किल मोदते स्पृशन्ती ॥ १७ ॥

तन्मन्ये प्रत्यासन्नमङ्गलां वत्सां पितृजनासन्निधानाविस्मरणाय स्वयमेव महाराजसन्निधानं नेष्यन्ती दातुम् आकर्ण्यास्मदाकस्मिकोपसन्निधानमतिवेलविस्मयहर्षत्रपासमुद्भेदविस्मृतकरणीयविशेषा प्रतीक्षते चिरदृष्टमत्सन्दर्शनसमुत्सुका मदागमनमिति । तदुपसर्पाम्येनाम् । [इत्युपसर्पति ।]

देवी— [ससम्भ्रमं स्वाङ्कादवतरन्तीं वसुलक्ष्मीं प्रति] वच्छे को एसो वच्चळं वि मं अगणिअ तुए अब्भुग्गमीआदि । (वत्से क एष वत्सलामपि मामगणयित्वा त्वया अभ्युद्गम्यते)

वसुमान्— [उपसृत्य]

इतोऽहमार्यामभिवादये चिराद्
विलोकनोत्को जननीमिवापराम् ।
परोक्षतोऽप्यभ्युदयैकतत्परां
ममैव मूर्तां कुलदेवतामिव ॥ १८ ॥

[इति प्रणम्योत्थाय प्रणतां वसुलक्ष्मीमुत्थाप्य परिष्वजते ।)

देवी— दीग्घाऊ होहि । इदो उवविसिअ सुणाहि भइणीए किं वि ववसिदं अत्तणो छंदेण । (दीर्घायुर्भव । इत उपविश्य शृणु भगिन्या किमपि व्यवसितमात्मनश्छन्देन ।)

वसुमान्— [सविनयं वसुलक्ष्म्या सहोपविश्य] अवहितोऽस्मि। प्रसीदत्वार्या।

वसुलक्ष्मीः— [सौत्सुक्यं स्वगतं] किं अम्हकेर(वु ? त्ति)सओ पसंगो भवे। होदु। अवहिदा सुणिस्सं। (किमस्मदीयविषयः प्रसङ्गो भवेत्। भवतु। अवहिता श्रोष्यामि।)

देवी— इअं णो वच्चा वसुळक्खी अय्यवुत्तहिअअंगमा मह सही भविअ सुहाणिहिळेहव्व णहंगणं अळंकरीअदु वश्चिउळं ति णिण्णिद-मणोरहा सअं एव्व तुह अणवेक्खणीअत्तणाहिमाणेण सुहस्स सिग्घं ति करिअ अज्ज एव्व अय्यउत्तहत्थं पावेदुं पत्थिदा तुह आअमणसवण-विम्हिदहिअआ णिरदिसअहरिसपरवसचित्तवुत्ति ह्मि किं कादव्वदा-मूडा। (इयं नो वत्सा वसुलक्ष्मीः आर्यपुत्रहृदयङ्गमा मम सखी भूत्वा सुधानिधिलेखेव नभोङ्कणमलङ्करोतु वञ्चिकुलमिति निर्णीतमनोरथा स्वयमेव तवानपेक्षणीयत्वाभिमानेन शुभस्य शीघ्रमिति कृत्वाद्यैव आर्यपुत्रहस्तं प्रापयितुं प्रस्थिता तवागमनश्रवणविस्मितहृदया निरतिशयहर्षपरवशचित्तवृत्तिरस्मि किं-कर्तव्यतामूढा।)

वसुलक्ष्मीः— [स्वगतं] हिअअ एव्वं दाणिं दुक्खण्णवणि-मग्गस्स खणंदरे तुह पारदंसणं ति ण विस्ससणिज्जं एदं। (हृदय एव-मिदानीं दुःखार्णवनिमग्नस्य क्षणान्तरे तव पारदर्शनमिति न विश्वसनीयमेतत्।)

वसुमान्— कोऽत्र विचारणावसरः। यदार्या मन्यते तदवि-लम्बेन निर्वर्तनीयोऽयमर्थः। राजकार्यवशात् सचिवानीतेन मयापि अनुभूयानुमोदनीयः।

देवी— [सहर्षं स्वगतं] जाव मह असूआअरिदं परोक्खसंवण्णं से सवणेसु ण पडइ दाव पच्चक्खं एव्व सोजण्णाअरिदेण तं पमज्जिदुं इच्छामि। [प्रकाशं] ता उट्ठेहि जहिं अय्यउत्तो तहिं एव्व इमाए सह गच्छह्य। [इत्युत्थाय वसुलक्ष्मीं हस्ते गृहीत्वा वसुमता सह्लपन्ती परिक्रामति।] (यावन्ममासूयाचरितं परोक्षसम्पन्नमस्य श्रवणयोर्न पतति तावत् प्रत्यक्षमेव सौजन्याचरितेन तन्मार्ष्टुमिच्छामि। तदुत्तिष्ठ यत्रार्यपुत्रस्तत्रैवानया सह गच्छावः।)

[ततः प्रविशति चिन्ताविवशव्रीळितहृदयः सधैर्यावष्टम्भो
राजा प्रहृष्टवदनो विदूषकश्च।]

राजा— [सविलक्षस्मितं]

हा कष्टां गमिता दशां कुटिलया मत्कारणात् प्रेयसी
देव्यासृग्वशयेव हस्तकलिता मृद्वी मदाक्षिप्तया।

[सविगर्वं]

अन्वक्षं प्रतिकर्तुमक्षममतीनस्मान् धियोत्प्रेक्ष्य सा
जह्यादेव मनस्विनी स्वयमसून् धिङ्मामकिञ्चित्करम्॥ १९॥

[स्मृतिमभिनीय सविषादं] तदा हि सा चण्डी,

वात्सल्याद् भगिनीसुतत्वकलितात् प्रेमोन्मिलत्पाणिना
पाणावादधती मम प्रियतमापाणिं रसादात्मनः।
स्पर्शान्मे क्षुभिता चिरं परिचिताद् दण्डाहतेवोरगी
वैरणोत्थमना भृशं धृतिमिवाक्षिप्य प्रियां निर्गता॥ २०॥

---

१. 'ष्टं' ख.

[सविषादं] मया हि तस्मिन् समये,

मनोरथपथातिगां त्रिविधतापदिव्यौषधिं
सुखैकघनरूपिणीं परमनिर्वृतिं रूपिणीम् ।
अवाप्य सुदतीमिमां विवशचेतसा विश्लथ-
त्करेण बुबुधे न सा विधिवशाच्च्यवन्ती करात् ॥ २१ ॥

[इति क्षणं विचिन्तयन् स्तब्ध इव स्थित्वा पुनः स्मृतिमभिनीय] सा हि,

शृङ्गारार्णवसंप्लवैककमला कन्दर्पतन्त्राशयो
मूर्तः स्वेन वसन्तमर्म परमं मन्दानिलप्रक्रिया ।
सारः शारदपार्विकेन्दुमहसः सौन्दर्यसम्भावना-
रूपाणां च समुच्चयः किमपरं संसारतत्त्वं प्रिया ॥ २२ ॥

[सव्यथं]

लोकस्याभ्युदयो रसस्य महिमा सम्भोगनाम्नः परो-
ऽहङ्कारः स्मृतिजन्मनः परिणतिश्चक्षूरते रागिणाम् ।
सम्भूतिर्नवयौवनस्य कुतुकं विश्वस्य सम्भावना
सौन्दर्यादिगुणोत्करस्य तरुणी क्षुभ्नाति मन्मानसम् ॥ २३ ॥

[विमृश्य सातङ्कं]

दौर्भाग्यं मम किं ब्रवीमि महतामप्याधिराज्यश्रियं
पौलोमीपरमां न नन्दति वृषा यद्वर्जितां सापि चेत् ।
अक्लेशेन भुजान्तरं मम गतामात्यस्य तैस्तैर्नयै-
रास्वादावसरे ह्रियेत विधिनावस्कन्दय हा सुन्दरी ॥ २४ ॥

---

१. 'त्वा स्मृति' ख.

[इति क्षणं ध्यायन् निमित्तं सूचयित्वा सप्रत्याशं]

घटजन्ममुनेरिवोदये सलिलं मे हृदयं किमप्यहो ।
अनिदानमिदं प्रसीदति प्रतिलभ्येशमिवान्तरं मुनेः ॥ २५ ॥

[विचिन्त्य]

पिठरः सचिवान्तिकं गतश्चतुरोऽप्यद्य चिरायते कुतः ।
न फलेन विना मदन्तिकं समुपैष्यत्ययमस्मदाधिवित् ॥ २६ ॥

[इति परितः पश्यन् दृष्ट्वा सहर्षं] सखे अपि व्याप्रियते त्वदुक्तजनालोकसमवधाननिर्निद्रमस्मत्प्रमादपरिभ्रंशितार्थाधिगमोपाये सचिवसिंहस्य प्रज्ञाचक्षुः ।

विदूषकः— [सगर्वस्मितं भुग्नग्रीवमुदरं परिमृशन्] णं दक्खिस्ससि खणंदरेण णीदिसहिअं उवेअं एव्व सह देण । णहि पिडरसम्मो सामिणिओजिअकज्जसिद्धिं विणा णिवट्टमाणो दिट्ठपुव्वो । (ननु द्रक्ष्यसि क्षणान्तरेण नीतिसहितमुपेयमेव सह तेन । नहि पिठरशर्मा स्वामिनियोजितकार्यसिद्धिं विना निवर्तमानो दृष्टपूर्वः ।)

[प्रविश्य प्रतीहारी]

प्रतीहारी— जेदु देवो । णं आसण्णपडिहारभूमिं उवट्ठिओ णेत्तभूदो देवपादाणं बुद्धिसाअरो विण्णवेदि- इदो सिंधुदेसाहिवणंदणो वसुरासिवम्मो णाम समिद्धपरिअणोवअरणो केण वि कज्जविसेसेण तुरिअं देवस्स दंसणूसुओ इदो आसण्णपडिहारभूमिं उवट्ठिओ । ता सह देण सपरिवारेण देव्वं दट्ठुं इच्छइत्ति । (जयतु देवः । नन्वासन्नप्रतिहारभूमिमुपस्थितो नेत्रभूतो देवपादानां बुद्धिसागरो विज्ञापयति— इतः सिन्धुदेशाधिपनन्दनो वसुराशिवर्मा नाम समृद्धपरिजनोपकरणः केनापि कार्य-

विशेषेण त्वरितं देवस्य दर्शनोत्सुक इत आसन्नप्रतिहारभूमिमुपस्थितः। तत् सह तेन सपरिवारेण देवं द्रष्टुमिच्छतीति।)

राजा— [स्वगतं साशंसं]

धात्रा दत्तः कर इव ममालम्बनायार्तिगर्ते
मङ्क्त्वागाधे हतनयपदन्यायमुत्सीदतोऽन्तः।
तीव्रोदर्के भवजलनिधौ दूयमानस्य साधो-
रीशेनाचार्य इव सदयः पाशविच्छेदनाय ॥ २७ ॥

[प्रकाशं सदृष्टिक्षेपं] प्रज्ञावति! कुतो विलम्ब्यते। प्रविशतु सहाभिलषितैरभिमतासिद्धयै स्वायत्तसिद्धिः सचिवचूडामणिः।

प्रज्ञावती— तह। [इति निष्क्रान्ता] (तथा।)

राजा— [विचिन्त्य] कथमीदृशे समये हठादुपस्थितोऽनेकाक्षौहिणीप्रतिक्षणप्रतीक्ष्यमाणावसरस्य अस्मन्मातुलबालमित्रस्य महाराजवसुनिधेर्हृदयङ्गमोऽयं वसुराशिर्नाम प्रियसूनुरद्यैवाभिषिक्तयौवराज्योऽपि भगिनीवत्सलतया अगणितविदूरगमनक्लेशः स्वयमेव। तदत्र कथं वा प्रतिविधास्यति बुद्धिसागर इति विचार्यापि न निश्चिनोमि। अथवा एवमपि कश्चिदारम्भः प्रकृतोपयोगी सचिवस्येति मन्ये। [पार्श्वतो विलोक्य हर्षपारवश्यमभिनयन् ससंभ्रममुत्थाय] इतो देवी स्वयमेव मनोवृत्तिरिव विषयविशेषरमणीयामुक्तिलक्ष्मीं वसुलक्ष्मीमपि उपनयन्ती मह्यं रोचतेतराम्। [अन्यतो विलोक्य] हन्तायमपि यथोक्तपरिवारः प्राप्त एवाभ्यन्तरं बुद्धिसागरः। अतोऽहमासन एवोपविश्य प्रमोदपरम्परामनुभवामि। [इत्यासने पुनरुपविशति।]

[ततः प्रविशति यथानिर्दिष्टो बुद्धिसागरः]

बुद्धिसागरः— [सहर्षं स्वगतं]

देवस्याभ्युदयाय यत् किल मया प्रारम्भ्यनुक्त्वेश्वरे
यच्चात्रोपनतोऽन्तरायनिचयस्तैस्तैरुपायैर्धुतः ।
भ्रातृस्नेहपुरस्कृतेन मनसा देव्यद्य यच्चेष्टितं
सर्वं तन्मयि सम्मुखेन विधिना दिष्ट्यैव सम्पूर्यते ॥ २८ ॥

तदद्य महाकुलीनानुरूपेदृशधीरोदात्तवरयादृच्छिकोपालम्भान्निरतिशयान्तस्तोषमन्थरेण पित्रा सिन्धुपतिना प्रशस्य बहुधा दुहितुर्भागधेयमहिमानं संबन्धानुरूपयौतकसम्भारेणासंख्येयरथतुरगपत्तिदासीदासमुखनिरुपमरत्नमहार्हाभरणकोशसञ्चयादिरूपेण समं प्रहितः प्रियतमोऽपि दुहितृस्नेहगौरवेण अस्मत्स्वामिगुणगौरवेण चायं सुकुमारः कुमारो वसुराशिः । यावद् भगिनीगतं देव्युपरोधादि न किञ्चिद् विज्ञाय दूयेत तावद्देवास्मदुद्बोधितकनकमेखलानुनयभ्रातृसमागमगौरवाभ्यां स्वयमेव देवी देवाय सबहुमानमेनामुपनयन्ती परराजसम्मुखमस्मान् मानसंवर्धनेन प्रमोदगिरेरधित्यकायामुपनयति । [कुमारं दृष्ट्वा] अहो कायमादरनिर्निमेषं पश्यन् निरन्तरोद्यदश्रुधाराभिर्मलिनयति मुखपुण्डरीकम् । [इति पुरत पश्यन्] अहो इयमितो वसुलक्ष्मीः देवीहस्तावलम्बिनी वसुमत्सन्निधानविस्रब्धहृदया व्रीडानन्दमन्थरगतिरभिमुखी देवमुपगच्छन्ती चिराद्‌व्याक्षितानेन । तद्वशाच्चायमस्येदृशाश्रुसमागमः । [वसुलक्ष्मीं निरूप्य सविस्मयं] इयं सा,

व्याजान्नौकाधिरूढामधिजलधि शनैः कर्णधारोह्यमानां
हूणोर्वीसार्वभौमप्रणिधिभिरवयन् देवपादप्रियेप्सुः ।
रुन्धन् नौकासकस्रैरभिमतहरिदध्वानमस्यासमन्तात्
सामन्ते मन्युभारादिव कथमपि धामापयामास वञ्चीन् ॥२९॥

[इति सबहुमानं पश्यन् विचिन्त्य सादरं]

किं ब्रूमो हूणराजस्य सत्यसन्धस्य सौहृदम् ।
येनान्यदुष्करं श्रेयः साधितं मित्रगौरवात् ॥ ३० ॥

[पुनर्विचिन्त्य सविमर्शं]

भावस्तस्येत्थमेषा किल भवति वधूर्यस्य वीरोत्तमस्य
स्वेनासौ सार्वभौमः प्रभवति निखिलां भोक्तुमुर्वीमयत्नात् ।
तत्संबन्धादयं मां नियतमभिभवेत् सिन्धुराट् प्रागमर्षी
तस्मान्मन्मित्रमुर्वीमदनमिनकुलोत्तंसमेषा वृणीतात् ॥ ३१ ॥

इति । अथवा,

किं ब्रूमो देवभाग्यं निरवधि यदयं सार्णवोर्व्येकवीरो
मैत्रीमाकाङ्क्षतेऽस्य स्वयमिव निधनाधीश्वरो हूणराजः ।
यच्चैनं सिन्धुकन्या स्वयमियमवृणोदुत्तमं पूरुषाणा-
मन्वास्ते यच्चिरादप्ययममुपरिमितैः सैन्धवैः सिन्धुराजः ॥३२॥

अपिच,

तन्मन्ये निर्व्यलीकं प्रभवितुमनयोः सौहृदं सिन्धुहूण-
क्ष्मापत्युत्तंसयोर्द्राक् चिरवृतबलवल्लभकापेक्षयालम् ।
यद्वत् सन्तप्तलोहद्वयघटनमयःकीलसंघट्टमाप्त्वा
यूनोर्दुर्मानिनोर्वा मधुसमयनिशारम्भमाप्येव योगः ॥ ३३ ॥

[इति विस्मितो गच्छति ।]

कुमारः— [सहर्षं स्वगतं] अद्य हि,

पश्यामि सिन्धुकुलनीरधिचन्द्रलेखां
ताताम्बयोर्मम च जीवकलामिवैकाम् ।
धीचापलेन मुषितां जलधौ जनन्याः
प्रेत्यागतामिव बताभिमतां स्वसारम् ॥ ३४ ॥

[निरूप्य]

केयमम्बेव लज्जार्तामिमामनुनयत्यहो ।
कश्चैष वत्सलः पश्चादनुसृत्यानुगच्छति ॥ ३५ ॥

[विमृश्य]

सेयं देवी वसुमती सोऽयमस्याः प्रियोऽनुजः ।
लालनेन ययोर्वत्सा जीवन्ती यदिति श्रुतम् ॥ ३६ ॥

राजा— [बुद्धिसागरं दृष्ट्वा साशंसं स्वगतं]

यस्यायं मतिचक्षुषा सुसचिवो जागर्ति षाड्गुण्यचिद्
दुःसाधं त्रिदशैश्च यत् त्रिभुवने तत् तस्य सिध्येन्मम ।
यस्यान्तःकरणं वशे स्थितमतद्धूत्या प्रसीदत्यलं
तस्य स्यादपि दुर्मतं शमधनैः प्रत्यक्स्वरूपं मतम् ॥ ३७ ॥

अपिच,

नैवं प्रागुशना बभूव न गुरुर्नैवोद्धवाद्याः कुत-
स्त्वन्ये स्वामिसमीहितार्थघटने सर्वेऽप्यमी शिक्षिताः ।
योऽसावभ्युदयो निरुत्तरतरः स्वामी न यं वेद वा
तस्येदृक्षसमीहितस्य घटने संहत्य वा के त्वमी ॥ ३८ ॥

---

1. ' स्थितिमतं धूत्या ' ख.

[वसुराशिं पश्यन् सविस्मयं]

हन्तास्मिन्नपि सैव हेममहिमाधिक्षेपिणी चातुरी
रूपस्य प्रसरा दृशोरपि तथा ह्रीविस्मयप्रेङ्खिताः ।
सौन्दर्यं च तदेव मुग्धमधुरस्मेरं तदेवाननं
वस्त्वेकं विधिना द्विधा कृतमिदं नूनं सगर्भ्याभिधम् ॥ ३९ ॥

वसुराशिः— [राजानं दृष्ट्वा सादरप्रणयबहुमानं स्वगतं] हन्तायमसौ स महानुभावः,

यः प्रत्यर्थिक्षमाभृद्वि(धम ? मथ)नकुलिशान्यूनचारित्रबाहा-
हेलासम्पद्धृतेळाभरमुदितफणिग्रामणीश्लाघितौजाः ।
तत्तद्ग्रन्थाढ्यनानासुरतविधिकलाचातुरीलाभहृष्यत्
तत्कान्ताशास्यमानानवधिबुधगणामोदितायुर्विवृद्धिः ॥ ४० ॥

अपिच,

आजावाक्रम्य गुर्वीमपि परपृतनां क्षीबवे¹तण्डशुण्डा
छिन्नाश्वैकैकखड्गप्रभृतिषु कदळीलावमुच्चैर्विलूय ।
बाहास्पर्धापराधादिव विमतभटान् भीषयन् दुर्निरीक्ष्यो
रुद्रो विश्वावसादी स्वयमिह हतवान् यश्च जज्ञे सपत्नैः ॥ ४१ ॥

किञ्च,

यद्भीत्या यूथशोऽस्मज्जनपदनिकटस्थाऽवना कम्पमानाः
प्रालेयाद्रिं विगाह्याप्यनवरतहिमासङ्गतः कम्पमानाः ।
पत्रावल्या वृताङ्गाः प्रतिनृपतिगणाः सर्वतो भग्नमाना
गायन्त्यस्यात्मलाभाद् यश इति कुतुकादन्वहं विस्मिताः स्मः ॥

1. ' वेताळ ' क.

अपिच,

सन्धित्सन्तः स्म हूणावनिपतिभिरमी दुर्मदैस्तातपादा-
यत्ता यत्प्रीतिलब्ध्यै स्वजनपदभवान् प्रेषयन्त्युत्तमाश्वान् ।
यत्सौन्दर्येऽन्वरज्यद् भृशमपि ललितालेख्यगेऽस्मत्स्वसेयं
दूरे यद्गौरवान्मां प्रियमपि तनयं प्राहिणोत् तातपादः ॥ ४३ ॥

[इति निर्निमेषं पश्यन् व्रजति ।]

बुद्धिसागरः— [राजानं दृष्ट्वा सविनयबहुमानं]

इतः सिंहासनं देवः सवयस्योऽधितिष्ठति ।
मन्त्रेणान्वास्यमानोऽयमुत्साह इव मूर्तिमान् ॥ ४४ ॥

इतश्च स्वयं देवी,

अन्वास्यमाना परिचारिकाभि-
श्चित्रा च पत्येऽत्र जनीं नयन्ती ।
अनन्यलभ्यां मुदमीश्वराय
स्वयं नयन्ती कमलेव भाति ॥ ४५ ॥

[राजानं वसुलक्ष्मीं च विलोक्य]

दिष्ट्येयं वनचन्द्रिकेव न गता शोच्यां दशां सुन्दरी
दिष्ट्यायं न विनेव चम्पकतरुर्माध्वीं महात्मा क्षतः ।
दिष्ट्यामू घटयन् न विन्दति विधिर्लोके चिरं वाच्यतां
दिष्ट्या तत्करयोरदःकृतिकृतोर्नैयान् श्रमोऽपि क्षतः ॥ ४६ ॥

विमृश्य सविस्मयं]

काशीदेशायताक्षी स्वयमिव कमला सिन्धुनाथावरोधे
वक्षःसीमेव विष्णोरनुपमसुषमश्रीः क चायं महात्मा ।
केदृग् योगोऽनयोर्वा कथमपि महता संविधानेन तद्व-
न्मद्बुद्धेर्मन्दराद्रेरिव भवति विधा कापि तत्रोपयोगे ॥ ४७ ॥

अथवा,

मन्दरस्येव मद्बुद्धेर्द्धारितामात्रमानयन् ।
देवस्य पुण्यपाकोऽत्र हेतुर्हरिरिव स्वयम् ॥ ४८ ॥

वसुलक्ष्मीः— [सलज्जाशंसं स्वगतं] हिअअ मा तुमं अट्ठाणे णिव्वुदं होहि । अणुभूदप्पच्चूहविवत्तिसदविक्खदस्स किं दाणिं तुह णिव्वुदत्तणं संपण्णं । अहवा कुदो मए विरमीआदि । ण हु असंभाविदं णाम किं वि अत्थि दव्वे अणुऊले । जं एत्तिअस्स संभावणस्स पदं कारिदम्हि देव्वेण । ता णीसंकं उवट्ठिअं सुहं अणुहोमि । [इत्यधोमुखी राजानं तिर्यक् पश्यति ।] (हृदय मा त्वमस्थाने निर्वृतं भव । अनुभूतप्रत्यूहविपत्तिशतविक्षतस्य किमिदानीं तव निर्वृतत्वं सम्पन्नम् । अथवा कुतो मया विरम्यते । न खल्वसम्भावितं नाम किमप्यस्ति दैवेऽनुकूले । यदियतः सम्भावनस्य पदं कारितास्मि दैवेन । तन्निश्शङ्कमुपस्थितं सुखमनुभवामि ।)

राजा— [वसुलक्ष्मीं विलोक्य सस्पृहामोदं]

प्रेमस्मेरैर्मधुरमधुरैर्ह्रीनतैर्भावलोलै-
र्भावोद्गारैः प्रणयकलिलैः स्नेहनिष्यन्दमन्दैः ।
प्रत्यालोके मम विनमितैः किञ्च रागाद् विकीर्णै-
स्तन्व्यापाङ्गैः सरसमिह निर्व्याजमाप्यायितोऽस्मि ॥ ४९ ॥

[पुनः साशंसं]

यदि विधिरनुकूलो निर्व्यलीकं मयि स्याद्
यदि च सचिवनीतिः सिद्धिसन्दर्शिनी मे ।
यदिह किरति सुभ्रूर्मय्यतुङ्गानपाङ्गान्
भवतु मम मुहूर्तः सन्ततः शोभनोऽयम् ॥ ५० ॥

[इति सस्वेदरोमाञ्चं क्षणं स्तब्ध इव स्थित्वा देवीं पश्यन् साशङ्कोपालम्भं]

दुःस्वातन्त्र्यं प्रभवत इतो दुर्विधेर्लोकतन्त्रे
किन्नु ब्रूमः क इह लघयेदेवमुद्वृत्तमेनम् ।
यो यो भावः स्वरसमधुरो यत्र यत्रोपनम्र-
स्तं तस्यैवाकरुणहृदयो यत्कदर्थीकरोति ॥ ५१ ॥

[सधैर्यविष्टम्भं] इयं हि देवी,

मन्ये भ्रातुः सन्निधानात् पुरेव
प्रायो नेयाद् दुर्जनत्वं प्रियायाम् ।
चान्द्रीं लेखां शम्भुफालानलार्चि-
र्दग्धुं नेष्टे तत्कपर्दान्तरस्थाम् ॥ ५२ ॥

[विभाव्य सवितर्कं]

यत् प्रेक्षणीयतरमाननमद्य देव्या
यच्चानुयाति वसुमान् भगिनीं प्रहृष्टः ।
यच्चानयोः सविधगा स्वदते प्रिया मे
शान्तस्ततः स्वयमिमामनु मन्युरस्याः ॥ ५३ ॥

[पुनः सहर्षं]

सत्यं प्रसादसुमुखी प्रकृतिं देवीयमद्य याति निजाम् ।
शरदीव हृद्यसलिला जगतामामोदिनी गङ्गा ॥ ५४ ॥

[पुनः साशंसं]

निर्णीयतेऽद्य सचिवावधृतार्थसिद्धिः
श्रीपद्मनाभगुरुदत्तकरावलम्बा ।
नो चेत् कथं वसुमता वसुराशिना वा
देव्यानयेत् प्रियतमां सचिवोऽन्वियान्माम् ॥ ५५ ॥

[इति विभावयन् विदूषकं विलोक्य] वयस्य कथं वा मन्यसे ।

विदूषकः— [सगर्वं] किं एत्थ मए मणणिज्जं अवसिस्सदि । सचिवेणव्व णिव्वूढं णिव्वणिज्जं । ता उट्ठेहि । सव्वाणं वि इमाणं जहसमीहिदावत्थाणपय्यत्तावआसं पदेसं उवसंकमह्म । (किमत्र मया मन्तव्यमवशिष्यते । सचिवेनैव निर्व्यूढं निर्वाह्यम् । तदुत्तिष्ठ । सर्वेषामप्येतेषां यथासमीहितावस्थानपर्याप्तावकाशं प्रदेशमुपसंक्रमामः ।)

राजा— तिष्ठत्विदम् । इत आगता देवी । तदनुमत्यैव सर्वमिदं रोचते मह्यम् ।

विदूषकः— एव्वं होदु । (एवं भवतु ।)

चन्द्रलेखा— [वसुलक्ष्मीमपवार्य सकौतुकं] हला किं ण पेक्खसि णं इदो कुमाळो वसुरासी सामिद्धपरिअणो पीदिवित्थारिदेहिं णअणंजळिहिं आपिबंतो विअ चिरावळोकिदं तुमं पेक्खइ । (हला किन्न पश्यसि । नन्वितः कुमारो वसुराशिः समृद्धपरिजनः प्रीतिविस्तारितैर्नयनाञ्जलिभिरापिबन्निव चिरावलोकितां त्वां प्रेक्षते ।)

वसुलक्ष्मीः— [सहर्षावेशं निरूप्य स्वगतं] अंहो चिरावळोइदं अय्यकुमाळं झत्ति पेक्खंतीए णिरवसेसबंधुजणसह्मरणवाउळीकिदाए किंकादव्वदाणवगममंथराए हत्थपादा णप्पसरंति । किं करिस्सं । [इति निष्पन्दं पश्यति ।] (अम्हो चिरावलोकितमार्यकुमारं झटिति प्रेक्षमाणाया निरवशेषबन्धुजनसंस्मरणव्याकुलतया किंकर्तव्यतानवगममन्थराया मम हस्तपादं न प्रसरति । किं करिष्ये ।)

देवी— [राजानं निरूप्य सावेगं स्वगतं] अंहो अळंघणिज्जा देव्वगई । जं तारिसो वि अय्यउत्तो मह अधण्णदाए अज्ज ईरिसो संपण्णो । का गई । अहवा इदो वरं ण मे भादुणो सण्णिहाणविसेसेण दुज्जणत्तणावआसो । ता चउरत्तणं पुरोकरिअ सोजण्णं एव्व ओळंबणिज्जं । ता एव्वं करेमि । [इति वसुलक्ष्मीं हस्ते गृहीत्वा राजानमुपेत्य] पडिच्छदु णं अय्यउत्तो । इअं णो वसुमंतस्स अणपच्चस्स अवच्चाकिदआ बाहिअचाळिणी पाणवुत्तिव्व । ता इअं मए णिव्विसेसं अय्यउत्तेण ओळंबणिज्जा । किंदु इमाए, मह सहित्तणेण होदव्वं । [इति राज्ञो हस्ते वसुलक्ष्मीं समर्पयपि ।] अम्हो अलङ्घनीया दैवगतिः । यत् तादृशोऽप्यार्यपुत्रो ममाधन्यतया अद्येदृशः सम्पन्नः । का गतिः । अथवा इतः परं न मे भ्रातुः सन्निधानविशेषेण दुर्जनत्वावकाशः । तच्चतुरत्वं पुरस्कृत्य सौजन्यमेवावलम्बनीयम् । तदेवं करोमि । प्रतीच्छत्वेनामार्यपुत्रः । इयं नो वसुमतोऽनपत्यस्यापत्यकृतका बाह्यचारिणी प्राणवृत्तिरिव । तदियं मया निर्विशेषमार्यपुत्रेणावलम्बनीया । किन्तु अनया मम सखीत्वेन भवितव्यम् ।)

राजा — [सहर्षमुत्थाय गृहीत्वा सानन्दपुळकं स्वगतं]

अद्येयं सफला जनिः स भगवान् प्रासीदद्यैव नः
श्रीकान्तः परिपेदिरेऽद्य सुकृतान्यद्यैव धाता कृती ।

अद्याहं किल काम्यमानविभवः सेन्द्रैरमर्त्यैरपि
प्रेयस्या यदयूयुजद् वसुमती नीतिः श्रियेवात्र माम् ॥ ५६ ॥

[प्रकाशं]

यद्येवं दयसे प्रिये मयि परित्यक्तान्यथाभावधी-
रात्मानं कलयामि किन्तु बहुना मुक्तेः परस्तादहम् ।
किञ्चाज्ञापयसीह यद्यदधुना तत्तत्तथा नान्यथा
किन्त्वीष्टे प्रभुसम्मितोक्तिमितरा सूक्तिः स्वयं लङ्घितुम् ॥५७॥

वसुराशिः— [दृष्ट्वा सहर्षं स्वगतं] आश्चर्यमाश्चर्यम् ,

यद् दूरादपि मामवोचदमुना निर्धारितं मन्त्रिणा
यस्मिन् मासि यदाह्नि यत्र समये यस्मिन् क्षणार्धेऽथवा ।
वत्सायाः स्वयमर्पणं वसुमतीदेव्या क्रियेतेत्यहो
तातस्तत् किमहं ब्रवीम्यविकलं पश्यामि साक्षात् स्वयम् ॥५८॥

[इति विस्मितः पश्यति ।]

बुद्धिसागरः— [उपसृत्य] विजयतां देवः । [वसुराशिं निर्दिश्य]

अयं कुमारो वसुराशिवर्मा
प्रियः सुतः सिन्धुपतेः प्रवीरः
स्वसुप्रियत्वात् स्वयमागतोऽत्र
नमत्यसौ नः पितृनिर्विशेषम् ॥ ५९ ॥

[इति विनतः पार्श्वतस्तिष्ठति । वसुराशिरुपसृत्य प्रणमति ।]

राजा— [सादरमुत्थाय] आयुष्मानेधि वसुराशिवर्मन् । इतो-
ऽस्योचितमासनम् । [इति बुद्धिसागरमवेक्षते ।]

बुद्धिसागरः— इतः कक्ष्यान्तरे सर्वतःक्लृप्ततत्तदुचितासनसन्निवेशमहितां कौतुकवेदिमाक्रम्यासनपरिग्रहेणावशिष्टमप्यानन्दभूमानमनुभवन्तु देवपादाः ।

राजा— [स्वगतं सावहेलं]

यत्त्वीदृशी वसुनिधेस्तनया मयाप्ता
नेतोऽपि किञ्चिदवशिष्यत एव लभ्यम् ।
सत्यं तथापि सचिवोक्तिषु गौरवेण
सम्भावयामि कुतुकात् किल तं प्रदेशम् ॥ ६० ॥

[प्रकाशं] इतो गच्छामि । क्व सा कक्ष्या ।

बुद्धिसागरः— इत इतो देवः ।

वसुलक्ष्मीः— [हर्षगद्गदकण्ठी वसुराशिमुपेत्य] अय्य वंदामि । [इति प्रणमति ।] (आर्य वन्दे ।)

वसुराशिः— [प्रीतिविस्फारिताक्षः पश्यन् सास्रं स्वगतं]

चिरात् स्वसुः किलार्येति वचोऽव्याजामृताप्लुतः ।
यत्सत्यं निर्वृतेः पारं न पश्यामि जडीकृतः ॥ ६१ ॥

राजा— इत उपसर्पामि । [इति सर्वैः परिक्रामन् कक्षान्तरप्रवेशं नाटयित्वा सर्वतो विलोक्य सविस्मयं]

हेमस्तम्भैरनेकैर्मणिगणखचितैर्विद्रुमैस्तोरणैर्वा
भास्वन्मुक्तैर्विटङ्कैर्मुकुरमयचतुर्भित्तिकाभिश्च क्लृप्ता ।
मध्येवेद्यब्जरागाभिधमणिकृतया रत्नसिंहासनेन
भ्राजिष्णुः केयमद्य त्रिदशपतिसभां मन्यते तां तृणाय ॥ ६२ ॥

बुद्धिसागरः— [परितः प्रसर्पन्] देव इतः परार्ध्यसिंहासनं सार्वभौमराजमात्रानधिष्ठितपूर्वमाभिमतविशेषासिद्ध्यै सहानया वसुराशि-भगिन्या दिव्यसुन्दर्याधितिष्ठतु देव इति स्वातन्त्र्याद्विज्ञापयामि ।

राजा [सकौतुकं स्वगतं]

यद् रोचते प्रभवते सचिवाय तत्र
यत्किञ्चिदप्यविमृशन् परवानिवाहम् ।
कृत्वान्यराजनिवहैरपि दुर्लभानि
श्रेयांस्यवापमतनूनि यदीदृशानि ॥ ६३ ॥

तत्र न विचारणीयमवशिष्यतेऽस्माभिः किञ्चित् । [प्रकाशं] इतोऽह-मधितिष्ठामि । [इति सिंहासने उपविशति । वसुमतीवसुराशिवसुमन्तः वसुलक्ष्मीं सिंहासने उपवेशयन्ति ।]

[नेपथ्ये मङ्गलवादित्रध्वनिः तौर्यत्रिककलकलश्च ।]

वसुराशिः— [सप्रमोदं राजानं प्रति] आर्य एतद्विज्ञापयन्ति वोऽमन्दानन्दमन्थरपर्युत्सुकहृदयास्तातपादाः ।

राजा— [सबहुमानं] किमाज्ञापयन्ति गुरवः ।

वसुराशिः—

दुग्ध एव पतितं फलं करात्
पातिता पयसि खण्डशर्करा ।
यन्मुधा मुषितमद्य नः करात्
वीर रत्नमिदमानतं त्वयि ॥ ६४ ॥

इति ।

राजा— परमनुगृहीतोऽस्मि ।

[वसुलक्ष्मीः सलज्जाकूतं राजानमवेक्षते । प्रविश्य पटाक्षेपेण शातकुम्भकुम्भहस्तः पुरोहितः ।]

पुरोहितः— [सहर्षं राजानं विलोक्य परितः पश्यन्] भो भो ऋत्विजः त्वरध्वं त्वरध्वम् ।

शुभंयुः सुमुहूर्तोऽयं नातिक्रामेद् यथैव नः ।
अनया सह साम्राज्ये तथायमभिषिच्यताम् ॥ ६५ ॥

तत्र चास्मदुक्तविधयैव । अद्य हि श्रवणयोगे,

आसीनमौदुम्बरभद्रपीठे
वैयाघ्रचर्मण्यधिलोम्नि शृङ्गैः ।
जीवद्गवीनामभिषिञ्चतैनं
तीर्थैस्तु साम्राज्यपदे समन्त्रैः ॥ ६६ ॥

अपिच,

ते तावच्चतुरर्णवोदकलशैर्हैमैः स्फुरत्पाणयो
ये चान्ये प्रथितापगोदकलशैर्मन्त्रादयो मामनु ।
ते सर्वेऽप्यनु मत्प्रधानकलशं जीवद्गवीशृङ्गकै-
रभ्रातृव्यमनूत्तमैः समभिषिञ्चन्त्वेनमद्येश्वरम् ॥ ६७ ॥

किञ्च,

खाङ्गस्थानणुदण्डचक्रमथितानीकावलीका नृपा
नानानर्घमहोपदाञ्चितकरा मौलिस्खलत्पाणयः ।

---

१. 'लिस्फुरत्पा' ख.

यत्सेवावसरप्रतीक्षणपरा नीरन्ध्रयन्तो बहिः
साम्राज्यार्थमहाभिषेकसमयावेक्षास्तमासिञ्चत ॥ ६८ ॥

[इति सर्वैः समं स्वकलशावर्जनमभिनयति ।]

बुद्धिसागरः— [राजानं दृष्ट्वा सविस्मयं स्वगतं] अत्र हि-

काऽपि प्रभाभिषेकेण देवे पूर्वातिशायिनी ।
अनुभावयतीवास्मानद्य रामाभिषेचनम् ॥ ६९ ॥

किञ्च,

सफलोऽद्य श्रमः कृत्स्नो मम नीतिपथे कृतः ।
रघुवीरोपकारेण हनूमद्बाहुसारवत् ॥ ७० ॥

[इति हर्षनिर्भरः सविनयं पश्यन् स्थितः, राजा सहर्षमुत्थायक्षौम गन्धादिभिरात्मालङ्करणमभिनयन्नुपविशति ।]

पुरोहितः—

प्रत्यग्ररत्नरुचिरञ्जितसर्वतोदिग्-
व्योमाङ्गणं ग्रहसुदीप्तमिवोडुचक्रम् ।
मेराविवोन्नततरे मकुटं सुदीप्तं
मूर्ध्न्यस्य विष्णुपदमण्डनमादधेऽहम् ॥ ७१ ॥

[इति राज्ञो मौलौ किरीटं निदधाति ।]

बुद्धिसागरः— [स्वगतं पुरतो-निर्दिश्य]

एकच्छत्रमियं बिभर्ति परितःप्रालम्बिमुक्तासरं
कान्तं सान्द्रविलोलकेसरशिखं लक्ष्मीरिवाम्भोरुहम् ।

किञ्चैताः सितचारुचामरकरा ज्योत्स्नावलीः संहृता
वक्रेन्दोरिव वीजनैर्विरळयन्तीर्ष्याकुलास्तारकाः ॥ ७२ ॥

[इति सविस्मयं पश्यन् सानन्दं]

अयं हि,

हन्तामन्दप्रमोदामृतरसलहरीवीचिकान्दोळितभ्रू-
लीलाज्ञप्तप्तकोशाधिपशतसरसापूरिताशार्थिसार्थः ।
देवः संवर्ध्यमानः प्रमुदितविबुधैः सर्त्विगाचार्यवर्यैः
सेवासज्जन्नृपालाबलिसमयकृतः स्तूयते वन्दिसङ्घैः ॥ ७३ ॥

[पुनर्नेपथ्ये]

क्षुद्रोदीच्यनृपालशिक्षणकृते ये स्वामिभिः प्रेषिता-
स्तानामर्ध्य ततोऽप्युदीच्यनृपतीनाक्रम्य कांश्चिद् बलात् ।
अन्यानाहिमशैलमूलमवनीपालान् विलुण्ठ्यावशान्
कृत्वा च स्ववशेऽखिलां भुवमितः प्राप्ताः समं तैरमी ॥ ७४ ॥

एते त्वां प्रणमन्ति ये युधि परैरुत्क्षिप्तकुन्तैर्हता
वक्षःस्फालनफेनिलास्रकलिलाः संमर्दयन्तः परान् ।
धैर्यादन्यमुखीबुभूषुमपि तामात्मोन्मुखीमुन्मुखाः
प्रज्ञासेनमुखा जयश्रियमुदाजह्रुर्भुजाविक्रमैः ॥ ७५ ॥

अपिच इतः,

तेऽमी ये करदीकृतास्तत्र भटैः पर्याप्तवीर्याब्धयः
सङ्ग्रामेष्वसकृत्परीक्षितजयश्रीलाभतृप्तान्तराः ।
यूथं यूथमरीन् निहत्य च मृधे तृप्यन्ति नैवोद्धता
भीतास्त्वामभयार्थिनोऽद्य विनता मूर्ध्न्यञ्जलीन् कुर्वते ॥७६॥

राजा— [दृष्ट्वा सहर्षविस्मयं स्वगतं]

कोऽयमद्याभिषेकस्य प्रसङ्ग इति विस्मितः ।
क्रमाद् विनिश्चिनोम्यद्य सार्वभौमत्वमात्मनः ॥ ७७ ॥

[पुनर्नेपथ्ये]

शामी णो तुह शव्वभोममहिअं मित्तत्तणं ळेक्खिदुं
वेळं शाणुशअं जहाइ कडुअं तं शिंधुळाशोवरि
एशे शज्जबळे पडिक्खइ तुहाणत्ति जळे वा थळे
आणत्ते किळ शामिणा पमुदिए मित्तत्तशंशाहणे ॥ ७८ ॥

(स्वामी नस्तव सार्वभौममहितं मित्रत्वं लेखितुं
वैरं सानुशयं जहाति कटुकं तत् सिन्धुराजोपरि ।
एतस्मिन् सज्जबले प्रतीक्षते तवाज्ञप्तिं जले वा स्थले
आज्ञप्ते किल स्वामिना प्रमुदिते मित्रत्वसंसाधने ॥)

[राजा सानुशयं बुद्धिसागरमुखमवेक्षते ।]

बुद्धिसागरः— [सविनयमुपसृत्य] देव अयमेवैयतः स्वामिपादाभ्युदयसंविधानकपटनाटकस्य मूलनिदानं मूर्त इव स्वामिपादेषु हूणराजस्य मैत्रीरसः । तस्य हृदयङ्गमः सचिवचूडामणिः कसुर्नाम भौम दुर्लभानर्घनानाद्वैप्यरत्नजातनिबिडितबाह्यकक्ष्याप्रपञ्चः स्वामिपादमैत्रीमपेक्ष्य दूरोज्झितबन्धुजनमूर्धन्यसिन्धुराजतादृशवैरानुबन्धः स्वामिपादाज्ञानुसारी स्वामिनः पादावसरप्रतीक्ष इति विज्ञापयति भाषाद्वयचतुरस्तदीयसचिवः स्वामिपदान् ।

राजा— [सादरं] बुद्धिसागर यथार्हमुपचर्यतामयम् । तदुपकल्पिताश्चोपदाः सोपचारमभ्युपगम्यन्ताम् । उत्सवान्ते चैतन्मुखेनैव हूणराजो यथार्हं प्रतिसम्भाव्यताम् ।

बुद्धिसागरः — [सादरं] एवं क्रियते ।

वसुलक्ष्मीः— [सकौतुकं] अंहो तारिसो वि हूणराओ सअं एव्व ईरिसो संपण्णो त्ति अच्चरिअं । (अम्हो तादृशोऽपि हूणराजः स्वयमेवेदृशः सम्पन्न इत्याश्चर्यम् ।)

वसुराशिः— [स्वगतं] दिष्ट्या दीर्घकालानुषक्तो विरोधशङ्कुः सलेशमुद्धृतो, वत्सायाः संबन्धप्रभावादस्माकम् ।

राजा— [वसुलक्ष्मीं विलोक्य सस्पृहं सबहुमानं च]

प्राप्तेयं बत सुन्दरी त्रिभुवने स्वप्नेऽप्यलभ्या परैः
किं भूयो मनसापि मन्तुमखिलैर्ब्रह्मादिभिर्न क्षमा ।
किञ्चाखण्डितसार्वभौमपदवीलब्धा मयायत्ततो
राजानः करदीकृताश्च बलिनः सर्वेऽपि मानोन्नताः ।। ७९ ।।

विदूषकः— [सोल्लासं पुरो भूत्वा सनृत्तमुत्तरीयं धून्वन्] भो वअस्स बह्मणो ण विह्मरणीयो दिव्वसुंदरीळाहविह्मिदेण होदा । (भो वयस्य ब्राह्मणो न विस्मरणीयो दिव्यसुन्दरीलाभविस्मितेन भवता ।)

राजा — [सस्मितं] वयस्य क्षणं प्रतीक्षस्व ।

बुद्धिसागरः— [राजानमुपेत्य] देव किं वो भूयः प्रियमाहरतु भगवान् कुलगुरुः पद्मनाभदेवः ।

राजा— [सप्रणयगद्गदं] श्रूयतां भोः पिण्डितास्मत्सुकृतसम्भार-सार बुद्धिसागर परमार्थः ।

बुद्धिसागरः— [पाणिशिखरेणास्यं पिधाय] अनुगृह्णन्तु देवपादाः। इतोऽहमवहितोऽस्मि।

राजा— [सप्रश्रयं] एष हि देवः,

सार्ष्टिं[1] तां परमामिहैव भुवने लोकोत्तरानुत्तर-
स्वान्तःसाक्षिकमाधुरीकविषयप्रादेशनात् स्वस्य मे।
संसारं च ससारमद्य निखिलात् क्षत्रात् कुलं मेऽधिकं
कुर्वन् कारुणिकः स्वयं किमपरं भूयः प्रियं प्रार्थ्यताम् ॥ ८० ॥

बुद्धिसागरः— सत्यमुक्तं देवपादैः। तथापीदमस्तु भरतवाक्यम्—

राजानो न परस्पराहितमुधामात्सर्यदोषाविलाः
क्लिश्नन्तु प्रकृतीः सदा नयपथासक्तास्तु पुष्णन्तु ताः।
मोदन्तां मुखजाः स्ववृत्तिनिरता यज्ञैर्यजन्तः सुरान्
काले वृष्टिभिरीहिताभिरवनीं नेनेक्तु चाखण्डलः ॥ ८१ ॥

[इति परिक्रम्य निष्क्रान्ताः सर्वे।]

पञ्चमोऽङ्कः।

वसुलक्ष्मीकल्याणं नाटकमङ्कैर्युतं चतुष्पष्ट्या।
व्यरचि मयेदं कुतुकाद् विश्वावसुवत्सरे वसन्ततौ ॥

———

१. 'सार्ष्टिं तामपरामिहैव' ख.

श्लोकानुक्रमणी

श्लोकादिः	पुटम्	श्लोकादिः	पुटम्
अइ णाह चित्तफळए	५४	असाध्यं यतमानानाम्	११
अज्ज पेक्खइ तुमं वि	५६	अस्मत्कुशलविचिन्तन	२२
अणिसं हिअअणिळीणो	९१	अस्मन्मातुलबालमित्र	५१
अतो वयस्यार्पितचारु	१११	अस्याः कराग्रमिष	५४
अत्रान्तरे तु तन्माता	१२	अस्या लावण्यसिन्धो	१२६
अत्रान्तरे मिहिरबिम्ब	१६	अस्यास्तु लावण्य	२०
अदिसंकक्खितमणा	११६	अहमविनतपूर्वो मानिनां	१९
अथान्तर्बहिरेव वाखिल	९८	आजावाक्रम्य गुर्वी	१४६
अथाहं परमास्तिको	५०	आतप्तकाञ्चनहरिन्मणि	७४
अथेयं सफला जनिः	१५१	आत्मानुरागपिशुनं	५५
अथैतत् फलितं चिराद्	१३०	आनीलकुन्तलभरा	७५
अथैषा पृथिवी समुद्र	१३१	आ बाल्यात् परस्परमेवयैव	१२९
अध्यक्षं मम वीक्षसे	१४	आरामम्मि सही	७९
अन्वास्यमाना परिचारिका	१४७	आलेख्यं पुन	२०
अप्पय्याध्वरिणः सुतेष्वचरमः	५	आविष्कृतक्रमविक्लप्त	५४
अप्पय्याध्वरिणश्चतुर्व्यवहित	”	आवृण्वन् विदिशो	८२
अप्यलभ्यं सुतैर्वापि	८१	आसीदग्रेऽवलग्नाम्बर	८८
अयं कुमारो वसु	१५२	आसीनमौदुम्बरभद्र	१५५
अयमितः पिठरो	७६	आस्थानी मीनकेतोः	४६
अयावकरसार्जना	३७	आस्थान्यामानयामासुः	११
अयि जनिशतकोटि	४८	इतः सिंहासनं देवः	१४७
अरुणारुणकान्ति	१३१	इतोऽहमार्यामभिवादये	१३
अलमियतापि	१९	इत्यहेतुपरुषीकृत	१५
अविरतकरयुग्मोन्मुक्त	७९	इन्दीवरोदरचमत्कृति	१०८

श्लोकादिः	पृष्टम्	श्लोकादिः	पृष्टम्
इयं हि मितभूषणा	५८	किं ब्रूमो हूणराजस्य	१४४
इयमिह तरलाक्ष्याः	१२५	किं मज्जामि सुधार्णवे	२७
ईदृशे दुर्घटेऽप्यर्थे	११३	किं मे दक्षिणमक्षि	१११
ईदृश्या भुवि चेत्	२०	किं वाऽकारि मया	१९
उच्चैः कादम्बिनीयं	११९	किन्न्वेषा जलनिर्भराभ्र	४७
उच्चैर्विद्युदुपासितेयमधुना	११९	किमेष स्वप्नः स्यात्	१०७
उदारभ्रूवल्लीमुचित	७२	किरति किमपि स्मेर	१८
उद्घुष्यन्तु पिबन्त एव	४३	केयं धन्या कस्य कन्या	२३
उत्थाय निर्जनमवेक्ष्य	१५	केयं लावण्यपूरा	११९
उद्यन्तीमुदधेरुदीर्ण	१	केयं वागुरिकाक्षि	४६
उद्यानलक्ष्म्यास्त्वानील	८७	केयमम्बेव लज्जार्ता	१४५
उन्मीलिलज्जा	५७	कोऽयमद्याभिषेकस्य	१५८
उपवनपादपवर्गे	७७	को वासुदेवजनकार्थे	६
उप्यन्ते न कृषीवलैः	११०	क्लिन्ने वान्तमले	११२
एकच्छत्रमियं बिभर्ति	१५६	क्वचिन्मधुरकोकिला	४३
एते त्वां प्रणमन्ति	१५७	क तर्हि रमणी वसेत्	३९
एवं चेत् फलितं	१०९	क्वासीदेषायताक्षी	१४८
ऐन्दव्या कलया	१	क्वाहं वर्ते क्वनु बत	५०
कंठं हारमुहेहि	१२५	क्षुद्रोदीच्यनृपालशिक्षण	१५७
कनककुण्डलहार	११२	खर्जूरमूलशशिकान्त	८१
कनककुसुमपङ्क्त्या	१२२	गच्छइ पुणो णिवट्टइ	६८
कन्या सिन्धुपतेर्हि	१०	घटजन्ममुनेरिवोदये	१४१
करकलितविपञ्चीं	७३	चक्रंगणाविरहवह्नि	९४
कहं इमाए मह पुत्त्वभासणं	६९	चञ्चतिपङ्कलपल्लवा	४२
कान्तिच्छटा कनककेतक	४५	चातुर्यात् स्वयमन्वहं	१२३
कापि प्रभाभिषेकेण	१५६	चान्द्रे बिम्बे सङ्गतं	२८
किं ब्रूमो देव भाग्यम्	१४४	चित्रावलोकसमये	७३

श्लोकादिः	पृष्ठम्
चिरात् स्वसुः	१५३
चिरादपत्याननपङ्कजे	१३६
जाने धातुः करपटलिका	४९
जो दिट्ठो महुरम्मि	६३
ज्ञातं वास्तु न वा यदेव	१३०
णावकिदं णोवकिदं	३८
तत्तादृक्षशताधिकाद्भुत	५
तद्वक्त्रं तदुदीक्षणं नयनयो	१०६
तद्वक्त्रं यदि पङ्क एव	७
तन्मन्ये निर्व्यलीकं	१४४
तन्व्याः कोमलकण्ठ	५५
तमस्सन्ध्याप्रसाराभ्यां	८४
तमालदलनीलया	८
तमोमिषघनागमे	७५
तस्या नीवीनहनसमये	१२७
ते तावच्चतुरर्णवोद	१५५
तेऽमी ये करदीकृताः	१५७
तृप्यामि नैव सुचिरेण	२७
त्रय्यात्मा भगवान् नृदेव	३०
त्रिभिरिह पुरुषार्थैः	१२५
त्रिविष्टपपतित्वमप्यमर	४७
दिवाभीतदृशां सिद्धा	८२
दिशि दिशि चटुल	३८
दिष्ट्याद्य श्रुतयः प्रमाण	९८
दिष्ट्येयं वनचन्द्रिकेव	१४७
दुग्ध एव पतितं फलं	१५४
दुग्धाब्धेररविन्दनाभ	९५
दुस्स्वातन्त्र्यं प्रभवत	१४९
दृष्टालेख्यमयी मुग्धेव	७१
दृष्ट्वालेख्यमयीममूम	४९
देवः पट्टाभिषिक्तः	९७
देवस्याभ्युदयाय	१४३
देवीमुखेनैव समी	१३०
दौर्भाग्यं मम किं	१४०
द्रवति सुमुखि जिह्वा	९७
धण्णम्मि धण्णदिट्ठी	६४
धनुर्धुवति मन्मथो	४७
धन्यस्त्वमेव सफलं	५५
धात्रा दत्तः कर इव	१४२
धिग् धिग् दुर्विधि	१०९
धिङ् मे जन्म	१२९
धृतकौतुकमण्डना	१३७
न किल मनुते योऽन्यं	११
न नमय चटुलाक्षि	६०
न बहिरिममिदानीं	९४
नभोविपणिमाश्रयन्	७४
नवमणिखचिताभ्यां	१२२
न साहसं विना लोके	२९
नात्राण्वप्यपराध्यते	११०
नाहं चण्डि तथाविध	१५
नितम्बपुलिनोज्ज्वला	९१
नियम्य परतः करैः	९४
निर्णीयतेऽद्य	१५०
नीयते नर्मसुहृदा	१२

श्लोकादिः	पुटम्
नून चण्डमयूख	९६
नेत्रे भूरि विकासयन्नपि	४६
नैतच्छिल्पिनि तर्कयामि	१८
नैनां किन्तु	४८
नैवं नैवमियं कुतोऽपि	२१
नैवं प्रागुशना बभूव	१४५
पङ्केरुहप्रतिभटानन	१०८
परिचितनवचूता	७
परीक्ष्य लक्षणज्ञानां	११
पर्यन्तसान्द्रसुमहौषधि	८७
पश्यामि सिन्धुकुल	१४५
पश्यायं कुमुदाहृतः	९६
पश्यैषा मणिकुण्डलो	१२४
पिठरः किल चन्द्रलेख	१०९
पिठरः सचिवान्तिकं	१४१
पुत्रं स्वमेत्य परिरभ्य	११०
पुत्रापमृत्युहतये	१११
पुनरपि सकृदेनां	१०८
प्रत्यग्ररत्नरुचि	१५६
प्रथमरससमृद्धस्निग्ध	१०८
प्रहिणु रजतभूभृत्	९२
प्रागेव मे परमकारुणिक	७५
प्राच्याः कौतुकपद्मराग	९५
प्राप्तेयं बत सुन्दरी	१५९
प्रेमस्मेरैर्मधुर	१४८
फुरमाणपक्खसुभअं	३४
बहिरेव दृशौ रुन्धन्	४२

श्लोकादिः	पुटम्
बिम्बत्वं विधुमण्डले	९६
भावस्तस्येत्थमेषा	१४४
भावाः सन्तु शतं पटीर	७१
भिन्दन् चक्राह्वहर्षं	६६
भ्रमन्ति परितोऽवनिं	३०
भ्रान्तेयं भ्रमरालि	१२६
मणिगणमिव सूत्रं	१
मणिवेदिअवुत्तंत	११३
मण्णे मम्महणत्थं तुमं	८७
मनोरथपथातिगां	१४०
मन्दं विरज्यति यदालि	८
मन्दरस्येव मद्बुद्धे	१४८
मन्दास्पन्दनचन्दना	४१
मन्ये नीरदगर्भतः	४५
मन्ये ब्रह्मसभासु	४७
मन्ये भ्रातुः सन्निधानात्	१४९
मन्ये मन्मथ	७२
मन्ये मारसुहृन्मधु	४३
माधुर्योद्गारसीमा तरुणि	४६
मिथ्या प्रदर्श्य मनसा	३७
मुखं कमलसन्निभं	७२
मुनेरिव मुहुर्मुहुः	८३
मोरंगणेव्व महुरस्स	६३
यः प्रत्यर्थिक्षमाभृद्विमथन	१४६
यः श्रूयते स्वकृत	५
यतो योऽर्थो विधातव्यः	१३०
यत् प्रेक्षणीयतर	१४९

श्लोकादिः	पृष्ठम्
यत्त्वीदृशी वसुनिधे	१५३
यत्सृष्टौ हेमभूभृद्	८९
यदाप्यं प्रीयते यत्र	३९
यदि परमनुनीया	९३
यदि विधिरनुकूलो	१४९
यदीदृशः कविर्नेता	६
यद् दूरादपि	१५२
यद् भीत्या यूथजो	१४६
यद्यप्यास्तां कुशल	४९
यद्येवं दयसे प्रिये	१५२
यद्रोचते प्रभवते	१५४
यद्वा साध्वि पूर्वजन्मनि	१२९
यस्य प्रसादनकृते	६०
यस्यायं मतिचक्षुषा	१४५
यस्या वचांसि मधुराणि	१४
यामालेख्यगतां विभाव्य	४७
यावद् विमूर्च्छति तमः	७५
ये केचिच्छ्रुतिपाठ	७
येऽमी भावास्तरलनयना	१०७
योगक्षेमधुरन्धरे	२२
यो दूरादपि तादृशीं	१३२
योऽयं वञ्चीशवंशोदधि	९
रजःकलितमाधवी	४२
रशनाकुरुविन्द	१२६
राजानो न परस्पराहित	१६०
रुक्खा गुम्मा ळदाहिं	४४
रूवविणिंदिअमारो	६३

श्लोकादिः	पृष्ठम्
लिप्येते किमु चक्षुषी	४८
लोकस्याभ्युदयो	१४०
वक्त्रं वारिजजैत्रमुत्पल	४९
वने चरन् यश्चिर	४२
वन्दामहे किमपि	१
वरपाणौ वधूपाणि	१३१
वरानुरूप्यनिर्णीत्यै	११
वसुलक्ष्मीकल्याणं	१६०
वात्सल्याद् भगिनी	१३९
विकारः कोऽप्यन्तर्मुषित	९०
विडम्बयति चन्द्रमा	१३२
विद्वत्कुलगुर्वप्ययमखिनां	५
विधिरिह न विधाता	२०
विधुमुखि तव रूपं	१९
विपक्षत्रविशः स्वधर्म	६५
विप्राः पश्चिमबुद्धयः	९२
विरागतादर्पजुषां	९१
विस्मयस्मेरवक्त्रत्वात्	१०
विहरन् पटीर	९९
वीची कूचति संस्तुवन्ति	१३२
व्याकर्तुं वाचमीष्टे	६
व्याजान्नौकाधिरूढा	१४३
व्योम्न्येषा यमुना न	१२०
शक(को ? गो)पनिभ	१२५
शलाकया कज्जल	१२२
शशिमुखि वदनं	९०
शाभी णो तुह	१५८

श्लोकादिः	पृष्ठम्
शुभंयुः सुमुहूर्तोऽयं	१५५
शृङ्गारामृतवर्तिकेव	१८
शृङ्गारार्णवसंप्लवैक	१४०
श्रवणनिहितनीला	१२५
श्रुत्वा सा तुमुलं बहिः	१०९
श्रूयन्ते कलकण्ठकण्ठ	४३
श्रेयो ज्ञानं कार्यभारस्य	११
संरब्धं कलकण्ठकण्ठपटह	४३
सचिवनीतिरियं	१३०
सत्सामाजिकलाभहर्ष	३
सत्यं प्रसादसुमुखी	१५०
सत्यं सादरमामनन्ति	८८
सत्यं साहसिकाः	९२
सत्यैवेयमनिर्गल	१०८
सन्धित्सन्तः स्म हूणा	१४७
सन्ध्याग्निं पुरतो निधाय	७४
सन्ध्यानलं प्रविष्टे	,,
सफलोऽद्य श्रमः कृत्स्नो	१५६
समए फळंदि रुक्खा	१७
सम्भाव्येत कुतोऽन्यतो	४
सम्भाव्यैव न यादृशाद्	१०७
सर्वं खल्विदमामनन्ति	७३
सर्वज्ञेनापि हा हा	९६
स सिन्धुराजस्तनया	१२
सान्द्राश्लेषप्रसृमर	१०७
सामन्तभूपे पृथिवीभृतां	५२
सायंनटच्चतुरचन्द्र	६६
साष्टिं तां परमामिहैव	१६०
सुन्दर्यः कति वा सन्ति	७६
सुमुखि विसृज	८९
सेयं कोकनदद्वयी	१२०
सेयं देवी वसुमती	१४५
स्थूलालोकेऽप्युदञ्चत्	१७
स्पृश्यतेऽब्धेस्तलं वापि	१२
स्मेराम्भोरुहगर्भनिर्भर	४१
स्वप्नवृत्तेऽपि संरब्ध	२९
स्वयं ज्ञात्वा	७
स्वाज्ञास्थानणुदण्डचक्र	१५५
स्वात्मानमेव यदवोचद्	७३
हन्तामन्दप्रमोदामृत	१५७
हन्तासन् कति मे न	७१
हन्तास्मिन्नपि सैव हेम	१४६
हन्तास्मिन् समये	४०
हहह कलयतीमां	७२
हहह ण सम्मई ताव	८४
हहह निहता धातुः सृष्टौ	८८
हा कष्टां गमिता दशां	१३९
हा दुव्वातणुमूलमेत्त	९९
हा धिक् कष्टमिदं	२२
हा ळद्धोऽसि चिरेण जो	९९
हिमगिरितटीप्रत्यग्भाग	९
हृदयनिहितवामाचारु	७६
हेमन्ते सिसिरे वि	९९
हेमस्तंभैरनेकैर्मणि	१५३
ह्यः सायंप्रभृति	१३३